वैयाघ्रपद्योपहितार्घपाद्यः[2] प्राचीनयोग्योदितमङ्गलाशीः ।
स तत्र रैभ्यायणपृष्टवार्त्तः पौलस्त्यहाऽत्रेरिव धाम्न्यभासीत्[3] ॥ ३ ॥
साग्न्याग्निवेश्ये सुतसांख्यशांख्ये धौम्यापधौम्ये धुतशाव्यसाध्ये[4] ।
आवव्यचामस्यनमस्यधानंजय्यानडुह्ये[5] स जहर्ष तस्मिन् ॥ ४ ॥
च्मा तार्क्ष्यलक्ष्मेह[6] सकौरुकात्यवैश्यावसव्यायनजारमाणान् ।
लौहित्यसांग्रित्यवतोऽभिवाद्य बाभ्रव्यमाण्डव्यमुखानुपेये ॥ ५ ॥
स मङ्क्ष्माङ्क्ष्यमनस्यमाङ्क्षीत् स वल्गुवाल्लाव्यवचस्यवालीत्[7] ।
मानव्य शाङ्क्य मनोश्च शङ्कुमानाय्यमानाय्यमिवैष भेजे[8] ॥ ६ ॥
सावव्यकार्क्ष्यकुटीगकौटिगव्यान्तिषङ्गिर्विदभृङ्गिरीद्यान्[9] ।
स वैदभृत्यायनवैदभृत्यसौलाभ्यदाल्भ्यान् बक्र तत्र मेने ॥ ७ ॥
जिगीषवेऽस्मै निजुगोप जैगीषव्यो न्यगूहद्यदु गौहलव्यः[10] ।
तच्छ्रौव्यलैगव्यकथासु तत्त्वं गौत्रब्रह्मणो[11]ऽस्य स्वयमाबभासे ॥ ८ ॥

---

१ °नर्त्तीनमंतवर्हिं C.; °नर्त्तितमंतवर्हिं K.; °नर्त्तितत्पत्तवर्हिं D.

२ वैयाघ्रपाद्यो° C. F. K.

३ रैत्यायन° अमासीत् D.; पौलस्त्यदात्रेरिव° F.

४ साग्न्यग्निवेश्येसुत° C.; साग्न्यग्निवेश्ये सुतसांख्यशाख्ये° D.; साग्न्यग्निदेश्यसुत° F.; °सांख्यसांख्ये C. F. K.; धुतसाव्यसाध्ये D.; °साध्यौ C.

५ आवस्यवामस्यममस्यधामंजय्यान° D.; °धानंजह्यानडुह्ये C. F. K.

६ च्मोताक्ष्य° F.

७ °ववस्य बालान् C.; वचस्यवलात् F. K.; °वरस्य वलात् D.

८ °सांकव्य° C. D. F.; °मतोश्च C.; °शंनुमा° D.; °आनाव्यमिवैष MSS.

९ °विदभिन्नरीयान् F.; विदभित् गरायान् C.; विदभित् गरीद्यान् K.; विदभृहिरीघां D.

१० जिगीश्वोऽस्मै° C. F.; निगूहत्पगौहलव्यः D.; °गौहलव्यं C.

११ तद्ब्रौव्यलौगव्यकथासुतन्नं° C.; गौत्राह्मणो C. K.; तक्रौव्यङ्गिंगव्यकथासतत्वगौर्ब्रह्मणो D.; तक्रौव्यलिंगव्य° F.

वातण्ड्यताण्ड्यायनकाप्यकात्यमान्तव्यतान्तव्यदमैः स तस्मिन् ।
तारक्ष्यतालुक्ष्यतपोभिरार्च्यैः कान्यक्यशाकल्यजपैश्च[1] जघ्रे ॥ ९ ॥
स काण्यगौकक्ष्यसमक्षमस्मिन्नागस्त्यकौण्डिन्यकृतातिथेयः[2] ।
सुभाषितान्यादित पार्णवल्क्यो यजूंषि सूर्यादिव याज्ञवल्क्यः[3] ॥ १० ॥
माहित्यसाहित्यविदेष जातूकर्ण्यस्य सावर्ण्यसवर्णभोजः[4] ।
भाण्डित्यपाण्डित्यमिहैव राङ्गगण्यादयो वीक्ष्य तमित्यमूचुः ॥ ११ ॥
भाडित्यभैषज्यवचो विचिन्वन्नालाप्यचैकित्यमतिं मिमानः[5] ।
मौसल्यपैङ्गल्यकृतीः स पाराशर्याप्रमाणो मनसालुलोके[6] ॥ १२ ॥
सवार्हदग्न्यायनजामदग्न्यः स्थौर्यौक्थ्यतैतिक्ष्यजिघृक्षिताभिः[7] ।
कौटिल्यशास्त्रार्णवपारदृश्वा ननन्द गौलन्यमुनीन्द्रवाग्भिः[8] ॥ १३ ॥
काण्यैकलव्यायनपैप्पलव्यदाल्भ्यैन्द्रहव्यायनदैवहव्यान्[9] ।
राराक्ष्यचाणक्यवदाररक्ष्यमौलूक्यचौलुक्यजुषं सिषेवे[10] ॥ १४ ॥
स भाजयन्नाभयजात्यवैरोहित्याश्मरथ्यायनवार्षगण्यान् ।
सपौतिमाष्यायणशार्कराक्ष्यशाण्डिल्यमौद्गल्ययुजो विरेजे ॥ १५ ॥

---

१ काथक्य° C. F. K.; °साकल्य° D.

२ स कांक्ष्य° C. K.; स कांक्ष्य° F.; स सांवर्गी° कृताविधेयः D.

३ सुभाविता° पार्णवल्काः° याज्ञवल्काः C. K.; पार्णवल्क्याज्ञ्यषि° D.

४ जातूकर्ण्यास्य° F.; जातूकसर्पास्य° D.

५ विचिन्वन्नालाक्ष्यचैकित्य° F.; वैकित्य° D.; °आलोप्यचैकित्य° C. K.; मतिमिमानः C.

६ मौशल्य पैगल्यकृतीः स पाराः सर्यापमाणो ममसा° D.; °कृता स पाराशर्यायमाणो मनसलुलोकि C.; °कृती स पारासर्यायमाणो नुमसा लुलोके F. K.

७ ? सवार्हदग्न्याः स्थिरकौशलाग्निस्थैर्यौक्थ्य° C.; °स्थौर्यौ तैतिक्ष्यजिघृक्षिताभिः D.

८ कौटल्यशास्त्रा° K.; °नानांवगौ° वाग्निः D.; दृश्वा नगौ ऋषकेशमुनी° C.

९ का कलव्या° D.; काण्वैक° दोलिद्र° C.

१० रारांक्ष्यचाणक्यरुचः स तस्मिन्नौलूक्यचौलुष्वज्जषः सिषेवे D.; °वटारक्यमौलुक्यचौलुक्यजुषः° F.

माधव्यतो धाम स माधवश्रीर्बाभ्रव्यधीर्बाभ्रवतः प्रभावम्[1]।
कापेयतः काव्यरुचिः प्रतापं[2] बौध्याच्च बौधेश्च स बोधमाप[3] ॥ १६ ॥

प्रथमवृत्ते विरोहितागस्त्यशब्दौ[4]। द्वितीयवृत्ते तण्डवतण्डधूमैक-कुरुकतानडुहलिगुशुङ्कुकततरुचवर्जिताः[5] शब्दाः। तृतीयवृत्ते मङ्क्वग्नि-वेशवृचकचरेभवर्जिताः[6]। चतुर्थश्लोक ऋचमनुवर्जिताः[7]। पञ्चमश्लोके तलुचव्याघ्रपत्तन्नुवर्जिताः[8]। षष्ठार्यायां भडिततितिम्भवामरथशब्दाः[9]। सप्तमश्लोके भिष्णजालापिकृतवीरशब्दा[10] अभिजिदादिश्च शकलादिगणयोग्या[11] भवन्ति ॥ आकृतिगणोऽयम्। तेन यज्ञहूप्रभृतयो[12] द्रष्टव्याः ॥ २५२ ॥ इति गर्गादिः ॥

इति

श्रीगोविन्दसूरिशिष्यपण्डितश्रीवर्धमानविरचितस्वीयगणरत्नमहो-दधिवृत्तौ तद्धितप्रक्रियास्वार्थिकापत्यप्रत्ययगणनिर्णयो[13]
नाम तृतीयोऽध्यायः समाप्तः ॥

---

१ र्वा भवतः प्रभावं F.; °र्वाभुवतः प्रभावं K.; °र्वा भुवनप्रभावः C.

२ कोपेटातः° प्रभापं D.; प्रतापा C.

३ वाध्यास्वबोधस्वस बोधमाप C.; बौध्यास्व बौधिश्च स वाधागपा। D.; बौध्यास्व बौधेश्च स बोधनाय F.; बोध्यास्वबोधेस्व स° K.

४ ? विरोहिताशब्दास्तृतीय° D.; विरोहितागस्तिशब्दौ C. F. K.; śl. 246 has अगस्त्य which in the other works is *kaṇvâdi* (अगस्ति being *gargâdi* only).

५ लिंगुशुंकुकतरूच° F.; शुंकुकत-रूच° C. K.; D. om. from द्वितीय.

६ °वृचकच° MSS.; Bö. also has वृच twice in the *gargâdi*, but not in the *kaṇvâdi*; cf. *lohitâdi*, śl. 60.

७ ऋष्यमनु° D.; °मतुववर्जिताः C.

८ °तनुवर्जिताः C.

९ षष्ठीर्यायाततितिंभ° D.; षष्ट-श्लोके भडिततितिभ° C.; भडिततिंति-भ° F.

१० भिष्णजापिपकृत° D.

११ सकलादि° D.—*śakalâdi* = *kaṇ-vâdi*, P. iv. 2, 111.

१२ यचहूप्रभृतयो D.

१३ तद्धितप्रक्रियानिरूपणं E.

अथ चतुर्थोऽध्यायः ॥

धनं सेना पशुक्षेत्रे धान्यप्राणसभागृहाः ।
शताश्वधन्वराष्ट्राधिकुलधर्मगणास्तथा[1] ॥ २५३ ॥

धनादेरपत्ये वाण् पत्युरित्यनेन धनादिपूर्वपदात्पतिशब्दाद्वाणधिकारे येऽर्थास्तत्रापत्ये[2] वाण् भवति । ण्यापवादः[3] ॥ * ॥ धनपतेरपत्यं धनपतिर्वा देवताऽस्य । धानपतः ॥ * ॥ सेनापतेरिदम् । सैनापतम्[4] ॥ * ॥ एवं पाशुपतम् ॥ * ॥ क्षैत्रपतम् ॥ * ॥ धान्यपतम् ॥ * ॥ प्राणपतम् ॥ * ॥ सभापतम् ॥ * ॥ गार्हपतम् ॥ * ॥ ग्रातपतम् ॥ * ॥ आश्वपतम् ॥ * ॥ धान्वपतम् ॥ * ॥ राष्ट्रपतम् ॥ * ॥ आधिपतम् ॥ * ॥ कौलपतम् ॥ * ॥ धार्मपतम् ॥ * ॥ गाणपतम् ॥ २५३ ॥ इति धनादिः[5] ॥

उत्सोशीनरभल्लकीयविकरा धेनूदपानोष्णिहः[6]
पञ्चालापवदौ महानदपृथे इन्द्रावसानः कुरुः ।
सत्वग्रीष्मरथन्तरं जनपदो मध्यंदिनानुष्टुभौ
त्रिष्टुप्पङ्क्तिमहानसाश्च भरतो ज्ञेयः सुवर्णः ककुप् ॥२५४॥

उत्सादेश्चात्रित्यनेनोत्सादेर्देवपृथिवीशब्दाभ्यां[7] वाऽस्ये तस्मात्पूर्वेऽपत्ये

---

१ °धान्वराष्ट्रादिकुल° E.; A. om. text and comment; B. om. to धनपतेरपत्यं धनपतिर्.

२ येऽर्थासेनापत्ये D.

३ णाप्यापवादः C.; ण्यत्यापवादः D.; ण्यप्यापवादः K.

४ Thus also Hem.; Bö., Yajñ., Kâś. V. *a.* & *var. l.* ed. have स्थानपति instead.

५ = *aśvapatyâdi*, P. iv. 1, 84; Hem. (*dhanâdi*, vi. 1, 14) reads also गज (गाजपतं) and adds केचित्तु गृहसेनाशब्दौ न पठन्ति । तन्मते गार्हपत्यं सैनापत्यमित्युत्तरेण ञ्य एव (P. iv. 4, 90).

६ उत्सोसीनर° D. E.; °विधुरा धेनूरपादो° D.; °धेनूदपातो° C.; A. om. text and comment.

७ The other works include देव and पृथिवी in the *gaṇa*.

वार्थेऽञ् भवति । अणस्तदपवादानां च बाधकः ॥ * ॥ उत्सस्यापत्यम् उत्सो वा देवताऽस्येति । औत्सः ॥ * ॥ औशीनरः ॥ * ॥ भाल्लकीयः ॥ * ॥ वैकरः । अस्य पथ्यादिपाठाच्चातुरर्थिको[1] ण्य एव ॥ * ॥ धैनवः[2] ॥ * ॥ औदपानः ॥ * ॥ औष्णिहः ॥ * ॥ एवं पञ्चालेषु भवः । पाञ्चालः । अके प्राप्ते[3] ॥ * ॥ आपवदः । वामनमतेन[4] ॥ * ॥ माहानदः ॥ * ॥ पृथाया अपत्यम् । पार्थः ।

धियचमाणेनाहृतः पार्थेनाथ मुरं द्विषन्[5] ॥ * ॥

इन्द्रावसानो नाम बाहीकग्रामस्तस्य[6] । ऐन्द्रावसानः ॥ * ॥ कुरुषु भवः । कौरवः ॥ * ॥ सत्वतोऽपत्यम् । सात्वतः । यथा ।

समरेषु रिपून्निजघ्नता[7] शिशुपालेन समेत्य संप्रति ।
सुचिरं सह सर्वसात्वतैर्भवविश्वस्तविलासिनीजनः ॥

यादवैरित्यर्थः ॥ * ॥ ग्रीष्मे भवम् । ग्रैष्मं महः[8] ॥ * ॥ रथंतरो नाम राजा साम वा । तदपत्यं तत्र भवं वा । राथंतरम् ॥ * ॥ जानपदः ॥ * ॥ माध्यंदिनः ॥ * ॥ आनुष्टुभः ॥ * ॥ त्रैष्टुभम् ॥ * ॥ पाङ्क्तम् ॥ * ॥ माहानसोऽग्निः ॥ * ॥ भारतः ॥ * ॥ सौवर्णं कटकादि ॥ * ॥ काकुभम् ॥ २५४ ॥

बृहतीजगतीमहिमत्तरुणास्तलुनो महन्महाप्राणौ ।
विनदबृहत्पीलुकुणा वृषदंशो बष्कयश्वासे[9] ॥ २५५ ॥

---

1 This must refer to the *saṁkāśādi* (Hem.vi.2,82 *supanthyādi*),śl.274-6 (in which Vardh. includes the *pragadyādi*, P. iv. 2, 80).

2 Cf. p. 287, l. 11.

3 आकप्राप्ते B. C. (P. iv. 2, 124); °अपवादः B. C. K.

4 The MSS. apparently refer this to the following माहानदः which is given by all the works, whilst अपवद् is given by none of them.

5 Śiś. 2, 1 [द्विषन्नुरम् eds.].

6 वाहिक° D.; वाहाकाग्राम° C.; वाहीक B. F. K., Yajñ.

7 Śiś. 16, 14; रिपून्विनिघ्नता eds.

8 ग्रैष्ममहः D.; cf. p. 304, l. 1.

9 °महिमतरुणा° B.; पीलुकुणपृषदंशो° E.; °पीलुकुणबृहषदंशो वष्कयश्वासि D.; A. om. text and comment.

बार्हतम्[1] ॥ * ॥ जागतम् ॥ * ॥ महिमतो[1] भावो महिमा । तस्य माहिमः ॥ महीमदित्यन्यः ॥ * ॥ तारुणः । तालुनः ॥ तरुणाऽपत्यं तारुणः । तालुनः । ढणि प्राप्ते[2] ॥ * ॥ माहतः ॥ * ॥ माहाप्राणः । महाप्रयाण[3] इत्यन्यः ॥ * ॥ वैनदः ॥ * ॥ बार्हतः ॥ * ॥ पीलूनां पाकः पीलुकुणः । ततोऽञि । पैलुकुणः[4] ॥ * ॥ वृषं मूषिकं धर्मं वा दशतीति वृषदंशो मार्जारः पापवान्वा । ततोऽञि[5] । वार्षदंशः ॥ जिनेन्द्रबुद्धिस्तु वृषदंशे[6] इति वृषच्छब्दादंशेऽञ् । वृषद अंशो वार्षदः । अंश इति किम् । वार्षदोऽन्यः । अणेव भवति ॥ * ॥ बष्कयशब्दोऽसेऽसमासेऽञमुत्पादयति । बाष्कयः ॥ अन्यच्च सुबष्कयस्यापत्यं सौबष्कयिः ॥ अस्य समासप्रतिषेधाद् उत्साद्यन्तस्यापि प्रत्ययः । गोधेनुभ्य आगतं गौधेनवम् । मयड्रूप्यो न भवत इति शकटाङ्गजः । अस्मन्मते तु तदन्तानां व्यवच्छेदः[5] ॥ २५५ ॥

देशे तूदस्थानो हंसपथं वर्धमानमहितौ च[7] ।
दंशं कुरुकतकुणपावुत्सादिगणे पठन्त्येके[8] ॥ २५६ ॥

उदस्थानशब्दो देशे वर्तमानोऽञमुत्पादयति । देशेऽभिधेय इत्यन्यः । औदस्थानः ॥ अन्यच्च । उदस्थानो नाम कश्चित् तस्य । औद-

---

१ महतो D.—महिमत् Hem., om. others.

२ Acc. to Pâṇ. iv. 1, 120.

३ Thus D.; माहाप्रापाण° F.; महाप्राण C.K.; महोप्राण [? = माहाप्राण] B.—Hem. has महाप्राण & महाप्रयाण; the others महाप्राण only.

४ पीलुकणः B.—Bö., Yajñ. पीलुकुण; Kâś. V. ed. पीलु । कुल । (!); MS. *a.* पीलुकर्णः.

५ D. om. from ततोऽञि to the end.

६ Kâś. V. ed. reads पृष, दंशे; MS. *a.* पृषदंशे; Bö. पृषदंश; Yajñ. वृषदंशो मार्जारस्तस्य वार्षदंशः; Hem. वृषद अंशे । वृषदंश इत्यन्ये.

७ देशे वृद° वर्द्धमहितौ च C.

८ E. om. this śloka; A. D. om. text and comment; उदस्थान alone is given by Bö., Yajñ., K. V., and exemplified in the *kârikâs*; Hem. has उदस्थान, हंसपथ, वर्धमान, महित्.

स्थानिः ॥ * ॥ हांसपथः ॥ * ॥ वार्धमानः ॥ * ॥ महितस्य[1]। माहितः ॥ * ॥ दांशः ॥ * ॥ कौरुकातः ॥ * ॥ कौणपः ॥ * ॥ एतेषां यथासंभवमुदाहरणानि[2]।

दृष्टोडुलोमेषु मयोडुलोमे[3] श्रीवैरसिंहादिषु रुद्रभक्तिः।
अपार्थिवा सा त्वयि पार्थिवी यां नौत्सौदपान्योऽपि न वर्णयन्ति[4] ॥ १ ॥
आनुष्टुभचैष्टुभकाकुभैर्यं पाङ्क्तौष्णिहैर्बार्हतजागतैश्च[5]।
स्तुवन्ति राथंतरभाल्लकीयमाध्यंदिनाः सोऽर्हणयादृतस्ते[6] ॥ २ ॥
कस्तारुण्यस्तालुनबाष्कयौ वा सौवष्कयिर्वा हृदये करोति।
विलासिनोर्वीपतिना कलौ यद्युलोकि लोकेऽत्र मृगाङ्कमौलिः[7] ॥ ३ ॥
न भारतेनेचि न कौरवेण नैन्द्रावसानेन न सात्वतेन।
पाञ्चालमाहानदवैनदैर्नो नौग्रीनरेणाद्य यथा त्वयेशः[8] ॥ ४ ॥
सौवर्णमुर्व्यादि तथा न दत्त्वा[9] न धेनवं जानपदं द्विजेभ्यः।
न वैकरं रत्नचयं विकीर्य त्वमीशमालोक्य यथाद्रुतोऽभूः ॥ ५ ॥
न माहतीमृद्धिमवैमि माहाप्राणी न को जल्पति बार्हतीयम्[10]।
भक्त्येह योऽभ्यर्चति रुद्रमौदस्थानं तमभ्येति जनं[11] जयश्रीः ॥ ६ ॥

---

१ Hem. omits महित, but remarks on महिमत्: महिदित्यपि केचित्.

२ D. om. to यथासंभवमुदा; cf. last page, note ५.

३ मयोडुलोमे C. F.; मयौडलोमे D.

४ ? या नानौस्त्यौद° दर्शयति D.; नौस्त्यौदीपान्यो° B.; नौस्योद° पि वर्णयंति C.; नास्त्यौदपान्यो° F.

५ आनुष्टुभं काकुलधैर्य पांक्तौ मनोष्णि° C.; पांक्तोष्णि° F.; °य पांक्तौ° D.

६ °याहृतस्ते F. & corr. D.; °याहृतास्ते C.; °याहृतस्तौ K.

७ विलासिनोर्वापतिन° B. C. K.; विसेलाश्निोर्वा° नृमृगांक° D.; °प्रमृगांक° C. F. K.

८ यथो त्वयेशः B. C. K.; यथान्वयेशः D.

९ तथानर्हैत्वा° D.

१० न साहती वृतद्विमषवैमि° नाहतीयं D.; माहप्राणी° B. C. K.

११ जने B. D. K.; मुदं C.

माहानसोऽग्निः पचतेऽन्नजातं ग्रैष्मं महः पैलुकुणं गृणन्ति[1]।
वृषाङ्कभक्तोऽर्हति वार्षदंशान् भेत्तुं[2] विभिन्ना हि पदार्थशक्तिः ॥ ७ ॥
॥ २५६ ॥ इत्युत्सादिः ॥

भिक्षाखण्डिकदक्षिणायुवतयो धर्मी[3] सहस्रो युगं
क्षेत्रं श्वा हलबन्धभिक्षुकशुकोलूकाः पदातिः पुनः।
अङ्गारो वडबाऽथ पङ्क्तिरहोऽथर्वा करीषं तथा
चर्मी चर्म च[4] गर्भिणी युगवत्सा स्याद्वत्सा तथा ॥ २५७ ॥

भिक्षादेरित्यनेन षष्ठ्यन्तात्समूहेऽण्प्रत्ययो भवति ॥ * ॥ भिक्षाणां समूहः। भैक्षम्। यथा श्रीसागरचन्द्रस्य[5]।

अकल्पितप्राणसमासमागमा
मलीमसाङ्गा धृतभैक्षवृत्तयः।
निर्ग्रन्थतां त्वत्परिपन्थिनो गता
जगत्पते किंतु जिनावलम्बिनः[6] ॥ * ॥

खण्डिकानां[7] कलायानाम्। खाण्डिकम् ॥ * ॥ दक्षिणानाम्। दाक्षिणम् ॥ * ॥ यौवनम्। युवतिपाठः पुंवद्भावबाधनार्थः। अत्र पाठश्चन्द्राचार्याद्यभिप्रायेण[8]। वस्तुतस्तु तद्धितोत्पत्तेः प्रागेव पुंवद्भावेन भवितव्यम्। ततो युवतीनां समूहो यौवनम्। यथा।

---

१ पवने च जातग्रैष्मं महः पैलुकुणंति D.; ग्रैष्ममहः against metre B. C.
२ वार्षदंशात् D. F.; भोक्तुं D.
३ वर्मी F.
४ वर्मी चर्म चं० C. D.; A. om. text and comment.
५ यथा सगराचंद्रस्य D.
६ किंतु जनावलंबिनः D.
७ Yajñ. & Kâś. V. ed. read खण्डिका; Bö., Hem., K. V. *a.* खण्डिक.
८ °पाठः खंडवार्याद्य° D.

सरूपमतिनेपथ्यं[1] कलाकुशलयौवनम् ।
यस्य पुण्यकृतः प्रेष्यं सफलं तस्य यौवनम्[2] ॥

यत उक्तं भाष्यकृता[3] । भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात्प्रत्ययविधाविति ॥ * ॥ धार्मिणम्[4] ॥ ब्रह्मादिपाठान्नोऽनङो व्ये शित्प्रणादावित्यनेन सुङ्[5] ॥ * ॥ साहस्रम् ॥ * ॥ यौगम् ॥ * ॥ चैत्रम् ॥ * ॥ शौवनम् । शकटाङ्गजस्तु श्वखलादिभ्योऽञ्निनित्यत्र श्वादेरञ्वचनम्[6] । शुनां समूहः शौवम् । दण्डिनां दाण्डम् । चक्रिणां चाक्रमित्यादिषु नो पदस्येति लोपार्थमिति मन्यते ॥ * ॥ हालम् । पाशादिपाठाद्[7] हल्या ॥ * ॥ बान्धम् ॥ हलबन्ध इत्यन्यः[8] ॥ * ॥ भैक्षुकम् ॥ * ॥ शौकम् ॥ * ॥ औलूकम् । यञन्तो[9] बह्वपत्यवाची शुका निर्दिश्यते । तस्येह पाठादपत्यलक्षणोऽकञ्[10] न भवति ॥ * ॥ पादातम् ॥ * ॥ आङ्गारम् । पाशादिपाठाद्[11] अङ्गार्या ॥ * ॥ वाडवम् ॥ * ॥ पाङ्कतम् ॥ * ॥ अङ्काम् । आङ्कम् ॥ * ॥ अथर्वा नामर्षिः । तत्प्रयुक्ता मन्त्रा अथर्वाण उपचारात्तेषाम् आथर्वणम् ॥ * ॥ कारी-

---

१ Thus Hem. on vi. 2, 10 where the śloka is quoted; सुरूपपमितिनेपथ्यं B. C. F. K.; स्वरूपमपि नोपथ्यं० D.

२ पुण्यवतः० B.C.F.K.; जीवितं । F.

३ Mbh. on P. iv. 2, 38.

४ वार्मिणं B. C. F. K.; Hem. has वर्मन् । वर्मिन् instead; Kâś. V. ed. धर्मिन् *var. l.* धर्मन् (MS. *a.* वर्मन्); om. Bö., Yajñ.

५ ?०व्ये मित्पणादावि० B.C.K.; सित्पण० शुक् । F.; वे सित्पणीदा० शुक् D.—Cf. Pâṇ. vi. 4, 144-8 (वे = 146-8); 167; above p. 254, l. 14.

६ Hem. vi. 2, 26 also has a special *gaṇa* श्वादि, in which श्वन् । अहन् । दण्डिन् । वर्मिन् (!) are enumerated [शुनां समूहः शौवं । etc.].

७ See śloka 260.

८ Hem. has them both separate and combined; the others only combined.

९ Cf. *gargâdi*, śl. 247.

१० °लक्षणाकञ् B.; ऽकञ्च D.; ऽन्कञ F.; B.C.D. om. न.—औलूक्यशब्दस्य (!) गोत्राकञो बाधनार्थः पाठः । Hem.; cf. P. iv. 2, 39.

११ Cf. śl. 259.

षम् ॥ *॥ चार्मिणम् ॥ चार्मणम् । चार्ममित्यन्यः[1] ॥ * ॥ गर्भिण्यः चेचभक्तयः । तासां गार्भिणम् ॥ * ॥ यौगवरत्नम् ॥ * ॥ वारत्नम् ॥ * ॥

क्षुद्रकाणां क्षत्रियाणां मालवानां चापत्यानि । राष्ट्राख्याद्राज्ञो ऽञेवेत्यञ् तस्य क्षुचि । क्षुद्रकाश्च मालवाश्च क्षुद्रकमालवाः[2] । ततो ऽपत्याकञो बाधनार्थं सेनासंज्ञायां भिक्षादिपाठादञ्विधिः । क्षौद्रकमालवी सेना । अन्यच्च क्षौद्रकमालवकम् ॥ * ॥ भिक्षुकवडवाशुकपदातिप्रभृतयश्चिक्काष्टादिप्रतिमावृत्तयो गणपाठं प्रयोजयन्ति ॥ २५७ ॥ इति भिक्षादिः[3] ॥

केदाराजौ राजराजन्यवत्सा उष्ट्रोरभ्रौ वृद्धयुक्तो मनुष्यः।
उक्षा ज्ञेयो राजपुत्रस्तथेह केदारादौ वामनाचार्यदृष्टे[4] ॥ २५८ ॥

अपत्यकेदारेभ्योऽकञित्यनेनापत्यान्तात् केदारादेश्चाकञ् भवति ॥ * ॥ केदाराणां समूहः । कैदारकम् ॥ कैदार्यमित्यपि ॥ * ॥ आजकम् ॥ * ॥ राजकम् ॥ * ॥ राजन्यकम् ॥ * ॥ वात्सकम् । यथा धनंजयस्य ।

समं क्षिपन्तः शुकसारिकाभिर्
विपाशिता वल्गुशिशुं शशंसुः[5] ।
निर्मोचमाणं सह धेनुकेन
गृहे गृहे वात्सकमभ्यनन्दत् ॥

---

१ C. thrice वा°; F. K. चा°; B. D. doubtful.—Bö., Hem., Kâś. V. ed. both चर्मन् & (*v. l.* Bö., K. V.) चर्मिन्; Yajñ. चर्मन् only.

२ क्षुद्रिकाश्च° F. K.; क्षौद्रकमालवाः D.—Cf. Kâś. V. iv. 2, 45.

३ This *gaṇa* includes both *bhikshâdi* to Pân. iv. 2, 38, and *khaṇḍikâdi* to iv. 2, 45.

४ A. om. text and comment.—Cf. Pân. iv. 2, 39-40; Hem. vi. 2, 12-13.

५ शुकसारिकादिभिर्° B. C. F. K.; सुकुमारिकाभिः विपारि । ता वल्गुशिसु शशंसुः D.

औष्ट्रकम् । लोलौष्टमौष्ट्रकमुद्ग्रमुखं तरूणाम्
अभ्रंलिहानि लिलिहे नवपल्लवानि[1] ॥
औरभ्रकम् । क्रीत्वौरभ्रकमिदमाजकं च वीथ्याम् ॥
वार्ङ्कम् ॥ * ॥ मानुष्यकम् ॥ * ॥ औच्चकम् ।
रोमन्थमन्थरचलद्गुरुसास्रमासां-
चक्रे निमीलदलसेक्षणमौच्चकेण[2] ॥ * ॥
राजपुच्चकम् ॥ २५८ ॥ इति केदारादिः ॥

पाशधूमतृणाङ्गाराः पिटाकः पिटको वनम्[3] ।
गोरथौ शकटं वातः खलपोतौ गलो नडः ॥ २५९ ॥

खलपाशादिभ्यां लिन्ल्यावित्यनेन खलादेः पाशादेश्च लिन्ल्यौ[4] क्रमेण भवतः ॥ * ॥ पाशानां समूहः । पाश्या ॥ * ॥ धूम्या ॥ * ॥ तृण्या ॥ * ॥ अङ्गार्या । भिक्षादिपाठादणपि । आङ्गारम् ॥ * ॥ पिटाकपिटकौ वंशदलादिमये भाण्डे । पिटाक्या पिटक्या ॥ * ॥ वन्या[5] ॥ * ॥ गव्या । स्त्रीलिङ्गार्थमस्य पाठः । यप्रत्ययस्तु गोर्योऽजादेरित्यनेनैव[6] सिद्धः ॥ * ॥ रथ्या ।

स्नेहाद्वहन्ती चणमुत्कटाक्षा
वेश्येव शल्यं हृदये दधाना ।
उच्चाल्यमाना तुरगैः परैश्च
स्थानादिरोधेन चचाल रथ्या[7] ॥

---

१ Śiśup. 5, 65.

२ Śiśup. 5, 62.

३ धनं D. E.; °तृणांगारथौ शकटं° B. C. (the missing words are supplied by K. in the margin); A. om. text and comment.

४ The two corresponding sûtras of Hem. are vi. 2, 25: पाशादेश्च ल्यः ॥ 27: खलादिभ्यो लिन् ॥ (लकारः स्त्रीत्वार्थः).

५ धन्या D. (cf. n. 3).—The other works have वन.

६ Cf. P. iv. 1, 85, vârtt. 9.

७ उच्चाल्यमानस्तुर° B. C. K.; D. om. from [स्नेहाद्वहती] चणमु° to तव सैन्य [संनिवेशः] in the com. on śl. 260.

गोचारथक्रक्येत्यनेन[1] गोचा । रथकक्या ॥ * ॥ शकक्या ॥ * ॥ वात्या ॥ * ॥ खलानां पिण्याकानां धान्यमर्दनभूमीनां दुर्जनानां च समूहः । खल्या ॥ * ॥ पोत्या । प्रवहणसंघातः ॥ * ॥ गल्लो मत्स्यबन्धनविशेषः । गल्या ॥ * ॥ नड्या । तृणसंघातः[2] ॥ २५९ ॥

हलं जनः पटाकश्च ज्ञेयः पोटगलो ऽपरैः ।
खलोकौ कुन्दुमो[3] ऽन्येऽपि स्युः खलादौ प्रयोगतः ॥ २६० ॥

हल्या । भिचादिपाठाद् हालम् ॥ * ॥ जन्या । ग्रामादिसूत्रेण[4] जनतेति च । प्रयोगद्वयं वामनमतेन ॥ * ॥ पटाक्या । वैजयन्तीसमूहः ॥ * ॥ पोटेन संश्लेषेण गलति । पोटगलः । काशो नडश्च । पोटगल्या । अपरैरिति शाकटायनप्रभृतिभिः ॥ * ॥ इति पाशादिः ॥

खलानां समूहः । खलिनी । खल्या ऽपि ॥ * ॥ ऊककुन्दुमौ निचयार्थौ[5] । ऊकिनी[6] । कुन्दुमिनी ॥

यच्चैतास्तिलखलिनीशृणोकिनीभिः[7]
शिप्रायास्तटमनु शालिकुन्दुमिन्यः ।

---

१ गोचरथ° B. C. K.; cf. Pâṇ. iv. 2, 51.

२ नल्या° B.; C. K. om. from गला; D. see note ७, last page.—Hem. has नल; Bö., Yajñ. नट.

३ कुंद्मो B. C. K.—A. om. text and comment; E. om. this śloka (but see हल्या p. 305, l. 9); D. see note ७, last page.

४ Cf. P. iv. 2, 43.

५ निश्चयार्थौ F.; C. & orig. K. om. from ऊककुन्दुम; K. supplies ओककुंदमौ (?) निचयार्थौ.

६ K. corr. ओकिनी (?).—Hem. has likewise ऊक & कुंदुम; Bö., Kâś. V. डाकिनी (Bö., *var. l.* डूकिनी) & कुदुम्बिनी । कुण्डलिनी ।

७ °तिलखलिनीभिः B. C. & orig. K.; after which K. supplies शिप्राकिनी; °खलिनीशृणोकिनी सासि प्रायास्तटमनु° F.; (? °तृणोकिनी°); for D. see last page, n. ७.

गोत्रावानिह[1] तव सैन्यसंनिवेशः
सार्धं ग्रामतय ऋतीयते[2] ऽत्र देशे ॥

अन्येऽपीति कुलटाप्रभृतयो द्रष्टव्याः ॥ * ॥ इति खलादिः ॥ २६० ॥

तालो धनुषि पीयूक्षा कण्टकारी[3] चिकण्टकः ।
श्यामाकपाटलाकाण्डा[4] गोधूमेन्द्राविशाविमौ[5] ॥ २६१ ॥

तालादेरित्यनेन तालादेर्गणात्षष्ठ्यन्तादिकारावयवयोरर्थयोरण् एव भवति ॥ * ॥ तालस्य विकारः । तालं धनुः । तालमयमन्यत् ॥ * ॥ पीलुवाची पीयूचन्निति[6] चपणकः । पीयूचायाः पैयूचम् ॥ * ॥ काण्टकारम् ॥ * ॥ चैकण्टकम् ॥ * ॥ श्यामाकस्यौषधिविशेषस्य । श्यामाको यवागूः ॥ * ॥ पाटला वृक्षः । तस्याः पाटलम् ॥ पाटलिरिति भोजः । 'पाटलीत्यन्यः[7] ॥ * ॥ काण्डं भस्म ॥ * ॥ गौधूमः ॥ * ॥ इन्द्राविशस्य वनस्पतिविशेषस्य । ऐन्द्राविशः[8] ॥ २६१ ॥

बर्हिणेन्द्रालिशौ मुञ्जो बिल्ववेणुगवेधुकाः ।
कुटीव्रीहिकपासीकर्कन्धूशिंशपेक्षवः[9] ॥ २६२ ॥

---

१ ? गोत्राव्यानिह F.; मोत्रावानिह B.—? गोत्रावानिव.

२ ? Suggested by Prof. Stenzler; सार्धग्रामतया° B. C. F. K.; कतीयते K.; सार्धं ग्रामतया ऋतीयते D.—Prof. Aufrecht prop. सार्थग्रामगतय ईक्ष्यते.

३ Thus all MSS.; the other works have कण्टकार.

४ श्यामक° B.C.F.K. (not in comm.); यमाकः पाटुला कांडो D.; श्यामाकपाटलीकांडा E.

५ °मेंद्रादृशा° E.; °मेंद्रादिशा° D.

६ पीयुचन्निति D.—Bö., Yajñ. have पीयूचा; Kâś. V. ed., पीयुचा.—पीयूचा पीलुद्रुमः तद्विकारः पैयूचमिति वर्द्धमानः ॥ चापपीयूचेत्येकः शब्द इति तत्त्वबोधिनीस्वारस्यम् ॥ Yajñ.

७ पाटली वृक्षस्यास्याः पाटलो (om. the rest) D.—Bö., Kâś. V., Hem. पाटली; Yajñ. पाटलि.

८ इंद्रादिशस्य° ऐंद्रादिशः D.—Bö., Kâś. V. have इन्द्रादृश and इन्द्रालिश (Bö. *var. l.* इन्द्रासिश); Yajñ. इंद्रादृश and इंद्राविश.

९ °कर्कंधु° D.; कर्व्वंधुशिंशपेक्षवः E.; °शिंशिपेक्षवः F.—A. om. text & comm.

बार्हिणम्[१] ॥ * ॥ इन्द्रालिङ्गस्य वनस्पतिविशेषस्य । ऐन्द्रालिङ्गः[२] । ॥ * ॥ मुञ्जस्य विकारो मौञ्जी । यथा ।

पिशङ्गमौञ्जीयुजमर्जुनच्छविम्[३] ॥

बैल्वः ॥ * ॥ वैणवः ॥ * ॥ गवेधुका । ओषधिः । तस्या गावेधुकः ॥ * ॥ कौटीरः ॥ * ॥ त्रैहः ॥ * ॥ कार्पासः ॥ * ॥ कार्कन्धवः ॥ * ॥ शांशपः[४] ॥ * ॥ ऐक्षवः ॥ २६२ ॥

चयखदिरमसूरान्[५] सीसकंसौ शिरीषं
रजतचमरलोहान् पीतदारुं पलाशम् ।
अपि च वचकरीरेन्द्रायुधस्पन्दनानि[६]
शृणु तदनु यवासोदुम्बरं तीव्रदारुम्[७] ॥ २६३ ॥

चायः[८] ॥ * ॥ खादिरः ॥ * ॥ मासूरः ॥ * ॥ सैसः ॥ * ॥ कांसः ॥ * ॥ शैरीषः ॥ * ॥ राजतः कलशः ॥ * ॥ चामरम् ॥ * ॥ लौहः ॥ * ॥ पैतदारवः ॥ * ॥ पालाशः ॥ * ॥ वचस्य वंशविशेषस्य । वाचः[९] ॥ * ॥ कारीरः ॥ * ॥ इन्द्रायुधस्य वनस्पतिविशेषस्य[१०] । ऐन्द्रायुधः ॥ * ॥ स्यान्दनः[११] ॥ * ॥

---

१ All MSS. read वर्हिण in text.—Bö., Hem. बार्हिण; Yajñ., Kâś. V. ed. बार्हिण, MS. *a.* वर्हिण.—[वर्हिणोऽवयवो बार्हिणं मयूरपुच्छम् तद्विकारो बार्हिणः Yajñ.]

२ इंद्राविशस्य° ऐंद्रादिलिशः(!) D.

३ Śiśup. 1, 6.

४ शौंशयः D.; शैंशिपः F.

५ चपखदिर° B. C. D. K.

६ °स्यंदनानि? some MSS.

७ Thus F.; चीत्रदारुं B. C. E. K.; चीत्रदारिं D.—A. om. text and comm.

८ चापः MSS.—चय Bö.; चाप (*v.l.* चर्म) Kâś. V. ed. (वाम MS. *a.*); चाप [चापं धनुः । चापी कोटिः । चयेति क्वचित्पाठः] Yajñ.

९ Not given by the other works.

१० वनविशेषस्य D.—इन्द्रायुधं वनस्पतिविशेष इति वर्द्धमानः शक्रधनुरित्यन्ये । Yajñ.

११ स्यन्दन Bö., Kâś. V. *a.*; स्यन्दन Kâś. V. ed., Yajñ. [स्यंदनस्यावयवः स्यांदनं रथांगम् Y.].—Cf. Aufrecht's Rigveda, preface, p. v.

यावासः ॥ * ॥ औदुम्बरः ॥ * ॥ तैन्नदारवः[1]। श्लेष्मातकवृक्षविशेषवाची नीन्नदारुरित्यन्यः[2] ॥ २६३ ॥

विकङ्कतश्च पूलासो[3] रोहीतकविभीतकौ।
व्याघ्रकाञ्चनमर्थे स्याद्विकारेऽवयवे तथा ॥ २६४ ॥

वैकङ्कतः ॥ * ॥ पौलासः[4] ॥ * ॥ रौहीतकः ॥ * ॥ वैभीतकः ॥ * ॥ वैयाघ्रं चर्म ॥ * ॥ काञ्चनस्य विकारः। काञ्चनम्। यथा।

स काञ्चने यत्र मुनेरनुज्ञया
नवाम्बुदश्यामतनुर्न्यवित्तत[5]।

यथा वा। काञ्चनेन किमिवास्य पत्रिणा
केवलं न सहते विलङ्घनम्[6]।

ये तु नाधीयते तेऽभेदोपचारादेवाच्च काञ्चनशब्दः काञ्चनविकारे प्रयुक्त इति समर्थयन्ति ॥ * ॥ तालादीनामादिवृद्धिमतां नित्यं मयटि प्राप्ते तदन्येषां तु विकल्पितेऽस्वचनम्। अन्यमते स्वरश्च प्रयोजनम् ॥ तालादिषु हेमशब्दो[7] द्रष्टव्य इति केषांचिन्मतम्। तथा च। तदण्ड-

---

१ ? Thus F.; वैत्रदारवः B. C. D. K.

२ ? नात्रदारु° C.; तीत्रदारु° F.; श्लेष्मातकः। वृच° तीप्रदारव इत्यन्यः D.—Bö., Yajñ., K. V. तीव्रदारु; MS. Hem. नीवुदार [cf. नीव Gobh. i. 5, 15].

३ पूलाशो B. C. D. F. K.—A. om. text and comment.

४ पौलाशः B. C. D. F. K.—पूलाक Bö.; पुलाकस्तुच्छधान्यम् पौलाकम्। पूलाक इत्यन्ये। पूलास इति पाठे पूलासो ग्रामविशेषस्तस्यैकदेशः पौलासः। Yajñ.; om. K. V., Hem.

५ Śiśup. 1, 19 (श्यामवपुर्न्यवित्तत ed. Calc. S. 1769; °वपुर्न्यवीत्तत ed. Calc. 1815).

६ Kirât. 13, 55.

७ हेमन् Hem., cf. next page, n. ११. —The others do not give the word.

मभवद्धैममिति[१] पुराणादौ। पादेन हैमं विलिलेख पीठमिति[२] कालिदासस्य। समुद्रोपत्यका हैमीति भट्टेः[३]। अणि हि प्रकृतिभावे सति हैमनमिति स्यात्। न च वाच्यम् अकारान्त एवायमिति। हेम्नः संलक्ष्यते ह्यग्राविति[४] कालिदासस्य॥

येषामशेषभुवनाभरणस्य हेम्नस्
तत्त्वं विवेक्तुमुपलाः परमं प्रमाणम्।

इति च भलूटस्य[५] प्रयोगे नकारान्तस्यैवोपलब्धेः। न च मुनित्रयेण साक्षादननुमतमित्येतावतोपेक्षापेक्षमेतदिति सुवचं बकुतरलक्ष्यप्रसङ्गात्[६]। तथा हि। त्रिफलेत्यजादिषु मुनित्रयेण साक्षादननुमतमित्यप्यभ्युपगतमेव[७]। अङ्गगात्रकण्ठेभ्यश्चेत्येतदपि मुनित्रयाप्रदर्शितमपि शिष्टैरिष्टमेव॥ शाकटायनोऽपि हेमादिभ्योऽञित्यनेनाञ्विधानमन्याजादिसुगर्थमाह[८]। तेन हैमं सारसनं[९] हैमी यष्टिरिति सिद्धम्। सहृदयचक्रवर्तिना वामनेन तु हेम्न इति सूत्रेण विकारेऽर्थेऽन्याजादेर्लुक् कृत एव। अण् हेमार्थादित्यत्र मानव्यां वृत्तौ हैमी हेममयी रशनेत्युदाहृतं च[१०]॥ २६४॥ इति तालादिः[११]॥

---

१ Manu 1, 9.

२ Raghuv. vi. 15.

३ Bhaṭṭik. 5, 89.

४ Raghuv. 1, 10.

५ Thus B. C. F. K.; भद्दस्य D.; (? भल्लट).

६ सुवचबकुतरलक्ष्यप्रसंगा D.

७ साक्षादनुमत° D.

८ हेमादिभ्यो विधानमंत्यजादि° C.; हेमादिभ्यो त्रिधान° K.; हेमादिभ्यो ऽदित्यनेना° D.

९ हैममासनं D.

१० मानव्या वृत्तौ° B. C. K.; °रसने° B. C. F. K.; D. om. fr. [वि]कारेऽर्थे°.

११ Vardhamâna's *tâlâdi* includes *tâlâdi* to P. iv. 3, 152; *rajatâdi* ib. 159; *palâṣâdi* ib. 141; and *bilvâdi* ib. 136.—Hem. (vi. 2, 44) has only a gaṇa *hemâdi*, corresponding on the whole to *rajatâdi*, the other gaṇas being rendered unnecessary by general rules (vi. 2, 30-32).

शरदर्भकुटीसोमा भवेतां तृणबल्वजौ[1]।
स्तो राजन्यात्मकामेयौ वैकर्णश्च वसातिना ॥ २६५ ॥

शराद्येकाजप्राणिन्येवेत्यनेन[2] मयट् ॥ * ॥ शराणां विकारोऽवयवो वा। शरमयम् ॥ * ॥ दर्भमयम् ॥ * ॥ कुटीमयम् ॥ * ॥ सोममयम् ॥ * ॥ तृणमयम् ॥ * ॥ बल्वजमयम्[3] ॥ * ॥

येषां शरमयीर्दर्भमयीस्तृणमयीः कुटीः[4]।
कुटीमयीः सोममयीस्ता बल्वजमयीः स्तुमः[5] ॥

इति शरादिः ॥ * ॥

राजन्यभौरिक्ष्वैषुकार्यादिभ्योऽकञ्विधभक्ता इत्यनेन तस्य राष्ट्रमित्यर्थे राजन्यादेरकञ् भौरिक्ष्यादेर्विध ऐषुकार्यादेर्भक्त एते प्रत्ययाः क्रमेण भवन्ति ॥ * ॥ राजन्यानां जनपदः। राजन्यकः ॥ पीठमर्दराजवयस्येषु रूढो राजन्यशब्द इत्यन्यः ॥ * ॥ आत्मकामेयकः ॥ * ॥ वैकर्णकः। विकर्ण इत्यन्यः[6] ॥ * ॥ वासातकः। अत्रास्य पाठानङ्गीकारादासातमित्यन्यः[7] ॥ २६५ ॥

---

१ °बिल्वजौ B. C.; D. om. from शर° to राजन्या; A. om. text and comment.

२ °काजजप्राणित्यच इत्यनेन D.; °प्राणित्यवयव इत्यनेन F.; °प्राणित्पव इत्यनेन K.

३ D. om. from शराणां to येषां.

४ येषां शरमयी दर्भमयी तृणमयी कुटीः F. K.; ॥ शरारमयोर्दर्भमयी हुदीः D.; तृणमयी° B. C.; C. om. कुटीः.

५ कुटीमयी सोममयीस्ता बल्वजमयी (बि° C.) स्तुमः B. C. F. K.; कुटीमयी। सोममयी। स्ता बल्वजमयीः स्तुमः D.

६ The other works have neither word.

७ Hem. has a special sûtra (vi. 2, 61) for this word: वसातेर्वा ॥° वासातकं। वासातं ॥ The other works include it in the gaṇa *rājanyādi*.

बाभ्रव्यानृतदेवयातवयुतो दाक्षायणो वातवस्
तीव्रोदुम्बरमालवार्जुनफणः[1] पुत्रो ऽम्बरीषात्परः ।
शालङ्कायनदाक्षितेलुकलितौ वैराटशैलूषकौ[2]
चैगर्तश्च वसानवैल्ववनकौ स्यात्संप्रियस्तैल्वलः[3] ॥ २६६ ॥

बाभ्रवकम् ॥ * ॥ आनृतस्य[4] । आनृतकः । आवृत[5] इत्यन्यः ॥ * ॥ दैवयातवकः । दैवयातव[6] इत्यन्ये । देवयात[7] इत्यपरे ॥ * ॥ दाक्षायणकः ॥ * ॥ वतोरपत्यं वातवः । तस्य वातवकः[8] । वाक्षव इत्यन्यः[9] ॥ * ॥ तीव्रस्य तैव्रकः । अस्य पाठो वामनमतेन[10] ॥ * ॥ औदुम्बरकः । औदुम्बर इत्यन्यः[11] ॥ * ॥ मालवस्य राज्ञः । मालवकः ॥ * ॥ अर्जुनफण[12] इति । आर्जुनायन इत्यर्थः । तस्य । आर्जुनायनकः ॥ * ॥ आम्बरीषपुत्रकः ॥ * ॥ शालङ्कायनकः ॥ * ॥ दाक्षकः ॥ * ॥ तेलोः । तैलवकः । अस्य पाठो वामनमतेन[13] ॥ * ॥ वैराटको राजा । वि-

---

१ तीव्रौदुंवर° D. E.; °वार्जुनपणः B. C. D.; °यणः F.

२ विराट° C.; °शूलूषकौ D.

३ सांप्रियस्तैल्वलः B. K.; सांप्रियस्तौल्वलः C.; सांप्रिया वैल्वलः E.; संप्रियास्तैल्वलः D.; संप्रियस्तैल्वजः F.—A. om. text and comment.

४ ? आनृतस्य B. C. K.—आनृत Bö.; अनृतस्य आनृतकः । अचानृतशब्दस्तद्वति वर्तते लक्षणया ॥ Yajñ.; आवृत । आवृतं [क suppl.; ? आनृत] Hem.; om. Kâṣ. V. (*v.l.* आप्रीत).—Bö. (*v.l.*), K.V. ed. also अव्रीड (Yajñ. व्रीडा!).

५ आवृत्त C. K.; आवृतक D.; आनृत F.

६ दैवव्यातव C.; देवयातव B.; देवयायातवक D.

७ दैवयात° C. D. F.—Bö., Yajñ., K. V. have देवयात (Bö., *v. l.* दैवयातव); Hem. देवयात & देवयातव.

८ ? वातोरपत्यं° B. F. K.; वातकः D.; दातोर° दातव° दातवकः C. (? वतु = वतू).

९ चाचत° K.; दाव इत्यन्यः C.; om. D.—Hem. has वाचव; K. V. ed. *var. l.* वाचक; om. Bö., Yajñ.

१० अन्यपाठो° B.—तीव्र Bö., Yajñ.; om. Kâṣ. V., Hem.

११ Hem. has both forms; the others उदुम्बर only.—C. om. from तीव्रस्य.

१२ अर्ज्जुनपण B. C. D.; °यण F.

१३ तेलु Bö., Yajñ.; om. K. V., Hem.

राट[1] इत्यन्यः ॥ * ॥ शैलूषकः । शैलूषज इति दिग्वासाः[2] ॥ * ॥ चैगर्तकः । चिगर्त[3] इत्यन्यः ॥ * ॥ वासानकः ॥ * ॥ बिल्ववने भवो जातो वा । बैल्ववनः । तस्य बैल्ववनकः ॥ शैलूषबैल्ववनशब्दौ सूत्रे कप्रत्ययान्तौ निर्दिष्टौ ॥ * ॥ सांप्रियकः[4] ॥ संप्रिया दात्री च नाम्ना[5] स्त्री पुरुषो वा राजा । तस्य सांप्रियकः । दात्रक इति तु वामनः ॥ * ॥ तैल्वलकः । बैल्वल[6] इत्यन्यः ॥

आकृतिगणोऽयम् । तेन जालंधरायणः । और्णनाभः । जालंधरः । कौत्तालप्रभृतयो[7] द्रष्टव्याः ॥ २६६ ॥ इति राजन्यादिः ॥

भौरिकिसैकयतावथ चैकयतो[8] भौलिकिश्च काणेयः ।
चौपयतश्चैटयतो[9] वाणिजको वालिकाज्यश्च ॥ २६७ ॥

भौरिकीणां राज्ञां जनपदः । भौरिकिविधम् ॥ विधभक्तप्रत्ययान्तानां स्वभावान्नपुंसकलिङ्गतैव । चन्द्राद्याः पुंस्त्वमपि दर्शयन्ति ॥ * ॥ सैकयतविधम् ॥ * ॥ चैकयतविधम्[10] । चैजयतचौद्यतावित्यपि कश्चित्[11] ॥ * ॥ भौलिकिविधम् ॥ * ॥ काणेयविधम् ॥ * ॥ चौपय-

---

१ विराट् D.; the other works have neither word.

२ MS. Hem. has शैलूषज, the others शैलूष.

३ Thus Hem., om. by the others.

४ ? सांप्रियः C. F. K.; om. B.—The other works have संप्रिय.

५ सप्रियादात्रीनाम्नी D.; °दात्रावनाम्ना C.

६ वैल्वव C.; वैल्वलकः । वैल्वत D.; तैल्वजकः । बैल्वल F.—Bö. has वैल्वज, Yajñ. बैल्वज; Kâś. V. ed. बैल्वल, om. *a.*; Hem. तैतल.

७ जालाधरः कौत्ताल° F.; कौन्नालाप्रभृतयो D.—कौत्ताल° Hem., om. others.

८ वैकयतो B. C. E.; वैयकतो D.

९ °चैटीयतो B. C. K.; °चैटयितो (!) F.; A. om. text and comment.

१० वैकयत° B. C.—The other works have वैकयत; but see śl. 36.

११ चैजयित° C. F. K.; °वौद्यिता° B. C.; चौद्यिता° F. K.; °वौद्यता° D.—MS. Hem. चैतयत and वौद्यत (also वौपयत & वैटयत for चौ° चै°); cf. śl. 231 and 36.

तविधम्[1] ॥ * ॥ चैटयतविधम् ॥ * ॥ वणिजोऽपत्यं वाणिजः । के वाणिजकः । तस्य वाणिजकविधम् ॥ * ॥ वालिकाजस्यापत्यं कुरुकोसलेत्यादिना ण्वुचि[2] । वालिकाज्यः । तस्य वालिकाज्यविधम् ॥ २६७ ॥ इति भौरिक्यादिः ॥

ऐषुकारिः शयण्डश्च सौवीरो वैश्वमानवः[3] ।
दासमित्रिर्नडः शौण्डः शायाण्डो वैश्वधेनवः[4] ॥ २६८ ॥

इषुकारस्यापत्यानि । ऐषुकारयो राजानः । तेषां जनपदः । ऐषुकारिभक्तम् ॥ * ॥ शयण्डभक्तम् । शयाभ्र इत्यपि भोजः[5] ॥ * ॥ सौवीरभक्तम् ॥ * ॥ वैश्वमानवभक्तम् । वैश्वमाणव इत्यन्यः[6] ॥ * ॥ दासमित्रिभक्तम् । दासमित्र इत्यन्यः[7] ॥ * ॥ नडभक्तम् ॥ * ॥ शौण्डभक्तम् ॥ * ॥ शायाण्डभक्तम् । शायाण्डिरित्यन्यः[8] ॥ * ॥ वैश्वधेनवभक्तम्[9] । अन्ये तु वैश्वभक्तं धैनवभक्तमिति[10] पृथगाहुः ॥ २६८ ॥

---

१ चीपयित° B. C.; वी°? D.

२ ण्वि B. C.; ण्वुचि F. and orig. K. (corr. ञ्चि).

३ एषुकारि° C.; विश्वमानवः B. C. K.; वैश्वमाणवः F.

४ सौंडः° E.; सौंद्रः° D.; विश्वधेनवः C.; वैश्वधेनवः F.; A. om. text and comment.

५ इत्यवि श्रीभोजः D.; इत्यन्यः F.—Bö., Kâś. V. ed., Hem. have शयण्ड, see also note ७.

६ वैश्वमाणवक इ° D.—वैश्वमानव Bö.; वैश्वमाणव K. V. ed.; वैश्ववामन Yajñ., om. Hem.

७ The other works have दासमित्र only (besides दासमित्रायण).

८ शयाण्ड and *v.l.* शयाण्डि Bö.; शयांड and शय । ञ्रंड Yajñ.; सायण्डि (शायंडि *a.*) and *v.l.* शयाण्ड K. V. ed.; शयांड, शायांडि and शायंडि Hem.

९ वैश्वधेनवभक्तं F.

१० MS. Hem. विश्व । वैश्व । धेनव २। (*i.e* both separate and combined?).

द्व्यक्षत्र्यक्षौ दासमित्रौडचान्द्राः[१]
खाडः शौद्रो दाक्षिसारस्यजौलाः[२]।
शायण्डोऽथो तार्क्ष्यशौभ्रौ फणन्ता[३]
एते ज्ञेया विश्वतुण्डाच्च देवः ॥ २६९ ॥

द्व्यचायणभक्तम्। त्र्यचायणभक्तम्। गणपाठाद्व्यभावः ॥ द्व्याचायणः। त्र्याचायण इत्यन्यः[४] ॥ * ॥ दासमित्रायणभक्तम् ॥ औडायनभक्तम्[५] ॥ * ॥ चान्द्रायणभक्तम् ॥ * ॥ खाडायनभक्तम्। खादायन[६] इत्यन्यः ॥ * ॥ शौद्रायणभक्तम्। शौद्रकायण[७] इत्यन्ये ॥ * ॥ दाक्षायणभक्तम्। राजन्यादिपाठाद् दाक्षायणकम् ॥ * ॥ सारस्यायनभक्तम्[८] ॥ * ॥ जौलायनभक्तम् ॥ * ॥ शायण्डायनभक्तम् ॥ * ॥ तार्क्ष्यायणभक्तम्[९]। शकटाङ्गजमतेन ॥ * ॥ शौभ्रायणभक्तम्[१०]। चन्द्रमतेन ॥ * ॥ वैश्वदेवभक्तम्[११] ॥ * ॥ तुण्डदेवभक्तम्। अन्ये तु विश्वभक्तं तुण्डभक्तं देवभक्तमित्याहुः[१२] ॥ २६९ ॥ इत्यैषुकार्यादिः ॥

---

१ दासमित्रौंड° B. C. K.; मित्रौदुवांद्राः D.

२ सौद्रो° B. F. K.; दक्षि E.; सौरस्यजौलाः B.C.K.; सारी च जौलाः F.

३ शायांडो E. F. K.; °मुभ्रौ° B. C. D. K.; पणंता B. C. D.; यणांता E.; A. om. text and comment.

४ द्व्याचायण। त्र्याचायण (त्र्यायण K. V. ed.) Bö., Yajñ., K. V.; द्व्यत्र्यायण, द्व्याच्यायण, त्र्यच्यायण, त्र्याच्यायण MS. Hem.

५ औंडायन° B. C. K. (Kâś. V. *a.*) D. see ६.—औडायन Bö., Yajñ., K. V. ed.; औलायन Hem.

६ Thus Hem.; the others खाडायन.—D. om. from द्व्याचायणभक्तं.

७ Thus Hem.; the others शौद्रायण.—B. C. F. K. read सौ° both times.

८ सौरस्यायनभक्तं B. C. K.; सारायणभक्तं F.

९ Thus all works; तार्च्यायणभक्तं D.

१० Thus Bö., Yajñ., K.V.; om. Hem.

११ Thus MSS.

१२ वैश्वदेव। तुंड। देव २। Hem.

नडप्लक्षकपोतेक्षुकाष्ठचिवेचवेतसाः
कृतह्रस्वल्लुचौ क्रुञ्चातक्षाणौ बिल्ववेणु च[1] ॥ २७० ॥

नडादेः कुक् कु[2] इत्यनेन नडादेश्चातुरर्थिकञ्छो[3] भवति ॥ * ॥ नडा अत्र देशे सन्ति। नडकीयः। नड्वल इति च ॥ * ॥ प्लक्षकीयः ॥ * ॥ कपोतकीयः ॥ * ॥ इक्षुकीयः ॥ * ॥ काष्ठकीयः ॥ * ॥ चिभिर्ऋषिभिर्निर्वृत्तं नगरम्[4]। चिकीयम् ॥ * ॥ वेत्रकीयः ॥ * ॥ वेतसकीयः ॥ * ॥ क्रुञ्चकीयः ॥ * ॥ तक्षणा निर्वृत्तस्तक्षणां निवासः। तक्षकीयः ॥ * ॥ बिल्वकीयः ॥ * ॥ वेणुकीयः ॥ * ॥ क्षान्तं केचित्पुंस्युदाहरन्ति। अपरे स्त्रियाम्[5] ॥ २७० ॥ इति नडादिः ॥

अश्मयूथनदद्भशिखोषा वृन्दकन्दगुदकाण्डकुलानि।
मीनगह्वगुडकुण्डलखण्डाः पीनपामनगकोटगुहाश्च[6] ॥ २७१ ॥

रादयोऽश्मादिभ्य इत्यनेनाश्मादिभ्यो[7]ऽष्टादशभ्यो गणेभ्यश्चातुरर्थिका यथायथं र[8] इत्यादयोऽष्टादश प्रत्यया भवन्ति ॥ * ॥ अश्मानोऽत्र देशे सन्ति। अश्मरम् ॥ * ॥ एवं यूथरम्। यूष[9] इत्यन्यः ॥ * ॥ नदरम् ॥ * ॥ दर्भरम् ॥ * ॥ शिखरम्। ज्याट्ले ह्रस्वश्च बऊलमित्यनेन[10]

---

१ A. om. text and comment.

२ Thus D.; ककुस्क्ष B. K.; ककुस्व C.; ककुच्छ F.; cf. P. iv. 2, 91.

३ नडादेस्तत्रास्तीत्यर्थे देशनाम्नि छो D.

४ निवृत्तं° B. C. F.; निवृत्तनगर D.—Hem. reads चि; Bö., Yajñ., and Kâś. V. तृण.

५ D. om. from क्षान्तं.

६ °गुडगुंडलखंडाः° F.; A. om. text and comment.

७ रादयो श्मद्यादित्यनेनाश्मादिभ्यो D.; ?ऽश्माद्यादिभ्य°.

८ तर B. C. F. K.; om. D.

९ ?यूथ B. C. K.; यूथर F.; एवं पूथरा पूथर इ° D.—यूथ Bö., Yajñ.; यूष (*v.l.* यूथ) K. V. ed.; यूथ and यूष Hem.

१० ?Cf. p. 195, l. 3. — ज्याडले ह्र° B. K.; ज्याड्डि ह्र° C.; ज्यादेर्ह्र° F.; व्यादेरस्वश्च° D.

ह्रस्वत्वे सति । ह्रस्वत्वं नेत्यन्यः ॥ * ॥ ऊषरम्[1] ॥ * ॥ वृन्दरम् ॥ * ॥ कन्दरम् ॥ * ॥ गुदरम् ॥ * ॥ काण्डरम् ॥ * ॥ कुलरम् ॥ * ॥ मीनरम् ॥ * ॥ गह्वरम् ॥ * ॥ गुडरम् ॥ * ॥ कुण्डलरम्[2] । वामनमतेन ॥ * ॥ खण्डरम् ॥ * ॥ पीनरम्[3] । वामनमतेन ॥ * ॥ पामरम् ॥ * ॥ नगरम् ॥ * ॥ कोटरम् ॥ * ॥ गुहरम् । ह्रस्वत्वं नेत्यन्यः[4] ॥ २७१ ॥ इत्यश्मादिः ॥

सखिकरवीराशोका वासवसख्यग्निवायुतो दत्तः ।
छगलो गोफिलदत्तौ भल्लः पुरपालवज्राश्च[5] ॥ २७२ ॥

सख्यादेर्ढण् ॥ * ॥ सख्या पुरुषविशेषेण निर्वृत्तम्[6] । साखेयं नगरं मण्डलं वा ॥ * ॥ कारवीरेयम् । वैरेयमित्यन्ये[7] ॥ * ॥ आशोकेयम् ॥ * ॥ वासवदत्तेयम् ॥ * ॥ साखिदत्तेयम् ॥ * ॥ आग्निदत्तेयम् ॥ * ॥ वायुदत्तेयम् ॥ * ॥ छगलो मुनिश्छागलश्च । छागलेयम् ॥ * ॥ गौफिलेयम् । गोभिल इति भोजः[8] ॥ * ॥ दात्तेयम् ॥ * ॥ भाल्लेयम् । अन्यजातिर्भिल्ल इत्यन्यः । भल्लपाल इति समस्तं भोजः[9] ॥ * ॥ पौरेयम् ॥ * ॥ पाल्लेयम् ॥ * ॥ वाज्रेयम् ॥ २७२ ॥

---

१ ऊखरं B. C. K.; D. om. ह्रस्वत्वं नेत्यन्यः.

२ गुंडलरं F.—कुण्डल Bö., Yajñ.; om. Hem., Kâś. V.

३ पीन also Bö., Yajñ.; om. Hem., Kâś. V.

४ D. F. om. from ह्रस्वत्वं.

५ A. om. text and comment.

६ निवृत्तं B. C. F. K. throughout.

७ Cf. next page, note ६.

८ श्रीभोजः D.—गोपिल Bö.; गोफिल । गोपिलेत्यन्ये । गोभिलेति भोजः Yajñ.; गोकिल MS. Hem.; गोहित (*v.l.* गोहिल) K. V. ed.; गोच्चिल MS. *a*.

९ इत्यन्यः । उल्लपाल इत्यन्यः समस्तं श्रीभोजः.—D.—भल्ल । पाल Bö., Yajñ., K. V. (भल्लपाल *v.l.* Bö.); भल्ल & भल्लिपाल Hem.

कदलस्तमालरोहौ सप्तलचक्रौ कुशीरकः सरकः ।
सुरसः सीकरसमलौ[१] सरमसरसचीरचक्रवाकाश्च ॥ २७३ ॥

कादलेयम् ॥ * ॥ तामालेयम् ॥ * ॥ रौहेयम् ॥ * ॥ साप्तलेयम् ॥ * ॥ चाक्रेयम् ॥ * ॥ कौशीरकेयम् । शीरक इत्यन्यः[२] ॥ * ॥ सारकेयम् ॥ * ॥ सौरसेयम् ॥ * ॥ सैकरेयम्[३] । वामनमतेन ॥ * ॥ सामलेयम्[४] ॥ * ॥ सारमेयम्[५] ॥ * ॥ सारसेयम् ॥ * ॥ चैरेयम् । वीर इत्यन्ये[६] ॥ * ॥ चाक्रवाकेयम् ॥

एते सख्यादयः प्रायः पुंविशेषवृत्तयः । ततस्तन्निवासेऽपि ढण् विधेयः ॥ करवीरसीकरचक्राच्छगलप्रभृतयः स्वार्थवृत्तयः । तेषां च तदस्तीत्यर्थे प्रत्ययः ॥ २७३ ॥ इति सख्यादिः ॥

संकाशकश्मीरपचारनासाश्मूडारयूपौ[७] पलितानुनाशौ ।
मन्दारकूटौ दशकोविदारशीर्षाश्मतीर्थाशमडारकुम्भाः ॥ २७४ ॥

संकाशादेर्ण्यः ॥ * ॥ संकाशेन राज्ञा निर्वृत्तम्[८] । सांकाश्यम् ॥ * ॥ काश्मीर्यम् ॥ * ॥ पाचार्यम्[९] । वामनमतेन ॥ * ॥ नास्यम्[१०] ॥ * ॥ चौडार्यम् ॥ * ॥ यूपा अस्मिन्सन्ति । यौप्यम् ॥ * ॥ पालित्यम् ॥ * ॥

---

१ सीकरसकलौ B. K.; सीरकसकलौ° F.; सुरसकलौ C.; E. om. this śloka; A. om. text and comment.

२ कौशीरकेयं° B. C. F. K.; शारक° इत्य° C.; कुशीरक इत्य° F.—कुशीरक Bö., Yajñ.; कुसीरक & सीरक (for सीकर) Hem.; उशीर *v.l.* K. V. ed.

३ सैरकेयं B. C. F. K.—सीरक Hem.; सीहर Bö., Yajñ. (शीहर *var. l.* Bö.); सीकर K. V. ed. (थीकर *a.*).

४ साकलेयं B. C. F. K.—समल all works.

५ समर Bö., Yajñ.; सरम Hem.; om. K. V.

६ ?वैरेयं° MSS.; D. om. from वीर·—Hem. has वीर and चीर; Bö., Yajñ. वीर; om. Kâś. V.; cf. preceding page, l. 10.

७ °नाशाश्मूडा° B. C. F. K.; A. om. text and comment.

८ Cf. preceding page, note ६.

९ Not in the other works.

१० नाश्यं B. C. F. K.

आनुनाश्यम् । वामनमतेन ॥ * ॥ मन्दाराणामदूरभवम् । मान्दार्यम् ॥ * ॥ कौट्यम् । कुट इत्यन्यः[1] ॥ * ॥ दशस्य । दाश्यम् ॥ * ॥ कौविदार्यम् ॥ * ॥ शैर्ष्यम् ॥ * ॥ आश्मन्यम् ॥ * ॥ तैर्थ्यम् ॥ * ॥ आंश्यम्[2] ॥ * ॥ माडार्यम् । मजार इत्यन्यः[3] ॥ * ॥ कौम्भ्यम् ॥ २७४ ॥

नाशिकासरकसूरचिरन्ताः[4] कम्पिलः समलखण्डितसीराः[5]।
पञ्जरप्रगदिनाथनलाङ्गा रोमलोमपुलिना मगदी च ॥ २७५ ॥

नाशिका नाम राक्षसी । तस्या निवासस्तया निर्वृत्तं वा । नाशिक्यम्[6] ॥ * ॥ सारक्यम् ॥ * ॥ सौर्यम्[7] ॥ * ॥ चैरन्त्यम्[8] ॥ * ॥ काम्पिल्यम् । कम्पील[9] इत्यन्यः ॥ * ॥ समलेन निर्वृत्तम् । सामल्यम् ॥ * ॥ खाण्डित्यम्[10] ॥ * ॥ सैर्यम् ॥ * ॥ पाञ्जर्यम् ॥ * ॥ प्रागद्यम् । नगरं देशो वा ॥ * ॥ नाथ्यम् ॥ * ॥ नाल्यम् ॥ * ॥ आङ्ग्यम् ॥ * ॥ रौमण्यम् ॥ * ॥ लौमन्यम् ॥ * ॥ पौलिन्यम् ॥ * ॥ मागद्यम् । नगरं देशो वा ॥ २७५ ॥

---

१ Hem. has both, the others कूट.

२ B. C. om. from वामनमतेन ॥ मन्दाराणां.

३ मडार Bö., Yajñ.; मंज़ार and मदार Hem.; मार्जार Kâṣ. V. ed. मागार *a.*

४ नासिका° B. C. F. K.; शूर° D.; सूरचिरंत्यः F. K.; °विरंत्यः B. C.

५ कपिलः (against metre) B. E.; °खंडिमसीराः B. C. K.; खंडिमासीराः D.; खंडिलसीराः D.; A. om. text and comment.

६ नासिका नाम° नासिक्यं B. C. F. K.

७ शौर्यं D.—शूर Hem.; सूर Bö., Y.

८ वैरंत्यं B. C. D. K.—विरत K. V., Yajñ. and (*v.l.* चिरन्त) Bö.; विरत्त (or °त्न) Hem.; ? चिरत्न.

९ Thus Hem.; कम्पिल Yajñ.; कपिल Bö.; काम्पिल्य Kâṣ. V. ed. (कंपिल्य *a.*).

१० ? खांडिल्यं F.; खांडिम्यं B. C. & orig. K. (corr. °त्यं or °ल्यं); खांडिन्यं D.—खण्डित Bö., Yajñ.; खडिव Hem., Kâṣ. V. ed. (खाचिर *a.*); these works also have गदित Bö., Yajñ.; गडिव Hem., Kâṣ. V. ed.

सुपरिः कटिपः कलिवो मलिनागस्ती सकर्णको[1] वृष्टिः।
पन्थादेशः सुपथी मादितविकरौ च सूरसेनश्च[2] ॥ २७६ ॥

सुपरिः कश्चिद्राजा। तेन निर्वृत्तम्। सौपर्यम् ॥ * ॥ काटिप्यम्[3] ॥ * ॥ कालिव्यम्[4]। कलित इत्यन्ये ॥ * ॥ मालिन्यम् ॥ * ॥ अगस्तिकुण्डिन्योरगस्तिकुण्डिनी[5] वेति स्मृचि। अगस्तीनां निवासः। आगस्त्यम्। अन्ये त्वगस्त्यस्यापत्यम् आगस्त्यः[6]। च्छ्यणि। तस्यागस्त्यम् ॥ * ॥ साकर्ण्यम् ॥ * ॥ वृष्टिना निर्वृत्तम्। वार्ष्टम् ॥ सृष्टिर्नाम काचित्स्त्री[7]। तस्या निवासो मार्ष्टमित्यपरे ॥ * ॥ सुपथोऽदूरभवं सुपथं वाचास्तीति। सौपथम् ॥ * ॥ मादिता स्त्री काचिदित्यन्यः[8] ॥ * ॥ वैकर्यम् ॥ * ॥ सौरसेन्यम् ॥ * ॥ गोभिलचक्रचक्रवाकाश्मोकच्छगलकुशीरकयमलमुखमन्मथशब्दानभयनन्दी गणेऽस्मिन्दर्शः ॥ २७६ ॥ इति संकाशादिः ॥

बलश्चुलः पुलोलौ च नलो दुलदलौ वनम्[9]।
वडशब्दः कुलं मूलं लकुलोरलसंयुतम्[10] ॥ २७७ ॥

---

१ °कटिपः कलिके मलिनागस्ती° D.; सकर्ण्यको D. E.

२ °सुपथिगदितविकरौ° E.; A. om. text and comment.

३ कादिप्यं B.; कोटिप्यं C.—कटिप Bö., Yajñ.; कटिप, कटिव, कटिद Hem.; om. Kâś. V.

४ कालिक्य। D.—कलिव Hem., Kâś. V. ed. (कलिप, कलिल *a.*); कविल Bö.; विकल Yâjñ.

५ आगस्तिकुंडिन्योर° B. C. F. K.; °आगस्तिकुंडिनी C.; अगस्त्यकुंडि° कुंडिनी D.

६ अन्ये तु आगस्त्यस्या° C. F.—अगस्ति and आगस्त्य Hem.; the others अगस्ति.

७ वृष्टि Bö., Yajñ.; सृष्टि (?) Hem.

८ मादित Hem.; om. the others.

९ वतं F.; चनं C.

१० रकुलोरल° E.; मूलकुलोरल° D.; लकुलोरल° B. C. K.; A. om. text and comment.

बलादेर्यः ॥ * ॥ बल्ल्या निर्वृत्ता । बल्ला नाम नगरी ॥ * ॥ एवं चुल्ला ॥ * ॥ पुल्ला । वामनमतेन । तुल इति[1] प्राकटायनः ॥ * ॥ उल्ला ॥ * ॥ नल्ला ॥ * ॥ दुल्ला ॥ * ॥ दल्ला ॥ * ॥ वन्या ॥ * ॥ वद्या[2] । वामनमतेन ॥ * ॥ कुल्ला ॥ * ॥ मूल्ला । मुल इत्यन्ये[3] ॥ * ॥ लकुल्ला ॥ * ॥ उरल्ला ॥ * ॥ एते यप्रत्ययान्ताः स्त्रीलिङ्गाः । अन्ये तु बल्लादीनां नपुंसकतामाहुः[4] ॥ २७७ ॥ इति बलादिः ॥

पक्षतुषचिचकुम्भाः कुण्डो मकराण्डहंसका रोम ।
लोमसुवर्णकसमलाः कम्बलिकाकुत्ससकलाश्च[5] ॥ २७८ ॥

पलादेः फण्[6] ॥ * ॥ पलेन निर्वृत्तं पलस्य निवासो वा । पालायणं नगरं राष्ट्रं वा ॥ * ॥ तौषायणम् । तुच[7] इति वामनः ॥ * ॥ चैचायणम् । चिचेत्यन्यः[8] ॥ * ॥ कौम्भायनम् ॥ * ॥ कौण्डायनम् ॥ * ॥ माकरायणम् । वामनमतेन[9] ॥ * ॥ आण्डायनम् ॥ * ॥ हांसकायनम् ॥ * ॥ रौमायणः ॥ * ॥ लौमायनः ॥ * ॥ सौवर्णकायनः । वामनमतेन[9] ॥ * ॥ सामलायनः ॥ * ॥ काम्बलिकायनः ॥ * ॥ कौत्सायनः । वामनमतेन[10] ॥ * ॥ साकलायनः ॥ २७८ ॥

---

१ मुल इति B. C. and orig. K. (corr. तुल); उल इति F.—पुल Yajñ. & (*v.l.* पुख) Bö.; तुल Kâṣ. V. ed.; तल *a.*; om. Hem.

२ वद्या K.—वट Bö., Yajñ.; om. Kâṣ. V., Hem.

३ मुल इत्यन्ये D. F.—मूल Bö., Yajñ., Kâṣ. V. *a.*; मुल Hem.

४ Kâṣ. V. and Hem. take the neuter forms; also Yajñ. (except बल्ला नगरी).

५ कुत्सशकलाश्च D.; A. om. text and comment.

६ Thus F.; पण् B. C. K.; क्वण् D.

७ लुच D.; तुष B. C. F. K.—तुच and तुष Bö., Yajñ.; तुष Kâṣ. V., Hem.

८ Hem. has both forms.

९ मकर, सुवर्णक, कुत्स, खिल, निवात given by Bö., Yajñ.; om. Kâṣ. V., Hem.

१० D. adds कुभ इत्यन्यः ।

पन्थादेशे विहिते पन्थिन्शब्दो निगद्यते कृतिभिः।
यमलबिलहस्तिहस्ताः सिंहकसरकौ खिलास्त्यतिश्वानः[1]
॥ २७९ ॥

पान्थायनः ॥ * ॥ यामलायनः ॥ * ॥ वैलायनः ॥ * ॥ हास्तिनायनः ॥ * ॥ हास्तायनः ॥ * ॥ सैंहकायनः ॥ * ॥ सारकायणः ॥ * ॥ खैलायनः[2]। आस्तायनः। द्वयं वामनमतेन ॥ * ॥ आतिश्वायनः। अतिश्व[3] इत्यन्यः ॥ २७९ ॥

सीरको लोमकः शीर्षनिवातौ च सकर्णकः।
अंशुकः सरसः पाकः सहको[4] वलिकः कला ॥ २८० ॥

सैरकायणः[5] ॥ * ॥ लौमकायनः ॥ * ॥ शैर्षायणः ॥ * ॥ नैवातायनः। वामनमतेन[2] ॥ * ॥ साकर्णकायनः ॥ * ॥ आंशुकायनः[6] ॥ * ॥ सारसायनः ॥ * ॥ पाकायनः ॥ * ॥ साहकायनः ॥ * ॥ वालिकायनः ॥ * ॥ कालायनः ॥ २८० ॥ इति पन्थादिः[7] ॥

कर्णार्कजीवन्तजवानडुह्या[8]
आण्डीवतोऽथ द्रुपदश्च जैचः[9]।

---

१ A. om. text and comment.

२ See note ९, preceding page.

३ Thus Hem., K. V. *a.*; the others अतिश्वन्.

४ शीरको लो° MSS.; °अंशुकः °सहिको B. C. K.; सहाकाः E.; A. om. text and comment.

५ शैरकायणः MSS.; cf. last note.

६ आशुकायनः D.; आंशुकायनः B. K.; आशुकायनः C.—अंशुक Hem.; अडुशु Bö., Yajñ.

७ पंथ्यादिः B. C.

८ कर्णाकिजीवंतजवातडुखा E.; कर्णार्कवंतवानुडुह्या D.; कर्णाटजीवंत° F.; कर्णाक° C.

९ आंडवतो थ द्रुषडश्चजैचः B.; आंडीवनोऽथ D.; आजीवनो थ द्रुषदश्च° C.

स्फिगर्कलूषाकनपाञ्चजन्याः
कुन्ती वशिष्ठः कुलिशश्च जित्वा[1] ॥ २८१ ॥

कर्णादेः फिञ्[2] ॥ * ॥ कर्णेन निर्वृत्तः कर्णस्य निवासो वा । कार्णायनिः ॥ * ॥ अर्को गुल्मः स्फटिकश्च । आर्कायणिः ॥ * ॥ जीवन्त ऋषिः । जैवन्तायनिः ॥ * ॥ जावायनिः । वामनमतेन[3] ॥ * ॥ आनडुह्यायनिः ॥ * ॥ आण्डीवतायनिः ॥ आण्डोवदित्यन्यः[4] ॥ * ॥ द्रौपदायनिः[5] ॥ * ॥ जैत्रायणिः ॥ * ॥ स्फैजायनिः । स्फिगेत्यन्यः[6] ॥ * ॥ अर्कलूष ऋषिः । आर्कलूषायणिः[7] ॥ अन्ये त्वर्कलुष इति[8] ॥ * ॥ आकनायनिः । आकिनी[9] स्त्रीत्यन्यः ॥ * ॥ पाञ्चजन्यायनिः ॥ * ॥ कौन्तायनिः । कुम्भो कुम्भो वेत्यपरे[10] ॥ * ॥ वाशिष्ठायनिः[11] ॥ * ॥ कौलिशायनिः ॥ * ॥ जित्वा धर्मः । जैत्वायनिः । जित्येत्यन्यः[12] ॥ २८१ ॥ इति कर्णादिः ॥

---

१ स्फिगर्कलूखा° B.; °लूकाः कन° C.; °लूखाकर्णपाचजन्याः कुंती° D.; °कतपांचजन्याः कुंतो वसिष्ठः° F.; A. om. text and comment.

२ Thus F. [Pâṇ. iv. 2, 80]; पिञ् B. C. D. K.

३ B. C. orig. K. om. वामनमतेन.—जाव Bö., Yajñ.

४ आण्डीवत Bö., Yajñ.; आण्डीवत् K. V., Hem., Bö. *var. l.*

५ द्रौषदायनिः B. C. K.

६ स्फिगित्यन्यः F.; om. D.—Bö., Yajñ., Hem. have both स्फिज् and (*v.l.* Bö., Yajñ.) स्फिग.

७ आर्कलूषायनिः B. C. K.; आर्कलू--निः D. (!ख).

८ तु अर्कलुख इति C. F.; cf. śl. 281, notes.—अर्कलूष Bö., Yajñ.; अर्कलुस २ (? *i.e.* combined and separate अर्क । लुस) Hem.; अलुश् (*v.l.* अर्क । लुष) Kâś. V. ed.; अर्क । लुस *a.*

९ Thus Hem.; आनक Bö., Yajñ. (आकनेत्यन्ये Y.).

१० कौंभी वेत्यपरे C.: कु--भो वेत्यपरे D.; कुम्भी । कुन्ती Bö.; कुंती (कुंभी कुंभो वेत्यन्ये) Yajñ.; कुम्भी Kâś. V. ed.; कुंभ *a.*, Hem.

११ वासिष्ठायनिः F. (श् cf. p. 54, l. 7).

१२ जित्वन् Bö., Yajñ. (जित्वनां निवासो जैत्वायनिः); जित्व Kâś. V. ed. (जित MS. *a.*); जित्वत् (?), जित्या (? corr. °त्य) Hem.

ज्ञेयाः सुतंगमाजिरजीवार्जुनविप्रचित्तमुनिचित्ताः[१]।
श्वनशुक्रमहापुचाः खण्डिककर्णी[२] महाचित्तः ॥ २८२ ॥

सुतंगमादेरिञ् ॥ * ॥ सुतंगमेन निर्वृत्तं सुतंगमस्य निवासो वा। सौतंगमिः ॥ * ॥ आजिरिः ॥ * ॥ जैविः ॥ * ॥ अर्जुनं दृणम् अर्जुनस्य पार्थः। आर्जुनिः ॥ * ॥ वैप्रचित्तिः ॥ * ॥ मौनिचित्तिः ॥ * ॥ शौवनिः ॥ * ॥ शौक्रिः ॥ * ॥ माहापुचिः ॥ * ॥ खाण्डिकिः। वामनमतेन[३]। खण्डित इत्यन्यः ॥ * ॥ कार्णिः ॥ * ॥ माहाचित्तिः ॥ २८२ ॥

बीजवापिस्वनश्वेतगडिका[४] विग्रवियहौ।
एषां सुतंगमादित्वादिञूचे चातुरर्थिकः ॥ २८३ ॥

बैजवापिः। अन्ये तु बीज इति वापिन्निति पृथगाहुः[५] ॥ * ॥ स्वानिः[६]। वामनमतेन ॥ * ॥ श्वेतिः ॥ * ॥ गाडिकिः। गर्दिक[७] इत्यन्यः ॥ * ॥ वैग्रिः ॥ * ॥ वैग्रहिः ॥ * ॥ चातुरर्थिक इति निवासोऽदूरभवो नाम्नि देशे तेन निर्वृत्तस्तदत्राखि च[८] ॥ २८३ ॥ इति सुतंगमादिः ॥

---

१ °विप्रचितमुनिचिताः E. (& Bö.); °विप्रविक्षमुतिवि D.

२ खंडीककर्णी E. against metre; षंडिककर्णी B. K.; षडिककर्णी C.; खडिकः कर्णी° F.; खंडिकर्णी D.; A. om. text and comment.

३ खांडिकिः। खाडिकिर्वामनमतेन F.—खडिक and खण्डित Bö.; खंडिक Yajñ.; om. Kâś. V., Hem.

४ बीजवापस्वन° B.; ॥ वपश्चतश्वेताश्चतगडिका C.; °स्वतश्वेत° F.; बीजवापिश्वनेश्वेन° E.; °श्वनश्वेत° D.; A. om. text and comment.

५ बीजवापिन् (*v. l.* बीज। वापिन्) Bö.; बीजवापिन् Yâjñ., Kâś. V.; बीजवाप। बीज। वाप। Hem.

६ स्वातिः B. C. F. K.; स्वनिः D.—Bö. and Yajñ. read स्वन; om. Kâś. V., Hem.

७ Thus Hem.; गडिक Bö., K. V.; om. Yajñ.

८ वा D.

वराहबाहू अथ शर्करा नि-
मग्नः शिरीषश्च तथा विदग्धः[1] ।
ज्ञेयो वलाहः खदिरो विभग्नः
स्थूलः पलाशः पिनिनद्धबद्धौ ॥ २८४ ॥

वराहादेः कञ् ॥ * ॥ वराहा अत्र देशे सन्ति । वाराहकम् ॥ * ॥ बाह्वकम् ॥ * ॥ शार्करकम् ॥ बल्वजादिपाठाद्वः । शर्करिकम्[2] ॥ शर्करायाष्ठण्क्ठौ[3] वेत्यनेन शार्करिकम् । शर्करीयम् । शार्करम् ॥ शर्करा इति देशसंज्ञा स्वभावादभेदोपचाराद्वा ॥ * ॥ नैमग्नकम् ॥ * ॥ शैरीषकम् ॥ * ॥ वैदग्धकम् ।[4] विजग्ध इत्यप्यन्यः ॥ * ॥ वालाहकम्[5] ॥ * ॥ खादिरकम् ॥ * ॥ वैभग्नकम् । विभक्त इत्यन्ये[6] ॥ * ॥ स्थौल-कम् ॥ * ॥ पालाशकम् ॥ * ॥ पिनिनद्धबद्धाविति पिनिभ्यां नद्धबद्धौ क्रमेण ज्ञेयावित्यर्थः । पैनद्धकम् । नैबद्धकम् ॥ २८४ ॥ इति वरा-हादिः ॥

कुमुदं कुण्डलकूटौ मुनिस्थलाश्वत्थघासकुन्दाश्च ।
मधुकर्णदशश्यामौ शाल्मलिरथकारगोमठशिरीषाः[7] ॥ २८५ ॥

कुमुदादेष्ठञ् ॥ * ॥ कुमुदान्यत्र देशे सन्ति । कौमुदिकम् ॥ * ॥

---

१ सर्करा E.; A. omits text and comment.

२ Cf. śl. 295 (where affix इक!).

३ शर्करायाष्ठष्ठौ C.; शर्करायाष्व-ण्ष्ठौ D.; °क्ठण्क्ठावित्यनेन F.; cf. Pâṇ. iv. 2, 83-4.

४ The other works have both words.

५ इत्यन्यः° F.; वालहकं D. (व° cf. वलाहक śl. 146 comm.).

६ इत्यन्यः D. F.—Hem. has both, the others विभग्न only.

७ °गोमवशिरीषाः D.; A. om. text and comment.

कौण्डलिकम् ॥ * ॥ कौटिकम् । कूर्ण[1] इत्यन्यः ॥ * ॥ मौनिस्थलिकम्[2] । मुनिः स्थलस्येत्यन्ये[3] ॥ * ॥ आश्वत्थिकम् ॥ * ॥ घासकुन्दिकम् ॥ * ॥ माधुकर्णिकम् । मुचुकर्ण[4] इति शकटाङ्गजः । शुचिकर्ण[5] इत्यभयनन्दी ॥ विगृहीतादपीष्यते । माधुकम् । कार्णिकम् ॥ * ॥ दाशग्रामिकम् ॥ * ॥ शाल्मलिकम् ॥ * ॥ रथकारेण निर्वृत्तं तस्य निवासो वा । राथकारिकम् ॥ * ॥ गौमठिकम्[6] । पर्वतो ह्रदो वा गोमेध[7] इत्यन्ये ॥ * ॥ शैरीषिकम् । अरीहणादिपाठाच् शैरीषकम् । शिरीषा इति बह्वचनान्तः संज्ञावाची स्वभावात् सोऽयमिति संबन्धाद्वा[8] ॥ शार्करिकशब्दः पृथक्सूत्रेण सिद्ध इति नात्र पाठः ॥ २८५ ॥ इति कुमुदादिः ॥

अरीहणोहण्डविपाशशिंशपा[9]
भलन्दनोदञ्चनखाण्डवीरणाः ।
सुयज्ञजम्बूकशकृत्स्नरेवताः
शिरीषबिल्वौ बधिरोऽथ जाम्बवान् ॥ २८६ ॥

---

१ ? कूर्ण C.; तूर्ण F.—The other works have कूट only.

२ मौनस्थलिकं B. C. K.

३ ? मुनिच्छव° B.; मुनिबव° (ब = छ) C.; मुनिस्थव° D. F. & (?) corr. K. —B. K. add: मौनिकं छवाछागाश्छाविकं; C. मौनिकं बवाबागाश्चाविकं.—Bö., Yajñ. मुनिस्थल; K. V. ed. मुनिस्थूल, *a.* मुनि । स्थूल; Hem. मुनि । स्थल । मुनिस्थल ।.

४ ? Thus D.; मनुकर्ण B. C. F. K.—Hem. has मुचुकर्ण । मुचुकर्णि; Kâś. V. ed. मुचुकर्ण, *v.l.* मधुकर्ण; Bö., Yajñ. मधुकर्ण.

५ इत्युभयनंन्दी D.—Thus also Bö., Hem., Kâś. V. ed. *v.l.*

६ गोमथिका B. C. K. — गोमठ Hem.; गोमथ Bö., Yajñ., Kâś. V. ed., गोमद् *a.*

७ ? Thus B. C. K.; गोमेव D. F. (? गोमेद् or ह्रदो वा ॥ गोमेध इत्यन्ये ॥).

८ सो यमभिसंबंधाद्वा B. C. K.

९ °शंसपा B. K.; °शंसवा C.; °शिंशिपा° F.; A. om. text and comment.

अरीहणादेरकञ्[1] ॥ * ॥ अरीहणेन निर्वृत्तम् । आरोहणकम् ॥ * ॥ औदृण्डकम् ॥ * ॥ वैपाशकम् ॥ * ॥ शिंशपानां वृक्षविशेषाणामदूरभवं शिंशपा अत्र सन्तीति वा । शांशपकम्[2] । देविकाशिंशपाश्रेयोदीर्घसत्रस्यादित्यनेनैकारस्याकारः[3] ॥ * ॥ भालन्दनकम् ॥ * ॥ औदञ्चनकम् ॥ * ॥ खाण्डवैरणकम्[4] ॥ * ॥ सौयज्ञकम् ॥ * ॥ जाम्बवकम् ॥ * ॥ काशकृत्स्नकम् । काशकृत्स्न[5] इति भोजः ॥ * ॥ रायावतो रैवतः । रेवत इत्यन्ये[6] । रैवतकः पर्वतः ॥ * ॥ शैरीषकम् ॥ * ॥ वैल्वकम् ॥ * ॥ बाधिरकम् ॥ * ॥ जाम्बवता निर्वृत्तम् । जाम्बवतकम् । अन्ये जाम्बवतोऽपत्यं जाम्बवत इत्याहुः[7] ॥ २८६ ॥

खाडगौमतमैचोष्ट्रचैगर्ता वैमतस्तथा ।
शाणिडल्यसांपरौ भास्त्र[8] आयनान्ता अमी मताः ॥ २८७ ॥

खाडायनकम् ॥ * ॥ गौमतायनकम् ॥ * ॥ मैचायणकम् । श्वैचायणक इत्यपरः[9] ॥ * ॥ औष्ट्रायणकम् ॥ * ॥ चैगर्तायनकम् ॥ * ॥

---

१ Om. D. F.

२ शिंशिपानां° शिंशिपा° F.; °शांशपं D.

३ °दीर्घशत्सा° B. C. K.; दीर्घसूचस्या° D.; देविकाशिंशपेति सूचेण° F.; cf. Pâṇ. vii. 3, 1.

४ Thus B. C. D. K.; खांडवीरणकं F.—खाण्डवीरण Bö., Yajñ. [खाण्डवीरणकम् । खाण्डवैरणकमिति केचित् अनुशतिकादेराकृतिगणत्वात्° Yajñ.]; om. K. V., Hem..

५ ? Thus F.; कशकृत्स B. C. K.; कसकृत्स्न इति श्रीभोजः D.—कशकृत्स्न Bö., Yajñ., Hem.; काशकृत्स्न Kâṣ. V., Bö., *v. l.*

६ C. F. K. om. रेवत.—Bö. रैवत, *v. l.* रेवत; the others रैवत.

७ Bö., Yajñ. and twice Hem. जाम्बवत् (जांबवत इति केचित् Yajñ.); जाम्बवन्त Kâṣ. V. ed.; जांववत *a.*

८ भास्त्रा E.; भास्त्राः D.; A. om. text and comment.

९ ? Thus B. C. K.; चैचायणक D. F. —श्वैचायणि (or श्वि°) Hem.; मैचायण Bö., Yajñ., Kâṣ. V. ed. (चिचायण *a.*).

वैमतायनकम् ॥ * ॥ शाण्डिल्यायनकम् ॥ * ॥ सांपरायणकम् ॥ * ॥ भास्त्रायणकम् ॥ २८७ ॥

खदिरो विपथः खण्डुर्भगलो द्रुघणस्तथा[१]।
सुशर्मकनलोलन्दा[२] रायस्पोषश्च वीरणः ॥ २८८ ॥

खादिरकम् ॥ * ॥ वैपथकम् ॥ * ॥ खण्डुना निर्वृत्तम् । खाण्डवकम् ॥ खण्डूरित्यन्यः[३] ॥ * ॥ भागलकम् ॥ * ॥ द्रुघणा अत्र सन्ति । द्रौघणकमिति वामनः । द्रुहण इति भोजः[४] ॥ * ॥ सौशर्मकम्[५] ॥ * ॥ कानलकम्[६] ॥ * ॥ औलन्दकम् ॥ * ॥ रायः पोषः । रायस्पोषः । अत एव निपातनादिभक्तेरलुग्विसर्गस्य सकारः । रायस्पोषकम् ॥ * ॥ वैरणकम् ॥ २८८ ॥

किरणो यज्ञदत्तश्च दलता सौमतायनः[७]।
क्रौष्ट्रधौमतसौमेन्द्रसौसकौद्राः[८] फणन्तकाः[९] ॥ २८९ ॥

कैरणकम् ॥ * ॥ याज्ञदत्तकम् ॥ * ॥ दलत्रा निर्वृत्तं दलतुः पर्वतस्य वादूरभवम् । दालत्रकम् ॥ * ॥ सौमतायनकम् ॥ * ॥ क्रौष्ट्रायणकम् ॥ * ॥ धूमतस्यापत्यं धौमतिः । तस्यापत्यं युवा धौमतायनः । तस्य[१०]

---

१ भागलो° E.; द्रुहण° D. E.

२ सुशर्मकतलो° B. C. K.; °कातलो° F.; A. om. text and comment.

३ खाडकं । खंडरित्यन्यः D.—Hem. has both; Bö., Yajñ. खण्डु, K.V. खण्ड.

४ Bö. has both; Hem., Kâś. V. ed. द्रुघण; MS. *a.* द्रुहण; Yajñ. द्रुहिण.

५ सौशर्मिकं B. C. F. K.

६ ? कातलकं B. C. F.; K. doubtful. —Bö. कनलं (*v. l.* कलन); Yajñ. कतल; om. Kâś. V., Hem.

७ यज्ञो दत्तश्च° E.; यज्ञश्च D.; दलतृसौमतायनो D. E.

८ °सौमेंद्रसौसकौद्रः E.; सौमेंद्° B. C. D.; सोमेंदसोसकोद्राः F.; सौमेंद्° K.

९ पणंतकाः B. C. D.; फगंतकाः E.

१० B. C. K. om. धौमतायनः । तस्य.

धौमतायनकम् ॥ * ॥ सौमस्य । सौमायनकम् ॥ * ॥ इन्द्रस्य । ऐन्द्रायणकम्[1] ॥ * ॥ सुष्ठु स्वतीति सुसः । तस्य सौसायनकम् ॥ * ॥ कुद्रस्य । कौद्रायणकम्[2] ॥ एतेषां धौमतायनवत्प्रक्रिया ॥ २८९ ॥ इत्यरीहणादिः ॥

कृशाश्वकूटाजिनवेश्मलोमशा
विशालधूमौ सुकरश्च वर्चलः[3] ।
अरिष्टमौद्गल्यपराशरारुषः
सुवर्चलारिश्मपुरारमूकराः[4] ॥ २९० ॥

कृशाश्वादेरक्ण् ॥ * ॥ कृशाश्वेन निर्वृत्तम् । कार्शाश्वीयम् ॥ * ॥ कौटीयम् ॥ * ॥ आजिनीयम् ॥ * ॥ वैश्मीयम् ॥ * ॥ लौमशीयम् ॥ * ॥ वैशालीयम् ॥ * ॥ धौमीयम् ॥ * ॥ सौकरीयम्[5] ॥ * ॥ वार्चलीयम् ॥ वर्तुल[6] इत्यन्ये ॥ * ॥ आरिष्टीयम् ॥ * ॥ मौद्गलीयम् ॥ * ॥ पाराश्-रीयम् ॥ * ॥ आरुषीयम् ॥ * ॥ सौवर्चलीयम् ॥ * ॥ आरिश्मीयम् । आरिष्य[7] इत्यन्यः ॥ * ॥ पौरारीयम् । वामनमतेन[8] ॥ * ॥ सौक-रीयम्[9] ॥ २९० ॥

---

१ ? इंदखिंदायनकं B.C.F.K.; इंद-खिंद्रायनकं D. (!).—Bö., Yajñ. have ऐन्द्रायण; Hem. ऐडायन.

२ कौंद्रायनकं (!) B. C. K.—Bö. कौ-न्द्रायण; Hem., Yajñ., Bö. *v.l.* कौद्रा-यण; om. K. V.

३ कृशाश्वकूटा° B.; °कूटानिन° व-र्चनः । E.; °वर्त्तुलः । D. F.

४ °परासरा° E.; °शूकराः B. F.; श्वकराः C.; A. om. text and comm.

५ शौकरीयं B. C. D. K.

६ वर्चलीयं° B.C. & (or वर्ब्बलीयं) K.; वार्त्तुलीयं । वर्चल F.; वार्वुलीयं । वर्ब्ब-लीयं । वर्चुल D.—वर्चल Bö., Yajñ. (वर्त्तुलशब्दं केचित्पेठुः Y.); वर्बुल corr. Hem.; वर्वर Kâṣ. V. ed. (चरमन *a.*).

७ आरिख्य C.; आरिख्य B.; आ-रिढ्य K. (? corr. ड्य).—Hem. has आ-रिष्य; Bö., Yajñ., K.V. MS. *a.* अरिश्म (K. V. ed. अरीश्व).

८ पौरारीय तेन D.—? Bö., Yajñ. have पुराग (besides पुरग, next śloka; पुरार इत्यन्ये Y.); om. K.V., Hem.

९ शौकरीयं B.C.F.K.; सौष्करीयं D.

अवनतसदृशायोरोमका लोमकश्च
प्रतरसुखविविक्तासायसाः पूतरश्च ।
विनतपुरगदासीपूकराः पूगरश्चा-[1]
ऽजिनतसतुलवेष्येरोऽरसा[2] धूकरश्च ॥ २९१ ॥

आवनतीयम् ॥ * ॥ सादृशीयम् ॥ * ॥ आयसीयम् ॥ * ॥ रौमकीयम् ॥ * ॥ लौमकीयम् ॥ * ॥ प्रातरीयम् ॥ * ॥ सौखीयम् । सिपल[3] इत्यन्ये ॥ * ॥ वैविक्तीयम्[4] ॥ आसायसीयम् । सायस[5] इत्यन्यः ॥ पूतरो[6] जलजन्तुः । पौतरीयम् ॥ चयं वामनमतेन ॥ * ॥ वैनतीयम् ॥ * ॥ पौरगीयम् । पुरगा नाम काचिद्राज्ञसी तया भक्षितं पाटलिपुत्रं[7] तस्या निवासः पौरगीयमित्यन्यः ॥ * ॥ दासीयम् ॥ * ॥ पुवं करोति । पूकरः[8] । तस्य पौकरीयम् ॥ * ॥ पूगान्यस्य सन्ति । पूगरः[8] । तस्य पौगरीयम् ॥ * ॥ आजिनतीयम्[9] ॥ * ॥ सातुलीयम्[10] । वामनमतेन ॥ * ॥ वैष्यीयम्[11] ॥ * ॥ ऐरसीयम्[12] ॥ * ॥ आरसीयम्[13] ॥ * ॥ धौकरीयम् ॥ * ॥ केचित्पुंलिङ्गमपरे तु स्त्रीलिङ्गमुदाहरन्ति[14] ॥ २९१ ॥

---

१ °पूकराः (: om. E.) पूकरश्च D. E.

२ अजिनमपुलवेष्येरोरसा D.; जिनतसुचलवेसा आरसो E.; °वेष्येरोरसो° B. K.; वैष्येरोरसो° C.; °वेष्पैरसा F.; A. om. text and comment.

३ ? शिपल D.—Hem. has शिवल, the others सुख.

४ वैवक्तीयं C.; वैवक्रीयं F.—विवक्त Yajñ., om. the others.

५ ? सायस् Hem.; अवयास (*v.l.* अयावस्) K. V. ed.; अकद्याग्नि *a.*; om. Bö., Yajñ.

६ Trivikrama on Hem. (Prâk.) i. 170 (Pischel) explains पूतर bei अधमः । जलजन्तुर्वा ।

७ Thus D. F. & corr. K.; पाटलितं B. C. & orig. K.; पौरगा नाम° D.

८ पूकर । पूगर Hem.; यूकर Bö., Yajñ.

९ ? अनिनतीयं D.—अविनत (also अवनत) Hem.; others अवनत only.

१० सावुलीयं D.; not given by others.

११ ? Thus (or वैष्णीयं) B. C. F. K.; वैषीयं D.—वेष्य Hem.; om. others.

१२ इरस् & इर Hem.; not given by the other works.

१३ ? औरसीयं B.; आर्यं D.; औरसीयमिति कश्चित् F.; om. C. K.—Not given by the other works.

१४ D. om. from केचित्.

विकुट्यासासुरावेतौ[1] शबलश्चाभितो जनः ।
रौमशश्च[2] कृशाश्वादौ ज्ञेयाञ्छ्रणप्रत्ययान्विते ॥ २९२ ॥

वैकुट्यासीयम्[3] । विकुट्य इत्यन्ये ॥ * ॥ आसुरीयम् ॥ * ॥ शाबलीयम् ॥ * ॥ आभिजनीयम् ॥ * ॥ रौमशीयम्[4] ॥ २९२ ॥ इति कृशाश्वादिः ॥

ऋश्यस्थूलनिलीनकर्दमशरा बाहुर्निधानाशनि-[5]
न्यग्रोधाः परिगूढखण्डखदिरा वेणुः सितः शर्करा[6] ।
अश्मांशू परिवंशवीरणमता वेश्मोपगूढाविमौ
दण्डश्चानडुहोत्तराश्म परितो वृत्तो निबन्धारडू[7] ॥२९३॥

ऋश्यादेः कः ॥ * ॥ ऋश्या अत्र देशे सन्ति । ऋश्यैर्निर्वृत्तं वा । ऋश्यकम्[8] ॥ * ॥ स्थूलकम् ॥ * ॥ निलीनकम् ॥ * ॥ कर्दमकम् ॥ * ॥ शरकम् ॥ * ॥ बाहुकम् ॥ * ॥ निधानकम्[9] ॥ * ॥ अशनिकम्[10] ॥ * ॥ न्यग्रोधकम् ॥ * ॥ परिगूढकम् ॥ * ॥ खण्डकम् ॥ * ॥ खदिरकम् ॥ * ॥ वेणुकम् ॥ * ॥ सितकम् ॥ * ॥ शर्करकम् ॥ * ॥ अश्मकम् ॥ * ॥ अंशु-

---

१ विकुट्या° (?) C. E. K.; दिकुट्या° D.; विकुट्याश्या° F.

२ रौमसश्च E.; A. om. text & comm.

३ वैकुट्याशीयं (? some द्य; घ D.) MSS.—विकुट्यास Bö., Yajñ. (कुविद्यास *v. l.* Bö.); विकुघास K. V. ed. (वित्कुपुसा *a.*); विकुट्याश्च (or °ट्यांश्च) and विकुट्य Hem.

४ रौमसीयं D.

५ °निधानासनि° D. E.; ऋश्य cf. note ८.

६ वैणुः शिता सर्करा D.; शितिः° शर्करः B. F. K.; शकारः C.

७ वृंतो° B. F.; परितो निबंधोरटूः C. K.; निबंधारटू F.; A. om. text and comment.

८ The MSS. waver between ऋश्य and ऋश्य.

९ Thus Bö., Yajñ., K. V. [विधान इत्यन्ये Yajñ.]; om. Hem.

१० असनि° D.—अशनि Yajñ.; असनि Bö.; न्यशनि MS. Hem.; om. K. V.

कम् ॥ * ॥ परिवंशकम् ॥ * ॥ वीरणकम् ॥ * ॥ मतकम् ॥ * ॥ वेशकम् ॥ * ॥ उपगूढकम् ॥ * ॥ दण्डकम् ॥ * ॥ अनडुहोत्तराशमेति समाहारद्वन्द्वः । अनडुहकम्[1] ॥ * ॥ उत्तराशमकम् ॥ * ॥ परितो वृत्त इति परिवृत्त इत्यर्थः । तस्य परिवृत्तकम्[2] ॥ * ॥ निबन्धकम् ॥ * ॥ अरडुस्तरुविशेषः । तस्य । अरडुकम्[3] ॥ २९३ ॥ इत्यूष्मादिः[4] ॥

बल्वजः कूपबीजे च यवासेक्कटकङ्कटाः[5] ।
शिरीषः शकटाश्वत्थपरिवापविकङ्कतम् ॥ २९४ ॥

बल्वजादेरिकः ॥ * ॥ बल्वजा अत्र देशे सन्ति । बल्वजिकम् ॥ * ॥ कूपिकम् ॥ * ॥ बीजिकम् ॥ * ॥ यवासिकम् । यवाष[6] इत्यन्यः ॥ * ॥ इक्कटिकम्[7] ॥ * ॥ कङ्कटः संनाहः सीमा च । कङ्कटिकम् ॥ * ॥ शिरीषिकम् ॥ * ॥ शकटिकम् ॥ * ॥ अश्वत्थिकम् ॥ * ॥ परिवापिकम् ॥ * ॥ विकङ्कतिकम् ॥ २९४ ॥

शर्कराऽथ दशग्रामो न्यग्रोधः कुमुदं कचः[8] ।
मध्वश्वसंकटा गर्तनिर्यासौ गदिताविह ॥ २९५ ॥

शर्करिकम् ॥ * ॥ दशग्रामिकम् ॥ * ॥ न्यग्रोधिकम् ॥ * ॥ कुमुदि-

---

१ आनडुहोत्तर° आनडुहकं D. — अनडुह् Bö., Kâś. V.; अनडुह Hem., *v.l.* Bö.; (अनडुहोऽपत्यमानडुहः) आनडुहोत्तराशमेति° Yajñ.

२ °वृंत °परिवृंत °परिवृंतकं B. F. K. (C.)—The other works have परिवृत्त (K. V. *a.* परिग्रंथ).

३ अरडु° अरडुकं B.C.F.K.—अरडु Bö., Yajñ. (अरडुरित्यन्ये Yajñ.); अरडु। अरडु Hem.; om. Kâś. V.

४ Cf. note ८, preceding page.

५ यवासेक्कट° B. C. K.; यवासेत्कट° D. E.; A. om. text & comment.

६ पवासिकं° C.; यवास B. C. F. K.; पवाष° D.—यवाष Bö., Kâś. V., Hem.; यवाद्य Yajñ.

७ इक्कटिकं B. C. F. K.; °त्कटिकं D.—इक्कट Bö., Yajñ.; इत्कट Kâś. V., Hem.

८ कची B. C. K.; कधी D.; °कविः F. [कच Bö., Yajñ.; कत *v.l.* Kâś. V. ed.; om. Hem.]; A. om. text and comment.

कम् ॥ * ॥ कचिकम् ॥ * ॥ मधुकम् ॥ अश्विकम् ॥ इयं वामनमतेन[1] ॥ * ॥ संकटिकम् ॥ * ॥ गर्तिकम् ॥ * ॥ निर्यासिकम् ॥ * ॥ केचिद्वल्वजिका कुमुदिकेत्यादि स्त्रीलिङ्गमुदाहरन्ति । तत्र लोकः प्रमाणम् ॥ २९५ ॥ इति बल्वजादिः[2] ॥

काशपाशतृणाश्वत्थाः पलाशवनकङ्कटाः[3] ।
वासकर्दमपीयूक्षा[4] गुहाकर्पूरबर्बराः ॥ २९६ ॥

काशादेरिलः ॥ * ॥ काशस्तृणविशेषः । काशा अत्र सन्ति । काशिलम् ॥ * ॥ पाशिलम् ॥ * ॥ तृणिलम् ॥ * ॥ अश्वत्थिलम् ॥ * ॥ पलाशिलम् ॥ * ॥ वनिलम् ॥ * ॥ कङ्कटिलम्[5] ॥ * ॥ वासो गुल्मविशेषः । वास्यन्ते रुवन्तीति वासाः पक्षिण इत्यन्यः[6] । वासिलम् ॥ * ॥ कर्दमिलम् ॥ * ॥ पीयूक्षिलम् ॥ * ॥ गुहिलम् ॥ * ॥ कर्पूरिलम् ॥ * ॥ बर्बरो म्लेच्छजातिः । बर्बरिलम् ॥ २९६ ॥

मधुरग्रहवच्छूलाः[7] कपित्थश्वरणो बिसः ।
नडोऽथ जतुसीपालौ[8] गणे काशादिसंज्ञिते ॥ २९७ ॥

मधुरिलम् ॥ * ॥ ग्रहिलम् ॥ * ॥ वच्छूलिलम्[9] ॥ * ॥ कपित्थि-

---

१ दुर्गवामनमतेन D.

२ This *gaṇa* corresponds to कुसुमादि to P. iv. 2, 80, no. 4; Hem. vi. 2, 96.

३ °कंटकाः B. F.

४ °पीयूक्ष्ण E.; A. om. text and comment.

५ कंटकिलं F.—कङ्कट Bö., Yajñ.; कण्टक Kâś. V. ed., MS. *a.*, Hem.; cf. *prekshâdi*, śl. 299.

६ वास्यात रु° वासा पक्षिण° C.; om. D. [वाश्यन्ते° ?].—वाश् Kâś. V. ed., Hem.; वास Bö., Yajñ.

७ °ग्रहवत्यूलाः F. K.; °वच्चूलाः E.; °वक्लाः D.; ग्रहदस्थूलाः C.

८ जतुशापालौ C.; A. B. om. text and comment.

९ ? वत्यूलिलं F. K. (त्थ often written like च्छ); वच्चूलिलं B.; वच्चूलिले D. (cf. वच्चूल E., note ७).—वच्छूल Bö., Yajñ.; वर्तुल Hem.; वधूल *v.l.* Kâś. V. ed.; om. MS. *a.*

लम् ॥ * ॥ [1]चरणिलम् ॥ * ॥ बिसिलम्[1] ॥ * ॥ नडिलम् ॥ * ॥ जतविलम् ॥ * ॥ सीपालिलम्[2] ॥ २९७ ॥ इति काश्यादिः ॥

तृणमूलसुवर्णार्णा वराणवर्णौ[3] वनार्जुनौ पर्णम् ।
नडबलबिलपुलचरणा बुसः[4] फलं चाच विज्ञेयम् ॥ २९८ ॥

तृणादेः सः[5] ॥ * ॥ तृणान्यस्मिन्देशे सन्ति । तृणसा नदी नगरी सरसी[6] पर्वतिका ॥ * ॥ मूलसा ॥ * ॥ सुवर्णसा ॥ * ॥ अर्णो जलम् । तदस्तीति । अर्णसा नदी । पाठसामर्थ्यात्सलोपः ॥ अर्ण । दृत्यकारान्ता प्रकृतिरित्यन्ये[7] ॥ * ॥ वराण इति वीरणाभिधानम्[8] । तदस्तित्वाद् वराणसी[9] नदी । तस्या अदूरभवा वाराणसी नगरी ॥ वराणसो देशस्तत्रभवा वाराणसी नगरीत्यन्ये ॥ * ॥ वर्ण इति वीरणाख्या[10] । वर्णसा ॥ * ॥ वनसा ॥ * ॥ अर्जुनसा दिग्वस्त्रमतेन ॥ जन इति शकटाङ्गजः[11] ॥ * ॥ पर्णसा ॥ * ॥ नडसा ॥ * ॥ बलसा ॥ * ॥ बिलसा ॥ * ॥ पुलसा ॥ * ॥ चरणसा ॥ * ॥ बुससा[12] ॥ * ॥ फलसा । दिग्वस्त्रमतेन ॥ २९८ ॥ इति तृणादिः ॥

---

१ विशिलं D.

२ शीपालिलं D.—सीपाल Bö.; शीपाल Hem.; सोपालो नाम कश्चित्तेन निर्वृत्तं सोपालिकम् Yajñ.; om. K.V.

३ सुवर्णार्णावराणवर्णा F.; सुवर्णाणि विराण° C.

४ वुशः° D.; चुलफलं° F.; A. om. text and comment.

५ शः D. throughout (तृणशः °मूलशा etc.).

६ सारसी B. C. K.; सरसि D.

७ The other works have अर्ण [गणे लुप्तसकारस्योपादानात्सकारनिवृत्तिः। अदंत एवायमित्यन्ये Yajñ.].

८ ? Thus B. D. F. K.; वारणाभिधानं C.

९ वराणसा F.; D. om. from तदस्तित्वाद् to अर्जुनसा.

१० Thus also Yajñeśvara.

११ B. C. om. from जन to end of comm. (K. suppl. in margin).—अर्जुन Bö., Yajñ.; जन Hem., Kâś. V. ed. (अचज a.).

१२ चुलसा F.

प्रेक्षा स्यात्परिवापसंकटकटाः[1] कूपो यवासः पुटः
संलक्ष्या ध्रुवका महश्च धुवका कैश्चित्कपिः कोविदैः।
ज्ञेयः कङ्कटबन्धुकापुकबुका गर्तेङ्कटौ[2] कूपको
न्यग्रोधक्षिपकाहिरण्यफलकाः प्रेक्षादिरेवं गणः ॥२९९॥

प्रेक्षादेरिन् ॥ * ॥ प्रेक्षा बुद्धिः। तया हेतुना निर्वृत्तः। प्रेक्षी ग्रामः॥ अथवा प्रेक्षा अत्र सन्ति। प्रेक्षी देशः॥ प्रेक्षाशब्दो यद्यपि प्रेक्षणवाचो[3] तथाप्यत्र पक्षे रूढितो नदीसरसीस्थल्यादिवृत्तिर्द्रष्टव्यः ॥ * ॥ परिवापो बीजनिक्षेपः। परिवापी ॥ * ॥ संकटं संकीर्णता। संकटी ॥ * ॥ कटः पर्यन्तः। कटी ॥ * ॥ कूपी ॥ * ॥ यवासो दुःस्पर्शः। यवासी[4] ॥ * ॥ पुटो ॥ * ॥ ध्रुवका। आवपनविशेषः। ध्रुवकी ॥ * ॥ मह उत्सवः। मही ॥ * ॥ धुवका। आवपनविशेषः। धुवकी ॥ * ॥ कैश्चिदिति दिग्वस्त्रप्रभृतिभिः कपिशब्दः संलक्ष्यः। कपी ॥ * ॥ कङ्कटः संनाहः। कङ्कटी ॥ * ॥ बन्धुरेव बन्धुका। बन्धुकी ॥ * ॥ पुकृ दानम्। पुकी ॥ * ॥ बुकृ हास्यम्। बुकी[5] ॥ * ॥ गर्तोऽवटः। गर्ती ॥ * ॥ इङ्कटं चषकः। इङ्कटी[6] ॥ * ॥ कूपको गुणवृक्षः। कूपकी ॥ * ॥ न्यग्रोधो वटः। न्यग्रोधी ॥ * ॥ क्षिपका। आयुधम्। क्षिपकी ॥ * ॥ हिरण्यं सुवर्णम्। हिरण्यी[7] ॥ * ॥ फलकम् आकाङ्क्षितसिद्धिरावरणं वा[8]।

---

१ °परिवापकंटकाः° D. E.

२ गर्त्तेत्कटौ° D.; गर्त्तेकटौ E.; °पुकचुका° F.; A. om. text and comm.

३ यद्यपि प्रेक्षिशब्दः प्रेक्षकवाची तथाप्यत्र° Yajñ.

४ Thus also Yajñ. (यवास इति क्वचित्पाठः); यवास Bö., Hem.; om. K.V.

५ चुकृ° चुकी C. F.; वुकृ° वुकी B. D. K.—[पुकृ दानम्° । बुकृ हास्यम्° । Yajñ.]

६ इत्कटं वकषः इङ्कढी D.; इङ्कटं° इङ्कटी F. K.—इङ्कट Bö., Yajñ.; इङ्काट Hem.; इर्कुट K.V.ed., कर्कट *a.*; cf. śl. 294.

७ हिरिणी B. C. K.; हिरिण्णी D. —हिरण्य Bö., Yajñ.; हरिण्य Hem.; om. Kâś. V.

८ °सिद्धिः वरणं वा D.—हलका Bö., Yajñ.; फलका Hem., *v.l.* Bö.; om. Kâś. V. [हलका पुरविशेषस्तस्यादूरभवो हलकी ग्रामः। Yajñ.].

फलकी ॥ * ॥ कूपगर्तपरिवापयवासहिरण्यशब्दाः[1] शकटाङ्गजमतेनो-पात्ताः ॥ २९९ ॥ इति प्रेक्षादिः ॥

मध्विक्षू शररोमवेणुमरुतः शक्तीष्टकारिष्टयो[2]
वार्दालीशकलाकरीरकिशरासन्दीशलाकाहिमाः[3]।
स्थाणुस्तक्षशिलाबिसासुतिशमीसर्याणपार्दामिषी-[4]
कर्कन्धूवटवेटऋष्यरुमणी वल्मीकपीडाखडाः[5] ॥ ३०० ॥

मध्वादेर्मत्[6] ॥ * ॥ मधु पुष्परसादिः । तदत्र देशेऽस्ति । मधु-मान्देशः ॥ * ॥ दृक्षू रसालः । दृक्षुमान् ॥ * ॥ शरो मुञ्जः । शरावान् । शरादीत्यादिना दीर्घत्वे ॥ शरूरित्यन्यः[7] ॥ * ॥ रोम तनूरुहम् । रो-मवान् ॥ * ॥ वेणुमान् ॥ * ॥ मरुतो देवा वायुश्च । मरुत्वान् ॥ * ॥ शक्तिः प्रहरणम् । शक्तिमान् ॥ शुक्तिरित्यन्यः[8] ॥ * ॥ इष्टका मृद्वि-कारः । इष्टकावान् ॥ * ॥ रिष्टिश्चन्द्रहासः । रिष्टिमान् ॥ मदिरा-जातीयः संधानविशेषो रिष्टिशब्द इति वामनः[9] ॥ * ॥ वार्दाली । ओषधिविशेषः । वार्दालीवान् ॥ पार्दाकीत्येके[10] ॥ * ॥ शकलो मत्स्यः । शकलावान् । कृतदीर्घोऽयं पठितः । शकलीवानित्यन्ये[11] ॥ * ॥ करीरो

---

१ °हिरिण्यशब्दाः D.

२ शक्तीष्टकाऋष्टयो E.

३ किसरा° B. C. F. K.; कसरा° D.; शलाकीहिमाः C.

४ °समी° D.; शर्याण° E.

५ °कर्बंधू° वेटऋष्यरुमलो° E.; °रु-मतो° B. C. F. K.; वेटऋचकमतो° D.

६ °मतुः D.

७ त्सरूरित्यन्यः F.; om. D.—Hem. has शरू cf. next page, n. १; others शर.

८ Hem. शुक्ति; the others शक्ति.

९ D. om. from मदिराविशेषः.—मदिराजातीयः संधानविशेषो रिष्टिः। चंद्रहासो रिष्टिरित्यन्ये । रिष्टिमान् Yajñ.; Bö. रूष्टि; Kâṣ. V. ed. मुष्टि (*v.l.* हृष्टि), MS. *a.* रिष्ट; Hem. ऋषि.

१० वार्दाकीत्येके D.; om. F.—वा-र्दाली Bö., Yajñ.; पार्दाकी Hem.; दर्वाघाट K. V. ed., दर्वाक *a.*; cf. next page, note १.

११ शकली Hem.; शकल (शकला) Bö., Yajñ.; om. Kâṣ. V.

वृक्षविशेषः । करीरवान् ॥ * ॥ किंशरो गन्धद्रव्यम् । किंशरावान् । तृणजातिः ॥ किंशरुरित्यन्यः[1] ॥ * ॥ आसन्दी वेत्रासनम् । आसन्दीवान् ॥ * ॥ शलाका । एषणीपूरणरेखा[2] द्यूतोपकरणं च । शलाकावान् ॥ * ॥ हिमं तुहिनम् । हिमवान् ॥ * ॥ स्थाणुमान् । यवादेराकृतिगणत्वादत्त्वाभावः[3] ॥ * ॥ तक्षशिला नगरी । तक्षशिलावान् ॥ अक्षशिलेत्यन्यः । अक्षवान् । शिलावानित्येके[4] ॥ * ॥ बिसवान् ॥ * ॥ आसुतिः सोमरसः । आसुतिमान् ॥ आसुतीवानिति वामनाद्याः । ते ह्यासुतीशब्दं पठन्ति ॥ सुत्येत्यन्यः[5] ॥ * ॥ शमी वृक्षः । शमीवान्[6] ॥ * ॥ सर्याणः पर्वतः । सर्याणवान् ॥ सार्याण[7] इत्यन्ये ॥ * ॥ पार्दो वृक्षः । पार्दावान् ॥ पार्दा नाम काचित्स्त्रीत्यन्ये[8] ॥ * ॥ आमिषी । ओषधिः । आमिषीवान्[9] ॥ * ॥ कर्कन्धूः क्षुद्रबदरी । कर्कन्धूमान् । कर्कन्धुरित्यन्यः[10] ॥ * ॥ वटो न्यग्रोधः । वटावान् ॥ * ॥ वेटः पीलुवृक्षः । वेटावान् ॥ * ॥ ऋष्यो मृगविशेषः । ऋष्यावान्[11] ॥ * ॥ रुमाँल्लवणविशे-

---

१ किसरो° किसरावान्° किसरु° B. C. F. K.—किंशर (°रा) Bö., K.V.; किसर (°रा) Yajñ., Hem.—Hem. has also कीशरु [? orig. a misreading; MS. Hem. has पार्दा । कीशरु । इष्टका । पार्दाकीशरु । (*i.e.* पार्दाकी । शरु ।)].

२ °रेषा B. C. D. K.; एषिणी D.; om. C.

३ °गणत्वाभावः C. K.; om. D.; cf. śl. 414.

४ शलावानित्येके B. C. K.—Hem. has तक्षशिला & अक्षशिला; the others तक्षशिला only.

५ सुतेत्यन्यः B. F. and orig. K.; om. D.—Hem. has आसुति and सुत्या; the others आसुति only.

६ समी° समीवान् D.

७ सर्याण इत्यन्ये B. C. K.; सार्यापा इत्यन्ये D.; (? सर्याणवान् । सार्पण इत्यन्ये !).—शर्याण Bö., Yajñ.; सार्पण Hem.; शर्प्पणा Kâś. V. ed., शर्यणा *a.* [शर्याणः पर्वतः । शर्याणवान् Yajñ.]. For the correct forms see the St. Petersb. Dict. *s.v.* शर्यण, शर्यणावन्त्.

८ पार्दा Hem.; om. others; cf. n. १.

९ B. K. add वर्त्ततेत्यन्यः; C. वर्त्तीतत्यन्यः; F. वर्त्वतेत्यन्यः ।

१० Hem. both; कर्कन्धू Bö., Yajñ.; कर्कन्धु K. V.

११ ऋष्य Yajñ., Kâś. V. *a.*; ऋक्ष Kâś. V. ed.; रुष्य Bö.; ऋषि Hem.

षस्तरुविशेषो[1] वा। रुमण्वान्[2]॥ रुवदित्यन्यः॥*॥ वल्मीको नाकुः। वल्मीकावान्। अयं दिग्वस्त्रमतेन॥*॥ पीडावान्॥*॥ खडस्तृण-जातिः। खडावान्॥*॥ अनद्यर्थमारम्भः[3]॥ ३००॥ इति मध्यादिः॥

उत्कराश्मखदिरास्तृणवृक्षाविन्द्रवृक्षतिकपिप्पलशाकाः।
आर्द्रवृक्षकपलाशसुवर्णश्यावनायसहिता विजिगीषा[4]॥३०१॥

उत्करादेञ्कः॥*॥ उत्करो दृषत्यांसुप्रचयः। सोऽस्यास्तीत्युत्क-रीयं नगरम्॥*॥ अश्मीयम्॥*॥ खदिरो वृक्षः। खदिरीयम्॥*॥ तृणीयम्॥*॥ वृक्षीयम्॥*॥ इन्द्रवृक्षीयम्॥*॥ तिको राजा। तिकीयम्॥*॥ पिप्पलोऽश्वत्थः। पिप्पलीयम्॥*॥ शाकं भक्ष्यवि-शेषः। शाकीयम्॥*॥ आर्द्रवृक्षीयम्[5]॥*॥ पलाशीयम्॥*॥ सुव-र्णीयम्॥*॥ श्यावनायो मुनिः। श्यावनायीयम्॥*॥ विजिगीषी-यम्॥ ३०१॥

शालानेकखलाजिनातपफला जन्याजिनं पिप्पली-[6]
मूलं संपरशूर्पणायपिचुका भस्त्रा च नैवाकवः[7]।
उत्क्रोशार्कनितान्तवृक्षशफरा गर्ताग्निवैराकणाः[8]
काशारण्यनिशान्तपर्णकितवाः क्षुद्राणकक्षान्तयः[9]॥३०२॥

---

१ रुमल्लवर्ण° B. C. F. K.; रुमाल्ल-स्तरुविशेषस्तरुविशेषो D.

२ रुमत्वान् MSS. (!); D. om. रुवदित्यन्यः.—Hem. has रुवत्, om. others.

३ अनूद्यर्थमारंभः D.; cf. P. iv. 2, 85.

४ A. om. text and comment.

५ आर्द्रवृक्षक Bö.; आर्द्रवृक्ष the others and Bö. v. l. [? °क here adjectively].

६ °षलाजिनातप° B.; जन्याजनं° B. F.; पलाजिनातपफली° जन्याजन-पि° C.; °जान्याजिनं° D.

७ °नैचाकवः F.

८ °वृक्षशफला° B.; °वृक्षसफषरा गर्ता° D.

९ क्षुद्राणवक्षांतयः B.; °कक्षाक्षयः E.; A. om. text and comment.

शालीयम् ॥ * ॥ अनेकीयम् ॥ * ॥ खलाजिनीयम् ॥ खण्डाजिन[1] दृत्यन्यः ॥ * ॥ आतपीयम् ॥ * ॥ फलीयम् ॥ * ॥ जन्या वधूस्तद्वाहिका[2] वा । जन्यीयम् ॥ * ॥ अजिनीयम्[3] ॥ * ॥ पिप्पलीमूलीयम् ॥ * ॥ संपरो मुनिः । संपरीयम् ॥ * ॥ शूर्पणाखो मुनो राक्षसो वा । शूर्पणाखीयम्[4] ॥ * ॥ पिचुकस्थूलकम्[5] । पिचुकीयम् ॥ * ॥ भस्त्रीयम् ॥ * ॥ निवाकुर्निर्गुणः । तस्य निवासो नैवाकवः । तस्यादूरभवं नैवाकवीयम्[6] ॥ * ॥ उत्क्रोशः कुररः[7] । उत्क्रोशीयम् ॥ * ॥ अर्को गुल्मः सूर्यश्च । अर्कीयम् ॥ * ॥ नितान्ता वृक्षा यत्र सन्ति स नितान्तवृक्षो देशः । तस्यादूरभवं नितान्तवृक्षीयम् ॥ * ॥ शफरो मत्स्यः । शफरीयम्[8] ॥ * ॥ गर्तीयम् ॥ * ॥ अग्नीयम् ॥ * ॥ वैराकणो नामर्षिः । वैराकणीयम्[9] ॥ * ॥ काशीयम् ॥ * ॥ अरण्यीयम् ॥ * ॥ निशान्तम् अन्तःपुरम् । निशान्तीयम् ॥ * ॥ पर्णीयम् ॥ * ॥ कितवो धूर्तो गन्धद्रव्यं च । कितवीयम् ॥ * ॥ क्षुद्रीयम् ॥ क्षुद्रा राक्षसी तन्निवासः क्षुद्रीयमित्यन्ये[10] ॥ * ॥ अणकम् अधमम् । अणकीयम् ॥ * ॥ क्षान्तीयम् ॥ क्षान्त इति भोजः[11] ॥ ३०२ ॥

---

१ Hem. both; the others खलाजिन.

२ °तद्वाहका B. C. F. K.

३ [अ suppl. K.] जनीयं B. F. K.; om. C.

४ सूर्पणायो° सूर्प° B. C. F. K.

५ पिचकस्थूरकं B.K.; पिचकस्तूरकं° C.; पिचुकः स्थूलकं D.

६ निचाकु° नैवाकव° नैचाकवीयं K.; °चा° F. throughout.—नैचाकव Hem.; नैवाकव Bö., Yajñ.; नैव । वक° Kâṣ. V. ed., *a.*; cf. śl. 204.

७ कुरुरः B. C. D. K.

८ सफरो° सफरीयं D.—Hem. संफर, the others शफर.

९ वैराकाणीयं B.; वैराक । णीयं D.—वैराकण Yajñ.; वैराणक Bö., Hem.; om. Kâṣ. V.

१० Yajñ. notices both readings; Hem. काश । क्षुद्रा २ । (२ generally indicates that the two preceding words are to be taken both combined and separate).

११ क्षान्त Bö.; शान्त Kâṣ. V. ed.; क्षांति Yajñ., Kâṣ. V. *a.*; om. Hem.

अश्वत्थनीचापकशंकरेडावरोहितक्षारविशालवेचाः ।
अरीहणचैवणचर्मखण्डवातागराः संपलमन्त्रणार्हाः[1] ॥ ३०३ ॥

अश्वत्थीयम् ॥ * ॥ नीचानाप्नोतीति । नीचापकः । नीचापकीयम् ॥ * ॥ शंकरीयम् ॥ * ॥ दृढाः स्त्रियः । दृढीयम्[2] ॥ * ॥ अवरोहितो नामर्षिः । अवरोहितीयम् ॥ * ॥ क्षारीयम् ॥ क्षोध[3] इत्यन्यः ॥ * ॥ विशालो नामर्षिः । विशालीयम् ॥ * ॥ वेचीयम् ॥ क्षारवेचौ वामनमतेन ॥ * ॥ अरीहणः पुंविशेषः । अरीहणीयम् ॥ * ॥ त्रिवेण्या अपत्यं चैवणः । तस्य निवासस्त्रैवणीयम् ॥ * ॥ चर्मीयम् । शास्त्राभिधानवाचि वर्णणित्यन्यः[4] ॥ * ॥ खण्डीयम् ॥ * ॥ वातागरीयम् ॥ * ॥ संपलो[5] मुनिः । संपलीयम् ॥ * ॥ मन्त्रणार्हीयम् ॥ * ॥ उत्करादीञ्छप्रत्ययान्तान् केचित्पुंलिङ्गान् अपरे स्त्रीलिङ्गानाऊः[6] ॥

एतेऽष्टादशाकृतिगणा वेदितव्याः । तेनान्येऽपि शब्दा यथादर्शनं द्रष्टव्याः । अन्येषु नैयत्यमेषां प्रतिपादितम् । एतदीयशब्दानां चत्वारोऽप्यर्था यथासंभवं द्रष्टव्याः ॥ ३०२ ॥ इत्युत्करादिः ॥

शौनकोऽथ तलवाजसनेयौ रज्जुकण्ठकठशाठकषायाः ।
स्कन्धसाङ्गरवतुम्बुरुताण्ड्या[7] रज्जुभारकमलारुणयश्च ॥ ३०४ ॥

शौनकादिभ्यो णिन् इत्यनेन तेन प्रोक्तं वेदं विद्वान्यधीयते वेत्यर्थ-

---

१ सपल° C.; सरालमंचणार्हौ D.; A. om. text and comm.

२ ईडा° ईडीयं all MSS.; the other works have दृडा.

३ ? Thus B. F., and (? चाध) K.; चोद C.; चांत D.—चांध MS. Hem.; चार Bö., Yajñ. [क्रोध इत्यन्ये Yajñ.]; om. Kâś. V.

४ Thus B.F.K., ? वर्मन्, or suff. ण्यण्; °वाधिवर्ण्यणि° D.; °वाविवर्ण्यणि° C.

५ सफल C.—संफल Bö., Yajñ., Kâś. V. ed. (संहल *a.*); संपल । संफर । संफल । संफुल । Hem. (cf. संपर).

६ D. om. from उत्करादीन्.

७ °तुंवुरतांड्या B.; °तुवुरु° E.; तंगवुरु° D.; A. om. text and comm.

योर्णिन्भवति ॥ * ॥ शौनकेन प्रोक्तं वेदं विदन्त्यधीयते वा। शौनकिनः ॥ * ॥ तालिनः ॥ * ॥ वाजसनाया अपत्यं वाजसनेयः। वाजसनेयिनः ॥ * ॥ राज्जुकण्ठिनः ॥ * ॥ काठशाठिनः। कठशाठाभ्यां प्रोक्तवेदवेदकाः ॥ * ॥ कषायिणः ॥ कषय[1] इति वामनः ॥ * ॥ स्कान्भिनः। स्कन्द[2] इति चन्द्रः ॥ * ॥ साङ्गरविणः[3] ॥ * ॥ तौम्बुरविणः ॥ * ॥ ताण्डिनः[4]। शकटाङ्गजभोजमतेन ॥ * ॥ राज्जुभारिणः ॥ * ॥ कामलिनः ॥ * ॥ आरुणिनः ॥ ३०४ ॥

हरिद्रुशाष्पेयपलिङ्गयुक्ताः
शापेयखाडायनदेवदर्शाः।
श्यामायनालम्बिऋचाभदण्डाः
स्तम्भोलपौ स्तः परुषांसकश्च[5] ॥ ३०५ ॥

हारिद्रविणः ॥ * ॥ शष्पमिव शष्पः। तस्यापत्यं शाष्पेयः। शाष्पेयिणः ॥ * ॥ पालिङ्गिनः। पुलिङ्ग[6] इति वामनः ॥ * ॥ शपस्यापत्यं शापेयः। शापेयिनः ॥ शाफेय[7] इत्यन्ये ॥ * ॥ खडस्यापत्यं नडादिफाण[8]। खाडायनः। खाडायनिनः ॥ * ॥ दैवदर्शिनः। वेददर्श इति वामनः[9] ॥ * ॥ श्यामायनिनः ॥ * ॥ अलम्बस्यापत्यम् आलम्बिः।

---

१ ? कापाया C.—कषाय Bö., Yajñ.; कशाय K. V. ed., om. *a.*; कखाय Hem.

२ स्कंध C. F. K.—स्कन्ध Bö., Yajñ., K. V. ed., Hem.; स्कन्द K. V. ed., *a.*

३ सागरविणः D.—शार्ङ्गरव Bö., Yajñ., Kâś. V. ed.; साङ्गरव Hem., also Kâś. V. ed., संगर *a.*

४ ताडिनः B. C. K.

५ श्यामायिनालंबिरुचाभ° B.C.K.; °रचाभदंडा° E.; ऋवदंडा° D.; °तंडा(:) स्तंभोलुपौ° B. D. F. K.; पुरुषांशुकश्च D. E.; A. om. text and comm.

६ ? Thus B. D. K.; पुंलिंग C. F.—पलिंग Hem.; पलङ्ग (पालंगिनः) Pâṇ. iv. 3, 104 scholl.; also Kâś. V. ed. *ib.* (फलिंग MS. *a.*).

७ Thus Hem.; शापेय Bö., Yajñ.; सांपेय K. V. ed., कापेय *a.*

८ षडस्यापत्यं° पञ्चि B. C. K.; पावे D.; not in (âkṛiti) gaṇa *naḍâdi*, 232.6.

९ ? देवदर्शन Bö., Yajñ.; देवदर्श Hem.; देवदत्तशठ (!) Kâś. V. ed.; शंभुदेव। दश। *a.*

आलम्बिनः ॥ * ॥ आर्चाभिनः ॥ ऋचभाग इत्यभयनन्दी[1] ॥ * ॥ दाण्डिनः[2]। चन्द्रवामनमतेन ॥ * ॥ स्तम्भिनः। स्कम्भ[3] इति शकटाङ्गजः ॥ * ॥ औलपिनः[4] ॥ * ॥ पुरुषे अंशे अस्य। पुरुषांसकः। पारुषांसकिनः[5] ॥

सर्वेऽप्येते सोपज्ञवेदशाखानां[6] प्रणेतारः प्रसिद्धाः। तदभिधायिनस्तु प्रोक्तप्रत्ययान्ताः शब्दा अध्येत्रादिविषयत्वात्खात्यमुल्लङ्घ्य प्रयोगभाजो न स्युः[7]। भोजमतमाश्रित्य वामनोक्तः कलापिशब्दप्राच्यादिविशेषो[8] नाश्रितः ॥ आकृतिगणोऽयम्। तेन तलवकाराश्वपञ्चमदावकण्ठैतरेयभाल्लविशाख्यायनप्रभृतयो द्रष्टव्याः ॥ ३०५ ॥ इति यौनकादिः ॥

उक्थन्यासवसन्तयज्ञशिशिरं चर्चा पुराणं गणः
संज्ञातर्कपदक्रमाश्च गणितं लक्ष्यं च लोकायतम्[9]।
आयुर्वेदगुणेतिहासचरमं हेमन्तहेतू यजुर्
वर्षाज्योतिषसंहिता शरदथो संघाटवृत्तीतरम् ॥ ३०६ ॥

कतूक्थादेष्ठण् इत्यनेन क्रतुवाचिन उक्थादेश्च ठण् ॥ * ॥ उक्थशब्दः सामसलक्षणो ग्रन्थ औक्थिक्ये वर्तमानो गृह्यते। उक्थं[10] वेत्य-

---

१ अर्चाभिनः° B. C. F. K.; आर्च्चधिनः° इत्यभयनंदी D.

२ तांडिनः B. C. F. K.—दण्ड Bö., Yajñ.; om. Hem., Kâṣ. V.

३ Hem. has both; the others स्तम्भ.

४ उलेपिनः C.; अलुपिनः D.; P. iv. 3, 104 scholl.

५ पुरुषे अंशे अस्य पुरुषांशकः। पैरषांशकिनः D.—पुरुषांसक Bö.; पुरुषासक Kâṣ. V. ed.; पुरुषांसक (क्वचित्पुरुषांसक इति पाठः) Yajñ.; Hem. both.

६ सोमवेद° D.; °वेदसामानां B. C. K.; वेदशास्त्राणां F.

७ °प्रयोगः। श्रीभोजः स्युः। D.

८ कलापिशिष्य° F.; D. om. fr. भोजमतमाश्रित्य to व्योम वीक्ष्य in śl. 334.

९ लौकायतं F. K.—E. om. this śloka; A. D. om. text and comment.

१० उक्थं B. C. K.

धीते वा । औक्थिकः । औक्थिकयशब्दाच्च प्रत्ययो न भवत्यनभिधानात् ॥ शकटाङ्गजस्तु याज्ञिकौक्थिकलौकायतिकान्[1] ब्रह्मणीत्येतत्सूत्रमाह । यज्ञोक्थाभ्यां ठण् । याज्ञिकौक्थिकयशब्दाभ्यां च ठण् दृक्यलोपश्च निपात्यते । यज्ञं याज्ञिकं वा वेत्त्यधीते वा । याज्ञिकः । एवम् औक्थिकः । लोकायतशब्दाट्ठणीकारः । लौकायतिकः । लौकायतिक इति[2] न्यायादिपाठात्सिद्धम् ॥ * ॥ न्यासः पञ्जिका । नैयायिकः ॥ * ॥ वसन्तशब्दः कालसहचरिताध्ययने वर्तमानः प्रत्ययं लभते। एवं शिशिरहेमन्तवर्षाशरद्ग्रीष्मशब्दा द्रष्टव्याः । वासन्तिकः ॥ * ॥ यज्ञार्थो ग्रन्थो यज्ञः[3] । याज्ञिकः ॥ * ॥ चर्चा विचारणा[4] । चार्चिकः । चर्चाक इति वामनः ॥ * ॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुवंशचरितं[5] पुराणं पञ्चलक्षणम् ॥

पुरापि न नवं पुराणमिति निरुक्तम् । पौराणिकः ॥ * ॥ गाणिकः ॥ * ॥ सांज्ञिकः ॥ * ॥ तार्किकः ॥ * ॥ पादक्रमिकः ॥ अन्यस्तु पदक्रमावित्याह । तन्मते क्रमादिपाठादुनपि[6] ॥ * ॥ गाणितिकः । गाणित इति वामनादयः ॥ * ॥ लाक्षिकः ॥ * ॥ लोकायतं बृहस्पतिमतानुसारि चार्वाकशास्त्रम् । लौकायतिकः ॥ * ॥ आयुर्वेदिकः ॥ * ॥ गौणिकः ॥ * ॥ इत्येवं हासश्चित्तविकाशो[7] यस्मिन्स इतिहासः ॥ अथवा । इति । ह ।

---

१ °लोकायतिकान् B. C. K.

२ ? B. F. K. apparently twice लौकायतिक (& no । before; ? once । लो); °इत्यत्रे C.—Śâkaṭâyana (like Hem. vi. 2, 119) evidently has a gaṇa *nyâyâdi* corresp. to our *ukthâdi* (? and *vasantâdi*), cf. p. 350, note 1.

३ ग्रंथः । याज्ञः MSS. (B. C. F. K.).

४ °यद्वांगरागश्चर्चा तत्प्रकारख्यापको ग्रंथोऽपि चर्चा Yajñ.

५ The usual reading is: वंशानुचरितं चैव; cf. Wilson, Vishṇu P. (Hall) vol. i. p. vii.

६ Cf. P. iv. 2, 61, and śl. 311.

७ °चित्तविकासो MSS. (B.C.F.K.).

आसीदिति यत्रेति। इत्येवमर्थे। हः किलार्थे पूर्वचरितम्॥ ऐतिहासिकः॥ * ॥ चारमिकः। चरमप्रथमशब्दौ विशेषणवृत्ती विशेष्यस्य तु ग्रन्थस्य प्रक्रमात्प्रतीतिः। यद्वा क्रियाविशेषणवृत्ती। चरममधीते। चारमिकः॥ चरमो गुणश्चरमगुणः। तस्य चारमगुणिक इत्यन्ये॥ * ॥ हैमन्तिकः॥ * ॥ हैतुकः॥ * ॥ याजुष्कः। वामनमतेन॥ * ॥ वार्षिकः[1] ॥ * ॥ ज्योतींष्यधिकृत्य कृतो ग्रन्थः। ज्योतिषम्। संज्ञापूर्वको विधिरनित्य इति॥ अथवा। अनुबन्धकृतमनित्यमित्यौर्न भवति। ज्यौतिषिकः। गणनिपातनाद्दैजभावः। ज्योतींषि ग्रहनक्षत्रादीनि वेत्ति ज्यौतिषिक[2] इति वामनचीरस्वामिनौ॥ * ॥ सांहितिकः॥ संहिता पदे विषयभूते प्रत्ययं लभते[3]। पदविषयां संहितामधीयानः सांहितिकः। अन्यत्राण्। सांहित इत्यन्यः॥ * ॥ शारदिकः॥ * ॥ सांघाटिकः॥ संगता घटाः संघटेत्यन्यः। सह घटया सघटेत्यन्यः। संघट इत्यपरः[4]॥ * ॥ वार्त्तिकः॥ * ॥ ऐतरिकः। वामनमतेन॥ ३०६॥

श्लक्ष्णानुमूलक्षणसंग्रहाः स्युर्
मीष्मो निरुक्तं पुनरुक्तमत्र।
आथर्वणोऽथ प्रथमानुकल्पौ
क्रमेतरन्यायकृतान्ततन्त्रम्[5]॥ ३०७॥

---

१ Om. MSS.

२ ?ज्योतिषिक MSS.—MS. Kshîr. on A. K. ii. 8, 1, 14 has: ज्योतींषि ग्रहादीनधिकृत्य कृतो ग्रंथो ज्योतिषः। ज्योतिषं वेद ज्यौतिषिकः.

३ प्रलयं° B.C., and orig. K.; लभते B. C. K.

४ सटेत्यन्यः। सट इत्यपरः। B.C.K.—Bö. संघट्ट (*v.l.* संघट); Yajñ. संघट्टो रचना। या पांचालीवैदर्भीत्यादिपदैरलंकारशास्त्रे व्यवह्रियते तल्लक्षणपरो ग्रंथोऽपि लक्षणया संघट्टस्तमधीते वेद वा सांघट्टिकः। केचित्संघाटं पठंति; Kâś. V. ed. संघात & संघत; Hem. संघट & संघटा.

५ A. D. om. text and comment.

स्नात्त्विकः । केचिच्छ्नाणशब्दात्स्त्रीलिङ्गात्प्रत्ययं मन्यन्ते[1] ॥ * ॥ अनुसूर्यग्रन्थविशेषः । आनुसुकः । केऽणञ्[2] इति ह्रस्वत्वे ॥ * ॥ लाक्षणिकः ॥ * ॥ सांग्रहिकः ॥ * ॥ ग्रैष्मिकः । चन्द्रमतेन ॥ * ॥ नैरुक्तिकः ॥ * ॥ पौनरुक्तिकः ॥ * ॥ अथर्वर्षिः । तेन प्रोक्तो वेद आथर्वणः । तं वेत्त्यधीते वा । आथर्वणिकः । पाठसामर्थ्याच्छ्नुग्न भवति[3] ॥ * ॥ प्राथमिकः । प्रथमो गुणः प्रथमगुण इत्यन्यः[4] ॥ * ॥ प्रथमकल्पादन्योऽनुकल्पः । आनुकल्पिकः ॥ * ॥ क्रमादितरः क्रमेतरः[5] । अक्रम इत्यर्थः । क्रामेतरिकः ॥ * ॥ नैयायिकः ॥ * ॥ कृतान्तं वेत्ति । कार्तान्तिको मौहूर्तः । कृतान्तमाह पृच्छति वा[6] । कार्तान्तिक इत्यन्यः ॥ * ॥ तन्यते तन्त्यते वानेन । तन्त्रं वैदिकं ज्योतिषादि । तान्त्रिकः । ज्ञातसिद्धान्तः ॥ ३०७ ॥

अनुगुणवर्षाशरद्द्विपदा[7] भारतपदेपदानुपदम् ।
अनुलक्ष्याख्यानं[8] स्याद्विशेषपरिषन्मुहूर्तमप्येके ॥ ३०८ ॥

गुणस्य सदृशं गुणमनुगतं वा । अनुगुणम् । आनुगुणिकः[9] ॥ * ॥ वर्षाश्च शरच्च[10] । वर्षाशरदम् । वार्षाशरदिकः ॥ * ॥ द्वैपदिकः[11] । विपदेति वामनः ॥ * ॥ भारतिकः ॥ * ॥ पदं पदमध्येता । वीप्सायां

---

१ पुनरुक्तं श्नाणम् अनुपदमिति त्रितयं ग्रंथविशेषवाचि Yajñ.

२ ? MSS. apparently के णड्य; cf. Pâṇ. vii. 4, 13.

३ Bö., Yajñ., Hem. both आथर्वण and अथर्वन्; Kâś. V. only अथर्वन् (ed. also अपर्वन्!).

४ Hem. has प्रथमगुण and गुण (not प्रथम); the others प्रथम and गुण.

५ क्रमेतरेति ग्रंथविशेषस्य संज्ञा Y.

६ कृतांतमापृच्छति वा B. C. K.

७ अनुगणवर्षाशरद्विपदा E.

८ अनुलक्षाख्यातं° E.; A. D. om. text and comment.

९ Om. B. C.

१० वर्षा शरच्च B. C. K.—वर्षाशरद् Hem.; om. others.

११ द्वैपदिकः B.; त्रि[illegible]— C.; om. K.—The other works have द्विपदा (K.V. ed. द्विपदी).

द्विर्वचने निपातनात्पूर्वपदस्यैत्वे । पादेपदिकः[1] ॥ * ॥ पदमनुगतम् अनुपदम् । आनुपदिकः ॥ * ॥ लक्ष्यमनुगतम् अनुलक्ष्यम् । आनुलक्ष्यिकः[2] ॥ * ॥ आख्यानिकः ॥ * ॥ अत्यन्तव्याकृतबुद्धिहेतुर्विशेषः । तं तच्छास्त्रं वा वेत्ति । वैशेषिकः ॥ * ॥ पारिषदिकः ॥ पर्षच्छब्दोऽपि । परिषकपार्षदाविति[3] वामनः ॥ * ॥ मौहूर्तिकः । वामनमतेन तु मौहूर्तः ॥ मुहूर्तमित्युपलक्षणम् । तेन नैमित्तिकः । अस्मिन्मते नैमित्तः ॥ ३०८ ॥

सुलक्षब्राह्मणावेतौ पदोत्तरपदादिकाः ।
असंसर्गाङ्गधर्मेचिक्षत्राद्विद्या परा मता[4] ॥ ३०९ ॥

सौलक्षिकः[5] ॥ * ॥ ब्राह्मणिकः ॥ * ॥ पदोत्तरपदं वेत्त्यधीते वा । पादोत्तरपदिकः ॥ शकटाङ्गजस्तु पदोत्तरपदेभ्यष्ठ इति सूत्रमाह । अस्यार्थः । पदशब्द उत्तरपदं यस्य ततः पदशब्दात्पदोत्तरशब्दाच्च ठः । पूर्वपदिकः । उत्तरपदिकः । न्यायादिपदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकाट्ठण् इत्यनेन[6] तु पौर्वपदिकः । औत्तरपदिकः । पदात्यदिकः । पदोत्तरपदात्यदोत्तरपदिकः । बहुवचनं सर्वभङ्गपरिहारार्थम्[7] ॥ * ॥ संसर्गादिवर्जितात्परो विद्याशब्दष्ठणं लभते[8] । वायसविद्यिकः । सार्वविद्यिकः ॥ असंसर्गादेरिति किम् । सांसर्गविद्यः ।

---

१ °पदस्यैत्वे B. C. K.—Hem. has likewise पदेपद; om. others.

२ आनुलक्षिकः B. C. K. (cf. P. iv. 2, 60, v. 7).

३ परिषक्° (? right) F.; cf. śl. 217; परिषद् Hem.; परिषद् Bö., Yajñ.

४ A. D. om. text and comment.

५ Hem. has सुलक्ष्य; om. others.

६ °लक्षणांतरित्वाख्या° B. C. K.; °तरिताख्या° F.—Cf. Hem. vi. 2, 119: न्यायादेरिकण् ॥ 120: पदकल्पलक्षणांतक्रत्वाख्यानाख्यायिकात् ॥ see Pâṇ. iv. 2, 60 with vârtts. 1. 5.

७ परिग्रहार्थं K. F.

८ Cf. Pâṇ. iv. 2, 60, vârtt. 3, and Kâś. V. *ib.*

शकटाङ्गजमतेन ॥ आङ्गविद्यः ॥ धार्मविद्यः ॥ त्रैविद्यः । अवयवा विद्या त्रिविद्येति कर्मधारयात्प्रत्ययश्रुतिः । तिसृणां विद्यानां बोद्धेत्यर्थे द्विगोः श्रुचि त्रिविद्यः ॥ चात्रविद्यः ॥ ३०९ ॥

कल्पलक्षणसूत्रान्तमकल्पादि मतं बुधैः ।
आख्यानाख्यायिकावाची[1] श्रुग्द्विगोः सर्वसादितः ॥ ३१० ॥

ब्राह्मणां ब्राह्म्यादीनां कल्पः पूजाद्यर्थं[2] शास्त्रम् । ब्राह्मकल्पिकः । रामायनकल्पिकः ॥ * ॥ गौलक्षणिकः ॥ * ॥ वार्त्तिसूत्रिकः[3] । सांग्रहसूत्रिकः ॥ अकल्पादीति सूत्रस्यैव विशेषणं तेन काल्पसूत्रः ॥ * ॥ आख्यानवाचिभ्य आख्यायिकावाचिभ्यश्च ठण् इत्यर्थः । यवक्रीतमाख्यानमधीते । यावक्रीतिकः । एवं प्रियंगवाविमानप्रभृतय[4] उदाहार्याः ॥ वासवदत्तामाख्यायिकामधीते । वासवदत्तिकः । एवं सुमनोहरानर्मदासुन्दरीतरङ्गवतीविलासवतीप्रभृतय[5] आख्यायिकाशब्दाष्ठणि द्रष्टव्याः । वासवदत्तादिसाहचर्याद्ग्रन्थोऽपि तथोच्यते । यथाऽग्निसहचरितो ग्रन्थोऽग्निः ॥ द्विगोः समासात्सर्वशब्दादेः सादेश्च शब्दाट्ठण् तस्य च श्रुक् । शकटाङ्गजस्येव ठणोः । पञ्चकल्पः[6] । त्रिलक्षणः । त्रिसूत्रः ॥ असंसर्गेत्यादिना ठण् तस्य श्रुक्[7] । तथा द्वितन्त्रः । पञ्चव्याकरणः ॥ सह वार्त्तिकेन यो ग्रन्थः स सवार्त्तिकः । तं वेत्ति ठणो

---

१ आख्यानाख्यायिवाची च B. K. (C.); A. D. om. text and comment.

२ कल्पपूजाद्यर्थं B. C. K.

३ Thus B. C. K., Hem.; वार्त्तिकसूत्रिकः F.

४ Hem. has यावक्रीतिकः । यावक्रिकः । प्रैयंगविकः । प्रैयंगुकः । आविमारविकः ॥ (? cf. अविमारक page 255, line 6).

५ सुमनोत्तरा° B. D. F.; सुमनोश्वरा° C.; B. C. om. विलासवती (K. suppl.).

६ °त्वणठणौ° B.; °यवकल्पः । C.

७ ठणुक्तस्य° B. C. K.; श्रुक् न । C.

लोपे। 'सवार्त्तिकः ॥ एवं ससंग्रहः। सर्ववेदः। सर्वतन्त्रः ॥ * ॥ आकृतिगणोऽयम्। अन्येऽपि यथादर्शनं ज्ञेयाः ॥ ३१० ॥ इत्युक्थादिः[1] ॥

क्रमः शिक्षा पदं चैव मीमांसा सामसंयुता[2]।
उपनिषत्तथा ज्ञेया गणे क्रमादिसंज्ञिते ॥ ३११ ॥

क्रमादिभ्य इत्यनेन क्रमादेरुद्वेत्त्यधीतेऽर्थे को भवति ॥ * ॥ क्रमं वेत्त्यधीते। क्रमकः ॥ * ॥ शिक्षा ग्रन्थविशेषः। शिक्षकः ॥ * ॥ पदकः ॥ * ॥ मीमांसा ग्रन्थविशेषः। मीमांसकः ॥ * ॥ सामकः ॥ * ॥ उपनिषद् वेदान्तो रहस्यं च[3]। उपनिषदकः। एतदर्थमेवाकारोच्चारणम्। शेषाणां कप्रत्ययेऽपि साध्यं सिद्धम्। अकप्रत्ययस्य टित्त्वप्रज्ञानं[4] युक्तम्। तेन शिक्षकी मीमांसकीत्याद्युपपन्नं स्त्रियां लक्ष्यते न त्वाडीति ॥ ३११ ॥ इति क्रमादिः ॥

इति

श्रीगोविन्दसूरिशिष्यपण्डितश्रीवर्धमानविरचितायां स्वीयगणरत्नमहोदधिवृत्तौ समूहविकारावयवचतुर्थवेत्त्यधीतेविहिततद्धितप्रत्ययगणनिर्णयो[5] नाम चतुर्थोऽध्यायः समाप्तः ॥

---

१ Hem. vi. 2, 119 न्यायादि including, as here, उक्थादि and वसन्तादि to P. iv. 2, 60; 63.

२ मीमांसाथ साम च E.—A. D. om. text and comment.

३ रहस्यं यः। B. C. K.—उपनिषद् not given by the other works; but Hem., who enumerates these words in a sûtra (vi. 2, 127), remarks in the comm.: उपनिषच्छब्दादपीच्छन्ति कश्चित्।

४ ट्टित्विप्रज्ञानं K.; द्वित्वि° B. C.; टित्वप्रतिज्ञातं F.; cf. P. iv. 1, 15.

५ °गणनिरूपणो E.

अथ पञ्चमोऽध्यायः ॥

अध्यात्ममुक्तीहपरत्रशेषाकस्मादमुचोर्ध्वदमाधिदेवाः ।
ऊर्ध्वदमश्चोर्ध्वमुहूर्तसर्वलोकावमुष्मिन्नधिभूतनिष्ठाः[1] ॥ ३१२ ॥

अध्यात्मादेरित्यनेनाध्यात्मादेः शेषे ठञ् भवति[2] ॥ * ॥ अध्यात्मे भवम् । आध्यात्मिकम् ॥ * ॥ मुक्तौ भवम् । मौक्तिकम् ॥ * ॥ ऐहिकम् । आगमिकोऽयं शब्दः । यथा पञ्चायतनमैहिकम् । किमस्य गणपाठेन । लोके चेहत्यमित्येव भवतीति कश्चित्सचेताः ॥ * ॥ परत्रामुष्मिन्नमुचशब्दाः परस्य लोकस्य वाचकाः । परत्र लोके भवम् । पारत्रिकम् ॥ * ॥ शेषे भवाः । शैषिकाः ॥ * ॥ अकस्मादित्यनेन हेतुशून्यः कालो लक्ष्यते । तत्र भवम् । आकस्मिकम् ॥ * ॥ अमुत्र लोके भवम् । आमुत्रिकम् ॥ * ॥ और्ध्वदमिकः । ऊर्ध्वे भव इत्यर्थः ॥ केचिद् ऊर्ध्वदमोर्ध्वदेहशब्दावनुशतिकादिषु मन्यमाना और्ध्वदामिकम् और्ध्वदैहिकमित्युदाहरन्ति[3] ॥ * ॥ अधिदेवे भवम् । आधिदैविकम् ॥ * ॥ और्ध्वदमिकम् । ऊर्ध्वशब्दसमानार्थो[4]ऽव्ययमनव्ययमूर्ध्वशब्दोऽप्यस्ति । मुगागमोऽन्येषाम् ॥ * ॥ और्ध्वमौहूर्तिकः । तत्रोर्ध्वमौहूर्तिक[5] इति ज्ञापकादुत्तरपदस्यैव ॥ * ॥ सार्वलौकिकम् ॥ * ॥ अमुष्मिँल्लोके भवम् ।

---

१ °अधिभूतिनिष्ठाः E.; A. D. om. text and comment.

२ C. om. from अध्यात्मादेरि°.

३ Similarly Hem. vi. 3, (79): केचिदूर्ध्वदमोर्ध्वदेहावनुशतिकादिषु पठन्ति । उभयपदवृद्धिमिच्छन्ति.

४ ? और्ध्वशब्द° F. K.; और्ध्वशब्द° B.; ऊर्ध्वशब्द° C.

५ तत्रोर्ध्व° B.; om. C. K.—और्ध्वमौहूर्तिकः । अत्र सप्तमी चोर्ध्वमौहूर्तिक इति ज्ञापकादुत्तरस्यैव वृद्धिः । Hem.

आमुष्मिकम् ॥ * ॥ आधिभौतिकम् ॥ * ॥ निष्टायां भवम् । नैष्ठिकम् । यथा ।

श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विसृज्य राघवः ।
विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित्[1] ॥ ३१२ ॥

स्यात्समानस्तदादिश्च तथा लोकः परेहतः ।
ऊर्ध्वोर्ध्वमः परो देहोऽध्यात्मादिराकृतिगणः[2] ॥ ३१३ ॥

सामानिकः ॥ * ॥ सामानयामिकः । सामानदेशिकः ॥ * ॥ पारलौकिकम् ॥ * ॥ ऐहलौकिकम् ॥ * ॥ और्ध्वदेहिकम्[3] । यथा ।

अकरोच्च तदौर्ध्वदेहिकं पिटभक्त्या पिटकार्यकल्पवित्[4] ॥ * ॥ और्ध्वदेहिकम् ॥ ३१३ ॥ इत्यध्यात्मादिः[5] ॥

नदीपावापुरी मावा श्रावस्ती धातकी मही[6] ।
वनाह्वासी च कौशाम्बी शाल्वाथो वडबा वृषे[7] ॥ ३१४ ॥

नदीकच्यादेर्ढञ्ढकञित्यनेन नद्यादिकच्यादिभ्यां शेषेऽर्थे ढञ्ढकणौ क्रमेण भवतः ॥ * ॥ नद्यां जातो भवो वा । नादेयः ॥ * ॥ पावा नगरी । पावेयः ॥ पामेति वामनः । पाठेति[8] भोजः ॥ * ॥ पौरेयः ॥ * ॥ मावा नगरी । मावेयः । मायेति भोजः । वामेति वामनः[9] ॥ * ॥

---

१ Raghuv, 8, 25 [विमुच्य राघवः। eds.].

२ A. D. om. text and comment.

३ ऊर्द्ध्वदेहिकं B. K.; और्द्ध्वदैहिकं C.

४ Raghuv. 8, 26.

५ Cf. Kâś. V. on P. iv. 3, 60.

६ नदी यावा E. (?); °स्त्रावस्ता धातका मही C.

७ कौशाम्बी° E.; A. D. om. text and comment.

८ पाढेति B.; पेठेति C. K.—पाठा Bö., Yajñ.; पावा Hem., Kâś. V. ed. (पापा *a.*).

९ माया Bö., Yajñ.; मावा Hem., Kâś. V. ed. (मामा *a.*).

श्रावस्ती नगरी। श्रावस्तेयः॥ * ॥ धातकेयः॥ * ॥ माहेयः॥ * ॥ वनवासी नगरी। वानवासेयः॥ * ॥ वानकौशाम्बेयः॥ * ॥ शाल्वेयः। माल्वा नगरीत्यन्यः[1]॥ * ॥ वाडबेयः। वृषः। वाडबोऽन्यः॥ ३१४॥

कौशाम्बी वनसेतकी गिरिगरी वाराणसी खादिरी
दार्वा काशफरी च पूर्वनगरी नद्यादिरेवं गणः।
कत्रिः कुण्डिनपुष्करौ च नगरीकुम्भ्युम्भिमाहिष्मती-
वर्मत्योऽथ च पौदनो[2] निगदितो ग्रामस्तथा पुष्कलः॥३१५॥

कौशाम्बी नगरी। कौशाम्बेयः॥ कौशाम्बीयेन वणिजेति[3] चिन्त्यम्॥ कौशम्बीत्यन्यः[4]॥ * ॥ वानेयः॥ * ॥ सेतकी पुरी। सैतकेयः॥ * ॥ गिरेरिदम्। गैरेयम्। शिलाजतु॥ * ॥ गारेयः॥ * ॥ वराणसी नदी[5]। तस्या अदूरभवा वाराणसी। वाराणसेयः॥ * ॥ खदिराणामदूरभवा। खादिरी नगरी। खादिरेयः॥ * ॥ दार्वा पुरी। दार्वेयः॥ * ॥ काशफरी नगरी। काशफरेयः॥ अन्यस्तु शफरीत्याह। काशस्रजीति[6] वामनः॥ * ॥ पौर्वनगरेयः। अन्यस्तु निपातनादिलेचि ह्रस्वत्वे च पूर्वनगिरेय[7] इत्याह॥ * ॥ आदैजाद्यग्भ्यो ढे[8] प्राप्ते। आवस्त्या-

---

१ ? माल्वनगरीत्यन्यः B.C.K.—शाल्वा Bö., Yajñ., K.V. *a.*; साल्वा K.V. ed.; साल्वा or. Hem., corrects माल्वा.

२ चर्मत्यो० C.F.K.; पोदनो C.F.; A. D. om. text and comment.

३ Ratnâv., ed. Cappeller in Böhtlingk's Chrest. p. 291, 15.

४ ? कौशांबी० MSS. (? को०); Hem. has कौशांबी & (added in margin) कौशंबी; the others कौशाम्बी only.

५ वाराणसा नदी B. C. K.; वाराणसी० F.; cf. p. 336, l. 9.

६ काशस्त्रालाति C.—K.V. ed., Hem. काशफरी; Bö., Yajñ. काशपरी। काशफरी (Bö. *v.l.* काशफारी); K. V. *a.* काशकरी। केशपरी। काशहरी.

७ केचित्तु पूर्वनगिरीति पठन्ति। विच्छिद्य च प्रत्ययं कुर्वन्ति। पौरेयम्। वानेयम्। गैरेयमिति। तदुभयमपि दर्शनं प्रमाणम्॥ K. V. iv. 2, 97.—MS. Hem. has पूर्वनगर। पूर्वनगरी। पूर्वनागरी। पूर्वनगिरि। पुर्। वन। गिरि। वनगिरि.

८ ? आदैजाद्यभ्यः ढे F.; °ग्भ्यः। ढे (or ढे) K.; [? °द्यग्भ्यो ढे cf. P. iv. 1, 121].

दिभ्य ईरोपान्त्यादकञ् इत्यनेनाकञि[1]। शेषेभ्योऽणि प्राप्ते वचनम् ॥ * ॥ इति नद्यादिः ॥

कुत्सिताख्यः कत्तयः। बहुव्रीहिर्वा कत्तिः। अस्मादेव निपातनात् कुशब्दस्य किंशब्दस्य वा कदादेशः। कत्तयाणां कत्तेर्वा गर्दभ्या इदम्। कात्तेयकम् ॥ * ॥ कुण्डिनं पुरम्। कौण्डिनेयकः। कुडिनेति[2] वामनः ॥ * ॥ पौष्करेयकः ॥ * ॥ नागरेयकः। नगरशब्दः[3] संज्ञावाची गृह्यते ॥ * ॥ कुम्भिर्नाम[4] ग्रामः। कौम्भेयकः ॥ * ॥ औम्भेयकः। औम्भिरित्यन्ये[5]। उम्भिरित्यन्यः ॥ * ॥ माहिष्मती नाम नदी पुरी वा। माहिष्मतेयकः ॥ * ॥ वर्मती नदी। वार्मतेयकः। चर्मण्वतीति[6] वामनः ॥ * ॥ पुदना नाम नदी। तस्या अदूरभवं पौदनं नाम नगरं ग्रामो वा। पौदनेयकः ॥ मोदन इति भोजः। सोदन[7] इति वामनः ॥ * ॥ ग्रामेयकः। ग्रामाद्यञ्खञावित्यनेन[8] ग्राम्यो ग्रामीण इत्यपि ॥ * ॥ पुष्कलो बाह्लीकग्रामः। पौष्कलेयकः ॥ ३१५ ॥

कुण्डाकुड्ये ग्रामात्कुण्डा कुण्यावल्ये[9] वन्यामुल्ये।
उल्यातृण्ये भाण्डावुल्ये प्राज्ञैः प्रोक्ते यलोपे च[10] ॥ ३१६ ॥

---

१ ईरौपांत्या° C.; °दिकञित्य° B. C. K.; cf. P. iv. 2, 123 (अकञ्=वुञ्).

२ ? कुंडिना Hem. (thus here?); the others कुण्डिन.

३ ? नगरी°; the other works have नगर.

४ The other works have कुम्भी.

५ औभिरित्यन्ये। औभेयकः F.; उभेयकः। उभिरित्यन्ये C.—Hem. has उंभि, औम्भि & उम्पि; the others उम्भि.

६ चर्मती° चार्मतेयकः B. F. K.; वर्मण्वती C.—Bö., Yajñ. वर्मती (P. iv. 3, 94); K. V. चर्मण्वती (P. viii. 2, 12) and *v.l.* वर्मती; Hem. वर्मती & चर्मण्वती (? व°).

७ ? सौदन F.; मोदन B. C.; B. om. मोदन इति भोजः.—Hem. has पौदन (? पौंदन); the others मोदन.

८ ग्रामाद्यञ्ठञा° F.; °द्य अवञ्ञावित्यनेन B. C. D.; cf. Pân. iv. 2, 94.

९ कुल्यावल्ये F.

१० उल्यातृण्ये B. C. K.; उद्यातृण्ये° बुल्ये° F.; भाण्ड्यातुल्ये° प्रोक्ता° E.; A. D. om. text and comment.

कुण्ड्या अम्रदेशे नदी। कौण्डेयकः॥ * ॥ कौडेयकः॥ * ॥ ग्रामस्य कुण्ड्या। ग्रामकुण्ड्या ग्रामो नगरं वा। ग्रामकुण्डेयकः॥ * ॥ कौणेयकः[1]॥ * ॥ वालेयकः[2]॥ * ॥ वानेयकः॥ * ॥ मौलेयकः॥ * ॥ औखेयकः[3]॥ * ॥ तार्णेयकः॥ * ॥ भाण्डेयकः॥ * ॥ वौलेयकः[4]॥ * ॥ यलोपे चेति यस्य लोप इत्यर्थः। कुड्याया[5] यलोपश्चेति गणसूत्रं वामनोक्तमुपलक्षणं द्रष्टव्यम्॥

विद्युन्माला छन्दः। मौ गौ चेत्सा विद्युन्माला॥ ३१६॥ इति कच्यादिः[6]॥

गहानृशंसी समशुक्लपक्षौ
खाडायनानन्तरपार्श्वतोऽन्याः[7]।
इष्वग्रसाङ्गन्तरभौजिबैज्या-
ध्यग्नीष्वनीकैकपलाशिकाङ्गाः[8]॥ ३१७॥

गहादित्यदाद्यादेजाद्यचो जिङ्काकात्यहरितकात्याच्छ[9] इत्यनेन गहादेः शेषेऽर्थे छो भवति॥ * ॥ गहे ग्रामे भवो जातो वा। गह्यः॥ * ॥ नृञ्शंसति द्रुह्यतीति नृशंसः। द्रोहार्थे शंसतिर्द्रष्टव्यः। न नृशंसोऽनृशंसः। तस्यापत्यम् आनृशंसिः। आनृशंस्यः॥ * ॥ समीयः।

---

१ कौलेयकः F.—कुण्या Hem.; om. by the others.

२ Hem. has मल्या instead; the others have neither.

३ औलेयकः B. F. K.; उल्ले° C.—उल्ल्या Hem.; उख्या others [औख्येयकं Yajñ.].

४ पुल्या Hem.; om. others.

५ कुंड्याया B. C. K.; cf. Kâś. V. iv. 2, 95.

६ Hem. has a special *gaṇa* कुण्ड्यादि comprising the words ending in *yâ* (śl. 316), of which the other works have only उख्या & कुड्या.

७ गहीनृषंसी° पार्श्वतोथ। E.

८ °शाङ्गांतर° F.; °पलासिकांगाः B. E.; °पलाशकांगाः C.; A. D. om. text and comment.

९ Thus F., cf. P. i. 1, 73-4; °द्वैजाद्यवो हरितकात्या छ B. C. K.

समादागतं समीयम् ॥ नृहेतोर्मयड्रूप्यौ[1] वा । समरूप्यं सममयमपि ॥ * ॥ शुक्लपचीयम् ॥ * ॥ खाडायनो मुनिः । खाडायनीयः । खाडायनिरिति भोजः[2] ॥ * ॥ अनन्तरीयः[3] ॥ * ॥ पार्श्वत आगतः । पार्श्वतीयः । मुखपार्श्वैकात्तसो[4] लोपश्चेति गणसूत्रमाह[5] वामनः । अस्माभिस्त्वन्यदीयमतमाश्रित्य त्रयाणां सामान्येन पाठः कृतः ॥ * ॥ अन्यदीयः । तथा च ।

अन्यदीयविशिखे न केवलं
निःस्पृहस्य भवितव्यमार्हते[6] ॥ * ॥

दृषोरयम् दृष्ययम् । दृष्ययीयः[7] ॥ * ॥ साडस्यापत्यं साडिः । साडीयः[8] ॥ * ॥ अन्तरीयः । तथा च ।

पर्यस्यत्पृथुमणिमेखलांशुजालं
संजज्ञे युतकमिवान्तरीयमूर्वोः[9] ॥ * ॥

भोजस्यापत्यं भौजिः । भौजीयः ॥ भोजिरित्यन्यः[10] ॥ * ॥ बैजीयः ॥ * ॥ अश्वमधितिष्ठति । अश्वयः । तस्यापत्यम् आश्वयिः । आश्वयीयः ॥ * ॥ दृषूणामनीकम् दृष्वनीकम् । दृष्वनीकीयम् ॥ * ॥ एका चासौ पलाशिका च । एकपलाशिका । एकपलाशिकीयः ॥ एकपलाश[11] इति वामनः ॥ * ॥ अङ्गीयः ॥ ३१७ ॥

---

१ See Pân. iv. 3, 81-2.

२ Hem., Kâś. V. ed. खाडायनि; Bö., Yajñ. खाडायन.

३ आनंतरीयः MSS. (B. C. F. K.); all other works read अनन्तर.

४ ? मुखपार्श्वकात्तसो MSS.—Of the others only Hem. has एकतस्; cf. Kâś. V. iv. 2, 138.—Kramadîśvara also, quoting the Chândrâḥ, forms एकतीय.

५ गणे सूत्रमाह B. K.

६ Kirât. 13, 46.

७ °दृष्वग्रीयो व्रणः । दृष्वग्रं नाम ग्रामं इति केचित् । Yajñ.

८ शाडस्य° शाडिः शडीयः B. C. F. K. (स in text).—साटि Hem., om. others.

९ Kirât. 7, 14.

१० ? भौजि । भौज्जी (or भौर्ज्ज) । Hem.; the others भौजि only.

११ Thus all other works.

अन्तस्योत्तमदैवशर्मिविषमव्याड्यासुरिश्रौतयः
शौङ्गिः शैशिरिपूर्वपक्षमगधा दन्तायकाठेरणी[1]।
मत्वर्थापरपक्षमुत्तरकतौ वाल्मीकिवाराटकी
कामप्रस्थसमानशाखमुखतोऽवस्यन्दनामिचयः॥ ३१८॥

अन्ते तिष्ठतीत्यन्तस्थः। अन्तस्थीयः॥ अन्तस्था नगरीत्यन्यः॥*॥ उत्तमीयः॥*॥ देवशर्मणोऽपत्यं दैवशर्मिः। दैवशर्मीयः॥*॥ विषमे देशे भवो विषमीयः। विषमादागतं विषमीयम्। विषमरूप्यम्। विषममयम्॥ समविषमौ नाम ग्रामावित्यन्ये॥*॥ व्यडस्यापत्यं व्याडिः। व्याडीयः॥*॥ असुरस्य श्रुतस्य शुङ्गस्य शिशिरस्यापत्यं तत्र भवः। आसुरीयः[2]॥ श्रौतीयः॥ शौङ्गीयः॥ शैशिरीयः॥*॥ पूर्वपत्नीयः॥ केचित्पूर्वपत्नापरपत्नभव इति पठन्ति। तन्मते पूर्वपत्नापरपत्नाभ्यां तत्र भव इत्यर्थे ङोऽन्यत्र ठणेव। पौर्वपत्निकः। आपरपत्निकः॥*॥ मगधीयः॥*॥ दन्तयोरयं दन्तायम्। अन्य इच्छयदन्तायौ ग्रामावित्याह। दन्तायीयः॥*॥ कठस्येरणः कठेरणः। तस्यापत्यं काठेरणिः। काठेरणीयः[3]॥ काठेरिणिरित्यन्यः[4]॥*॥ मत्वर्थीयः। मतुबर्थ इति वृद्धः॥*॥ अपरपत्नीयः॥*॥ उत्तरीयं वस्त्रं। तथा च।

सरिदुत्तरीयमिव संहतिमत्
स तरङ्गरङ्गि कलहंसकुलम्[5]॥

---

१ काठेरणा C.; काठेरिणी F.—A. D. om. text and comment.

२ आसुरि Hem., Kâś. V. ed. (वसुरि *a.*); आसुत् Bö.; आसुनोतीत्यासुत् क्विबंतमेतत् आसुतीयम् Yajñ.

३ कठस्येरिणः कठेरिणः °काठेरिणिः काठेरिणीयः B. C. F. K.; cf. śl. 29 comm.

४ काठिरणिरित्यन्यः B. C. K.—काठेरणि Bö., Yajñ.; कावेरणि (*v.l.* कामवेरणि) K. V. ed., कावेरिणि MS. *a.*; काठेरणि। काठेरिणि Hem. [कठेरणस्य काठेरणिः° Yajñ.].

५ Kirâtârj. 6, 6; स तरङ्गभङ्गि° eds.

कतीयः ॥ * ॥ वाल्मीकीयः । यथा ।

रथखनोत्कर्णमृगे वाल्मीकीये तपोवने[1] ॥

वराटकस्य वाराटकिः । वाराटकीयः ॥ वाराटिकिरित्यन्यः ॥ * ॥ कामप्रस्थीयः । इति वामनः[2] ॥ * ॥ समाना शाखा यस्यासौ समानशाखः । समानशाखीयः ॥ * ॥ मुखतीयः ॥ * ॥ अवस्यन्दनीयः । अवस्यन्द इत्यन्ये ॥ * ॥ अमित्रस्यापत्यम् आमित्रिः । आमित्रीयः ॥ ३१८ ॥

एकाधमोत्तमाच्छाखो यामश्चैकसमानतः ।
लावेरण्यग्निशर्माणावाहिंस्येकतसौ तथा[3] ॥ ३१९ ॥

शाख इति कृतद्रुख इत्यर्थः । एकशाखीयः ॥ अधमशाखीयः ॥ उत्तमशाखीयः ॥ * ॥ एकग्रामीयः ॥ समानग्रामीयः ॥ * ॥ लावरेरणो लावेरणः । तस्यापत्यं लावेरणिः । लावेरणीयः ॥ सौवेरणिरित्यन्यः[4] ॥ * ॥ अग्निशर्मीयः । आग्निशर्मिरित्यन्यः[5] ॥ * ॥ अहिंसस्यापत्यम् आहिंसिः । आहिंसीयः ॥ * ॥ एकतीयः ॥ ३१९ ॥

क्षैमधृत्विश्च[6] सौमिचिरेकवृक्षौपविन्द्वी[7] ।
हंसवङ्गौ तथाश्वत्थितन्त्वग्रौद्गाहमानयः[8] ॥ ३२० ॥

---

१ Raghuv. 15, 11; [रथखनोत्कण्ठमृगे° eds.]

२ कामप्रस्थीयः । वामप्रस्थीय इति वामनः । B. C.—All other works have कामप्रस्थ.

३ लावेरिण्य° F.; A. D. om. text and comment.

४ ? Thus MSS. (B. C. F. K.); लावेरणि Bö., Yajñ.; लावेरणि । लावेरिणि । लावीरणि । Hem.; om. Kâś. V. (सौवि । पारकि । ed. ?!).

५ आग्निशर्मि° Bö., Yajñ., Hem.; अग्निशर्मन् Kâś. V. ed., आग्निचंद्रि MS. *a.*

६ चैमवृत्तिश्च E. F.; चौमधृत्तिश्च C.

७ वृचैकविंदवि । E.; वृचोपविंदवी F.; वृचौ औपविंदवी orig. K.; °वृचौ उपेदवी C.

८ °तत्वग्रौद्गाहमानयः B.; C. and orig. K. om. from तन्त्वग्रौ to तस्यापत्यम् आश्वत्थिः.—A. D. om. text and comment.

क्षेमधूर्विनोऽपत्यं क्षैमधूर्तिः । क्षैमधूर्तीयः[1] ॥ * ॥ सौमित्रीयः ॥ * ॥ एकवृचीयः ॥ * ॥ औपबिन्दवीयः[2] ॥ * ॥ हंसीयः ॥ * ॥ वङ्गीयः ॥ * ॥ अश्वत्थो नाम कश्चिद्गोत्रकारी । तस्यापत्यम् आश्वत्थिः । आश्वत्थीयः ॥ * ॥ तत्त्वग्रीयः[3] ॥ * ॥ औद्गाहमानीयः ॥ ३२० ॥

कुट् च[4] स्वराजपरजनदेवानां णिच्छ वेणुकादिभ्यः ।
प्रस्थोत्तरपदवेत्रकमध्योत्तरकाश्च मध्यमिका[5] ॥ ३२१ ॥

स्वकीयः ॥ पाणिन्यादयस्तु स्वदेवशब्दौ न पठन्ति । तन्मते सौवं दैवमित्येव भवति[6] ॥ वामनमतेन गणकृतमनित्यमिति न्यायात् कुट्-छाभावे[7] ऽण्प्रत्यये सौवम् । उत्सादेश्चाञ्नित्यनेनाञि दैवमित्यपि संभाव्यते । महाकविप्रणीतप्रयोगदर्शनं चेत्क्रीयते तदा गहादिपाठः समाश्रयणीयः । तथा हि रुद्रस्य ।

विब्बोकः[8] सहजः पयोधरतटः कान्तोऽङ्गजो विभ्रमः
कण्ठाश्लेषसुहृच्च पञ्चमरवः श्लाघ्यो गुरुर्मन्मथः ।
संबन्धी विनयस्थिरं सहचरी लीलेति पण्याङ्गना
यस्यां स्वीयपरिग्रहं न रहयन्त्येकान्तयाता अपि ॥

यथा वा । एभिर्निदर्शनैः स्वीयैः परकीयैश्च पुष्कलैः[9] ॥

---

१ क्षेमवृत्तिनो० क्षैमवृत्तिः । क्षैमवृत्तीयः F.—क्षैमवृद्धि Bö., Yajñ.; क्षैमधन्वि Hem.; क्षेमवृद्धिन् Kâś. V. ed., क्षेमवृत्ति *a.*; cf. śl. 204.

२ औपबिंदवि Hem.; एक। विन्दवि Bö.; एक। वैंदवि Yâjñ.; om. Kâś. V.

३ तत्वग्रीयः B. C.

४ कुद्र B. K.; कुंडश्च C.; कुष्फः E. (कुट्=कुक् Kâś. V. iv. 2, 138; cf. P. iv. 2, 91 vârtt.).

५ ? Thus E.; मध्यमका B. F. K.; मेध्यकाः। C.; cf. next page, note 3.—A. D. om. text and comment.

६ See the *gaṇasûtra* कुरजनस्य परस्य च to which the *vârtt.* of Kâś. V. देवस्य चेति वक्तव्यं (iv. 2, 138).

७ कुटच्छाभावे B. K.; कुटठासदि C.; कुटच्चाभावे F.

८ Thus F.; विब्बोकः B. C. K.

९ Vâm. Kâvyâl. 4, 3, 33, comm.

राजकीयः। राज्ञ इदं राजकीयमित्यपि ॥ * ॥ परकीयः ॥ * ॥ जनकीयः ॥ * ॥ देवकीयः ॥ * ॥

णिच्छेति णोऽनुबन्धश्छप्रत्यय इत्यर्थः ॥ वेणुभिर्निर्वृत्तो वेणुकः। तत्र भवो जातो वा। वैणुकीयः ॥ * ॥ प्रास्थीयम्। प्रस्थके भवः। प्रास्थकीय इत्यन्यः[1] ॥ * ॥ औत्तरपदीयः ॥ * ॥ वैत्रकीयः ॥ * ॥ माध्यीयः[2] ॥ औत्तरकीयः ॥ मध्ये भवा मध्यमिका नाम नगरी। तस्यां भवो माध्यमिकीयः[3]। मध्यमक इत्यन्यः ॥ एते त्रयो वामनमतेन[3] ॥ * ॥ निपुणके भवो[4] निपुणकीय[5] इति केचिदुदाहरन्ति ॥ * ॥ वेणुकादिर्गहादावाकृतिगणः। तेनाभयनन्दिस्वीकृतौ पिटकमाटकशब्दावपि संगृहीतौ ॥ अङ्गमगधशब्दयो राष्ट्रात्कञि[6]। पूर्वपक्षशुक्लपक्षापरपक्षशब्दानां कालाट्ठञि[7]। कामप्रस्थशब्दात्प्रस्थेत्यादिनाकञि। इञन्तानामाद्यात्यौत्तरादीञ इत्यादिनाञि[6]। शेषेभ्यस्खणि प्राप्ते वचनम् ॥ २२१ ॥ इति गहादिः ॥

---

१ प्रस्थ। प्रस्थक Hem.; प्रास्थकीयं Kâṣ. V. ed. *v.l.* and MS. *a.* प्रास्थीयं; Bö. and Yajñ. do not specify the gaṇa *veṇukâdi.*

२ माधीयः C. K.—For the *gaṇasûtra* मध्यमध्यमं चाण् चरणे (Kâṣ. V. iv. 2, 138)—acc. to which मध्यमीय, माध्यम from मध्य—the grammar to which our work refers, probably had separate rules, as Hem. vi. 3, 65: पृथ्वीमध्यान्मध्यमश्चास्य। 66: निवासाच्चरणेऽण् ॥

३ ? मध्यमका नाम° माध्यमकीयः MSS. (B. C. F. K.); cf. Kielhorn, Ind. Ant. vii. p. 266.—Hem., on vi. 3, 67 (वेणुकादिभ्य ईयण्) reads माध्यमकीयः। माध्यमिकीयः।; Kâṣ. V. ed., *a.* माध्यमकीयम्.

४ निपुणकभवो B. C. K.

५ ? Thus MSS.; नैपुणकीय Hem.

६ ? राष्ट्राट्कञि cf. Pâṇ. iv. 2, 124 (राष्ट्र = जनपदावधि); cf. page 365, note 1.

७ See Pâṇ. iv. 3, 11; 2, 122; 2, 112.

काश्यच्युतौ मोदनमोदमानौ
गोवासनारिंदमदेवदत्ताः ।
संवाहसांयाति च हस्तिकर्षूः
कुनामचेदी करणं हिरण्यम्[1] ॥ ३२२ ॥

काश्यादिबाह्वीकग्रामाच्छेदञ्ञिठावित्यनेन काश्यादिभ्यो देशवाचिभ्यो बाह्वीकग्रामेभ्यश्च ठञ्ञिठौ प्रत्येकं भवतः ॥ * ॥ काश्यो जनपदाः । तेषु भवा जाता वा । काशिको । काशिका ॥ * ॥ अच्युतो ग्रामः । आच्युतिकी । आच्युतिका ॥ * ॥ मोदनानां[2] निवासो ग्रामो मोदनः । मौदनिकी । मौदनिका ॥ * ॥ मोदमानो ग्रामः । मौदमानिकी । मौदमानिका ॥ * ॥ गवां वासनो गोवासनः । तन्निवासो ग्रामो गोवासनः । गौवासनिकी । गौवासनिका[3] ॥ गौवासन[4] इत्यन्ये ॥ एषां देशादेवेडाद्यचेति[5] ढे प्राप्ते ॥ * ॥ अरीन्दमयति । अरिंदमो ग्रामः । आरिंदमिकी । आरिंदमिका ॥ * ॥ देवदत्तः प्राग्ग्रामः । दैवदत्तिकी । दैवदत्तिका । अस्य काश्यादिषु पाठः प्राग्देशार्थः । यस्तु बाह्वीकेषु ग्रामस्तस्मादणेव[6] । दैवदत्ती ॥ * ॥ संवाहयतीति संवाहः । तस्य निवासोऽपि संवाहः । सांवाहिकी । सांवाहिका ॥ सांवाह[7] इत्यन्ये ॥ * ॥ संयातस्यापत्यं सांयातिरादिराजः । तस्यापत्यं

---

१ करणा हिरण्यः B. C. K.; करणाहिरण्याः F.; करणो हिरण्यः E.; A. D. om. text and comment.

२ ? मोदनाया B. K.; मोदनी । या C.

३ गोवासानिकी । गोवासनिका B. C. K.

४ ? गोवासन MSS. (B. C. F. K.)—Hem. has गौवाशन and (suppl. in margin) गौवासन; Bö., Yajñ. गोवासन; Kâś. V. ed. गोधाशन, *a.* गोधासर.

५ ? °द्यवेति B. K.; °डाश्चेति F.; देशादेवेडत्रोचेति C.

६ देवदत्तं नाम वाह्वीकग्रामः । तत्र जातो दैवदत्तः । Hem.

७ संवाह B. C.—सांवाह Hem.; संवाह Bö., Yajñ., K. V.ed. (सांवाहि *a.*).

युवा सांयात्यः। कुरुकोसलेत्यादिना[1] ण्यचि तस्य बहुषु लुचि। सांयातयः। तन्निवासोऽपि जनपदसाहचर्यादुच्यते[2]॥ संयातो नाम कश्चित् तस्यापत्यं सांयातिः। तस्य निवासो ग्रामः सांयातिरित्येके। सांयातिकी। सांयातिका॥ * ॥ हास्तिकर्षुकी। हास्तिकर्षुका॥ * ॥ कुत्सितं नाम यस्य स कुनामा। तन्निवासोऽपि ग्रामः कुनामा। कौनामिकी। कौनामिका॥ कुनाम्नोऽपत्यं कौनाम[3] इत्यन्ये॥ कुलनाम इति वामनः॥ * ॥ चेदयो जनपदः। चैदिकी। चैदिका[4]॥ * ॥ करणं देशविशेषः। कारणिकी। कारणिका॥ * ॥ हैरण्यिकी। हैरण्यिका॥ ३२२॥

शकुलाददशयामौ हिरण्यकरणस्तथा।
सिन्धुदाससुधासोमच्छागान्मिचस्तथा सधात्[5]॥ ३२३॥

शकुलान्मत्स्यानत्तीति शाकुलादः। अथवा। शकुनां कुलान्यत्तीति निपातनाद्लोपे[6]। शाकुलादः। तन्निवासोऽपि ग्रामः। शाकुलादिकी। शाकुलादिका॥ शाकुलाद इति वामनः। खकुलाल[7] इत्यन्यः॥ * ॥ दाशग्रामिकी। दाशग्रामिका॥ दाशग्राम[8] इत्यन्ये॥ * ॥ हैरण्यकरणिकी। हैरण्यकरणिका॥ अन्येषां हैरण्य इति प्रकृतिः[9]। करण

---

१ पुरुकोसले° B. C. K.; cf. P. iv. 1, 171-2.

२ तन्निवास ऋषिजनपदः साह° F.; तन्निवासोर्षेजनपदसा° C. K.

३ कोनाम B. F. K.; om. C.—Hem. कौनाम; Bö., Yajñ., K. V. *a.*, *v.l.* ed. कुनामन्.

४ वेदयो° वैदिका वैदिकी C.—Bö. चेदि, *v.l.* वेदि; Hem. doubtful; K. V. ed. चेदि, *v.l.* वैदि; MS. *a.* चेदि and adds वेदि; Yajñ. चेदि। वेदीति केचित्.

५ A. D. om. text and comment.

६ निपातनाच्च लोपे B. C.

७ Thus F.; स्वकुला B. C. K.—Hem. has शकुलाद & श्वकुलाल; the others शकुलाद.

८ दशग्राम C.—Hem., Kâś. V. दासग्राम; Bö., Yajñ. दशग्राम.

९ MS. Hem. has हि[रण्यक suppl.] रण। है हिरण्य करणे।; the others have only हिरण्य & करण.

इति प्रत्ययार्थविशेषणम् । हैरण्किकः । परश्वादि करणमुच्यते[1] ॥ अन्ये ग्रामवाची हैरण्य[2] इति पठन्ति । तन्मते हैरण्यकी । कुठारी कुद्दालो वा[3] करणम् ॥ * ॥ सिन्धवो मित्राण्यस्य सिन्धुमित्रो देशः । सैन्धुमित्रिकी । सैन्धुमित्रिका ॥ * ॥ एवं दासमित्रः । दासमित्रिकी ॥ सौधामित्रिकी ॥ सौममित्रिकी ॥ छागमित्रिकी ॥ * ॥ सह मित्राण्यस्य । सधमित्रः[4] । निपातनाद् हस्य धकारे । साधमित्रिकी ॥ ३२३ ॥

युवदेवोपतो राजः कालात्कोपादिपूर्वतः ।
शौवावतानभारङ्गी अरित्रो भोजसंमतः[5] ॥ ३२४ ॥

युवराजस्य निवासोऽपि युवराजः । यौवराजिकी ॥ * ॥ एवं देवराजोपराजौ ग्रामौ । दैवराजिकी ॥ औपराजिकी ॥ * ॥ कालात्कोपादिपूर्वत इति कोपादयः पूर्वे यस्यासौ कोपादिपूर्वः । कौपकालिकी । कौपकालिका ॥ आपत्कालिकी ॥ पौर्णकालिकी ॥ और्ध्वकालिकी[6] ॥ प्राक्कालीनोत्तरकालीनार्वाक्कालीनप्रभृतिप्रयोगेषु स्वप्रत्ययो दृश्यते स चानुक्तोऽप्यवगन्तव्यः । अन्यथा बहुतरलक्ष्यक्षतिप्रसङ्गः स्यात् ॥ * ॥ शुनोऽवतानः श्वावतानो मणिः । तेन निर्वृत्तो ग्रामः । शौवावतानः । शौवावतानिकी ॥ * ॥ भारङ्गेर्निवासोऽपि भारङ्गिः । भारङ्गिकी । तारङ्गिरित्यन्ये[7] ॥ * ॥ अरित्रस्य निवासोऽप्यरित्रः । आरित्रिकी ॥ * ॥

---

१ कारणमुच्यते B. F. K.

२ ?हैरिण्य B. K.; cf. p. 337, n. ७; and p. 362, n. ९.

३ हैरिण्यकी° B. K.; हिरण्यकी° C.; °कुद्दाली वा K. F.; कुद्दाला वा B. C.

४ साधमित्रः B. C. K.

५ सौवावतान° B. C.; भारेगा अ° C.; A. D. om. text and comment.

६ Bö., Yajñ., Kâś. V. ed. (not MS. *a.*) add तत् (तात्कालिकी °का); for Hem. see व्यादि in list of *gaṇas*.

७ Thus F.; भारंगिरित्यन्ये B. K.; सारंगिरित्यन्ये C.—Hem. has भारिंग & तारंगि; Bö. भारङ्गी; Yajñ., Kâś. V. *a.* भारङ्गि; Kâś. V. ed. भौरिकि । भौलिङ्गि । (!).

देशादिति किम् । काशीनां चचियाणां क्षात्राः । काशीयाः ॥ देवदत्तो नाम कश्चित् । तस्य क्षात्राः । देवदत्तीयाः । दैवदत्ताः ॥ अच्युतादीनां क्वविषयाभावेऽपि काश्यादिपाठसामर्थ्यादञ्ञिठौ भवतः । काशिचेदिभ्यां[1] प्रस्थपुरेत्यादिना वञ्ञे वित्यादिना[2] वा ऽकञि ॥ सांयातिभारद्वाजिभ्याम् आद्यात्यौचादीञोऽञ्ञ्याच्यभरताभ्यामित्यनेनाणि[3] । आदैजाद्यचं क्वे ॥ हस्तिकर्षूश्वब्दात् प्राच्योष्ठञीत्यनेन[4] ठञि ॥ सिन्धुमित्रादिभ्य ईरोपान्तादकञ् इत्यनेनाकञि[5] ॥ शेषेभ्योऽणि प्राप्ते वचनम् ॥ ३२४ ॥ इति काश्यादिः ॥

पलदी गोमती गोष्ठी परिखा परिषत्तथा ।
बाहीकः शूरसेनश्च नैकती च पटच्चरः[6] ॥ ३२५ ॥

कोपान्तपलदीभ्योऽण् इत्यनेन कोपान्तात्पलद्यादेश्च देशवाचिनः शेषेऽर्थेऽणप्रत्ययो भवति ॥ * ॥ पलद्यां देशविशेषे जातो भवो वा । पालदः । पालदी । बाहीकग्रामलक्षणयोष्ठञ्ञिठयोः प्राप्तयोः ॥ * ॥ गोमती नदी । तत्सहचरितो देशो गोमती । गौमतः । ईरोपान्तादकञि प्राप्ते[7] ॥ * ॥ गौष्ठः[8] । बाहीकग्रामलक्षणयोष्ठञ्ञिठयोः ॥ * ॥ पारिखः ॥ पारिषदः पार्षदो वा । अनयोश्छेऽस्य बाहीकलक्षणयोष्ठञ्ञिठयोर्वा ॥ * ॥ बाहीकेषु भवो बाहीकः । गहादीत्यादिना

---

१ काशिविदिभ्यां C.; काशिचिदिभ्यां B. K.—? cf. P. iv. 2, 122.

२ See Pâṇ. iv. 2, 112-3.

३ वञ्ञेत्यादिना F.; cf. Pâṇ. iv. 2, 125.

४ प्राच्येष्ठञित्य° F.; cf. Pâṇ. iv. 2, 119-20.

५ See Pâṇ. iv. 2, 123.

६ सूरसेनश्च° E.; A. D. om. text and comment.

७ See Pâṇ. iv. 2, 117.

८ See Pâṇ. iv. 2, 123.

९ Bö., Yajñ., K. V. गौष्ठी; Hem. गौष्ठी । अन्ये तु गोष्ठी ।

के ॥ * ॥ शौरसेनः । प्रस्थपुरेत्यादिना[1] ॥ * ॥ नैकतः ॥ नैकीति[2] वामनः ॥ * ॥ पाटच्चरः । ईरोपान्तादकञि प्राप्ते ॥ ३२५ ॥

बहोः कमलजालाभ्यां कालात्कीटोऽथ रोमकः ।
सकृल्लोमोदपानौ च कमलात्कीकरो भिदा[3] ॥ ३२६ ॥

बाऊकीटः ॥ * ॥ कामलकीटः ॥ * ॥ जालकीटः ॥ * ॥ कालकीटः ॥ कलकूट इति वामनः[4] ॥ * ॥ रौमकः । देशादेवैराद्यच[5] इत्यनेन के ॥ * ॥ सकृल्लोम्नि भवः । साकृल्लोमः । निपातनान्नलोपः । अयं भोजमतेन ॥ यकृल्लोमन् इति वामनः[6] ॥ यकृल्लोमनखं चेत्यन्येऽपि[7] ॥ शकटाङ्गजस्तूदग्ग्रामाद् यकृल्लोम्न[8] इति विशेषसूत्रमाह । उदग्ग्रामवाची याकृल्लोमो[9]ऽत्रि । अन्यो याकृल्लोमनः[10] ॥ * ॥ औदपानः ॥ * ॥ कामलकीकरः ॥ * ॥ कामलभिदः ॥ अनुक्तानां तु बाध्यबाधकाभावः स्वयं द्रष्टव्यः[11] ॥ ३२६ ॥ इति पलद्यादिः ॥

---

१ The complete rule apparently includes P. iv. 2, 122 (121) & 124 (where it seems to have राष्ट्र for जनपदावधि). Hem. has the two rules vi. 3, 44: प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात् ॥ 45: राष्ट्रेभ्यः ॥ cf. p. 360, n. ६.

२ नैकाति C.; कैकीति B.—नैकती Bö., Yajñ.; नैतकी (*v.ll.* नैधिकी । नैकेती) Kâṣ. V. ed., नैरीकी MS. *a.*; नैकेती । तैकी । अन्ये तु नैकीं नैवीं च पठन्ति । Hem.

३ कमलाचीकरो भिदाः C. K.; A. D. om. text and comment.

४ कलकीट Bö., Yajñ., K. V. ed. *a.*; Kâṣ. V. ed. also कालकूट; om. Hem.

५ ? देशोदेः वैराद्यच C.; देशादेचैरा° F.

६ यकृल्लोम इति° B.; om. C. K.—The other works have यकृल्लोमन् (K. V. ed. *v.l.* सृ°).

७ ? यकृल्लोमन् खंडेत्यन्येऽपि F.

८ Hem. has the same rule, vi. 3, 28 उदग्ग्रामाद् यकृल्लोम्नः ॥

९ ? यकृल्लोमो MSS. (B. C. F. K.).

१० ? अन्ये याकृल्लोमानः B. C. K.

११ °बाधकभावो द्रष्टव्यः B. C. K.

कच्छः कुलूतः परसिन्धुसाल्वौ गन्धारसिन्धू स्थलसिन्धुवर्णौ[१]।
काश्मीररङ्कू कुरुसक्तुसिन्धू विजापकद्वीपकुलानुषण्डाः[२]॥३२७॥

कच्छादेरित्यनेन कच्छादेः शब्दगणाद्देशवाचिनः शेषेऽर्थेऽण् भवति ॥ * ॥ कच्छे भवः । काच्छः ॥ * ॥ कौलूतः ॥ उलूप इत्यन्ये[३] ॥ * ॥ परसिन्धुषु भवः । पारसैन्धवः । हृङ्गसिन्धूनामित्यनेनोभयपदारैच्[४] ॥ * ॥ साल्वः ॥ * ॥ गान्धारः ॥ * ॥ सिन्धुषु भवः । सैन्धवः । कम्बलः ॥ * ॥ स्थालसैन्धवः[५] ॥ * ॥ वर्णनाम ह्रदः । तस्मादूरभवो देशो वर्णुः । तत्र भवो वार्णवः ॥ * ॥ कश्मीरेषु भवः । काश्मीरः कुङ्कुमः ॥ * ॥ राङ्कवः । यद्वा रङ्कुर्मृगविशेषः । राङ्कवं मृगरोमजम् ॥ * ॥ कौरवम् ॥ कुरुयुगंधरादेत्यनेनाकञपि । कौरवको ऽस्यादिः[६] ॥ * ॥ साक्तुसैन्धवः ॥ * ॥ वैजापकः । वैजावक इति भोजः ॥ * ॥ द्वैपः ॥ * ॥ कौलः । अयं वामनमतेन ॥ कुल्व इत्यन्यः[७] ॥ * ॥ आनुषण्डः ॥ अनूषण्ड इत्यन्ये[८] ॥ ३२७ ॥

अङ्गारानूपकम्बोजा रज्जुकर्णुविरूपकाः[९]।
मधुमानन्तरीपश्च वापवाहावजात्परौ[१०] ॥ ३२८ ॥

---

१ °सिंधुशालौ° E.; °सिंधुवर्णौ B. C. K.

२ °कुलानुखंडाः B. C. F.

३ कुलूत Hem.; कुलून Kâś. V. ed., कुल्लून *a.*; कलूतर Bö., Yajñ.; Yajñ. adds: वर्धमानस्तु कलूतशब्दं(!) पपाठ। उलूपमित्यन्ये ॥

४ हृङ्गगंगसिंधूना° F.; cf. Pâṇ. vii. 3, 19.

५ The other works omit परसिन्धु, सक्तुसिन्धु & स्थलसिन्धु; but Hem. has सस्थाल। सिन्ध्वन्त।

६ ऽस्यादिः B. C. K.; कौरवः। कौत्सादिः F.; cf. P. iv. 2, 130.

७ Neither word is given by the other works.

८ Hem. has both forms; Bö. अनुषण्ड; Yajñ. अनुषंड [अनुखंड इति केचित् comm.]; अणु। खण्ड। (!) Kâś. V. ed.; om. MS. *a.*

९ अंगाराऽरूप° कर्णुतिरूपकाः E.; रज्जकर्णु° C.

१० पादवाहाव° E. (A. cf. next note); A. D. om. text and comment.

आङ्गारः । चन्द्रमतेन ॥ * ॥ आनूपः ॥ * ॥ काम्बोजः ॥ * ॥ राज्ञवः ॥ कार्णवः ॥ वैरूपकः ॥ त्रयं वामनमतेन ॥ * ॥ मधुमान्पर्वतः । तत्र भवो माधुमतः ॥ * ॥ आन्तरीपः ॥ आजवापः[1] ॥ द्वयं चन्द्रमतेन ॥ * ॥ आजवाहः ॥

एतेषां शब्दानां नृतत्स्थेऽकञ् इत्यनेनाकञि[2] ॥ काक्कको मनुष्यः । काक्ककमस्य हसितम् । काक्किका चूडा ॥ सैन्धवको मनुष्यः । सैन्धवकमस्य जल्पितम् । एवं सर्वत्र ॥ तथा अपदातौ साल्वात् । गोयवाग्वोरित्याभ्यामकञ् भवति[3] । साल्वको मनुष्यः । अपदाताविति किम् । साल्वः पदातिः । साल्वमस्य हसितम् । साल्वको गौः । साल्विका यवागूः । द्वैप्याच्चर्थीति[4] वचनात् । यमुनाद्वीपे जातो भवो वा । द्वैपको व्यासः । राष्ट्रार्थादकञि[5] प्राप्ते । बह्वलेलित्यनेन वा वचनम् ॥ अत्र प्रायेण कच्छादयः शब्दा जनपदवाचिनः ॥ ३२८ ॥ इति कच्छादिः ॥

धूमार्जुनावावयगर्तघोषाः
षडण्डसाकेतशशादनश्च ।
संस्तीयतीर्थारुणमित्रवर्चो
द्वीपान्तरीपोज्जयनीविदेहाः[6] ॥ ३२९ ॥

---

१ In A. the following passage is inserted in the comm. on śl. 128: आंतरीपः । आजपादः (cf. last note) । द्वयं चंद्रमतेन आजवाहः । एतेषां पदानां नृतत्स्थेऽकञित्यनेनाकञि कात्सको मनुष्यः । काक्कमस्य हसितं ।

२ Cf. Pāṇ. iv. 2, 134.

३ See Pāṇ. iv. 2, 135-6.

४ ? द्वौप्याऽन्वर्थीति B. K.; द्वीप्यात्वधीति C.; द्वेप्यादत्वर्णीति F. [? cf. P. iv. 3, 10; Hem. on vi. 3, 69 (द्वीपादनुसमुद्रं ण्यः ।) remarks: द्वैप्यो मनुष्यः । द्वैप्यमस्य हसितम् । अनुसमुद्रमिति किम् । अनुनदि यो द्वीपस्तस्माद् द्वैपको व्यासः । द्वैपकमस्य हसितम्].

५ राष्ट्रार्थादञि B. C. K.; cf. Pāṇ. iv. 2, 124-5.

६ °मित्रवर्ध्वा द्वीपांतरीयो° E.; मित्रचर्चा° C. F.; °पोज्जयिनी° B. C. F.; A. D. om. text and comment.

धूमादिदेशग्राक्कच्छाग्निवक्त्रवर्तान्तादित्यनेन[1] धूमादेः शब्दगणादकञ् भवति ॥ * ॥ धूमो ग्रामः । तत्र भवो धौमकः ॥ * ॥ ऋज्व्यो नावोऽस्य । ऋजुनौः । तस्य निवासस्तन्निर्वृत्तो[2] वा । आर्जुनावः । तत्र भव आर्जुनावकः । क्वे प्राप्ते[3] । अथायं बाह्वीकग्रामस्तदा क्वापवादयोष्ठञ्ञिठयोरकञ् ॥ * ॥ आवये भव आवयकः । आवयो नदीग्राम इत्यन्ये[4] ॥ आवयात्तीर्थे । आवयकं तीर्थम् । आवयमन्यदित्यन्यः ॥ * ॥ गार्तकः ॥ * ॥ घौषकः ॥ * ॥ षाडण्डकः । षडाण्ड[5] इत्यन्यः ॥ * ॥ साकेतकः ॥ * ॥ शाशादनकः । माषादन[6] इति वामनः ॥ * ॥ सांस्कीयकः । संस्कीय[7] इत्यन्ये ॥ * ॥ तैर्थकः ॥ * ॥ अरुणो ग्रामः । आरुणकः ॥ * ॥ मैत्रकः ॥ * ॥ वार्चकः[8] ॥ * ॥ द्वैपकः ॥ * ॥ आन्तरीपकः[9] ॥ * ॥ औज्जयनकः ॥ * ॥ वैदेहकः ॥ ३२८ ॥

सत्रासाहानर्तपाठेयपल्यः
शष्पाराड्यौ धार्तराज्ञी च कुक्षिः ।
ह्याहाव्याहावपाथेयवर्ज्या
आजीकूलो मांठरो बर्बरश्च[10] ॥ 330 ॥

---

१ धूमादिग्र° MSS.; cf. Pâṇ. iv. 2, 125-7.

२ °निवृत्तो B. C. F. K. always.

३ वृद्धाच्छे प्राप्ते Yajñ.; P. iv. 2, 114.

४ ? Thus MSS. (? नदी । ग्राम इत्यन्ये).—आवयं वाह्वीकग्रामः° । आवयो नदीग्राम इत्यन्ये । आवयात्तीर्थे° Yajñ.—Bö. आवय; Hem. अवय; K. V. ed. अवयात । तीर्थ; *a.* अवाट । तीर्थ ।

५ षडांद F.—षडंड । षडांड Hem.; षडण्ड Bö., Yajñ.; खण्ड, *v.l.* खडण्ड K. V. ed., षण्ड *a.*

६ माषोदन C.—All the other works have शशादन.

७ Thus Bö., Yajñ., Hem.; संहीय Kâś. V. ed., om. *a.*

८ ? चार्चकः F.; चार्चकः । वार्वकः । C.—मित्रवर्ध, *v. l.* मित्रवर्ध Bö., मित्रवर्ध [वर्धभानस्तु मित्र । वर्च ।] Yajñ.; om. Hem.; मित्र । (वल ।) Kâś. V. ed., om. MS. *a.*

९ आंतरीयकः F.

१० आजीकूलो° E.; वर्बरश्च E. K.; वर्ब्बरश्च B.; वर्ब्बरश्च C.—A. D. om. text and comment.

सत्रासाहो[1] राजा । तन्निवासोऽपि सः । सात्रासाहकः ॥ * ॥ आनर्ताः क्षत्रियाः । तन्निवासोऽपि सः । आनर्तकः ॥ * ॥ पाठेयस्य निवासोऽपि सः । पाठेयकः ॥ * ॥ पल्लिर्भिल्लनिवासः[2] । पाल्लकः ॥ * ॥ श्वघ्राणां बालहरिणानां स्थानं श्वघ्रम् । शाघ्रकः ॥ * ॥ अराज्ञी[3] नाम काचित्स्त्री । तस्या निवास आराज्ञी नगरी । आराज्ञकः ॥ अराज्ञीत्यन्यः[4] ॥ * ॥ धृता राजानो येन स धृतराजो नृपः । तन्निर्वृत्ता धार्तराज्ञी नगरी । धार्तराज्ञकः ॥ धार्तराष्ट्रीत्यप्यन्ये पठन्ति[5] । तत्र धृतं राष्ट्रमनेन । धृतराष्ट्रो राजा । तन्निर्वृत्ता धार्तराष्ट्री नगरी । धार्तराष्ट्रकः ॥ * ॥ कुचिर्नगकुक्षौ ग्रामः । कौचकः ॥ समुद्रकुचिरित्यन्ये पठन्ति । तन्मते सामुद्रकुचकः[6] ॥ * ॥ द्वावाहावौ यस्मिन्[7] । द्व्याहावो ग्रामः । एवं त्र्याहावः । द्वैयाहावकः । त्रैयाहावकः ॥ * ॥ पाथेयो ग्रामः । पाथेयकः ॥ * ॥ वर्ज्यो ग्रामः । वार्ज्यकः[7] ॥ * ॥ आञ्जीकूलो नाम ग्रामः । आञ्जीकूलकः[8] ॥ अञ्जिकूल[9] इति भोजः ॥ * ॥ माठरो ग्रामः । माठरकः ॥ * ॥ बर्बरो देशविशेषः । बार्बरकः ॥ वर्वड[10] इत्यन्यः ॥ ३३० ॥

---

१ Thus. Kâṣ. V.; सात्रासाह Bö., Yajñ.; Hem. both.

२ पल्ली Bö., Yajñ., Hem.; वल्ली *v.l.* K. V. ed., वल्लि *a.*

३ C. om. from अराज्ञी to द्वावाहावौ यस्मिन् । द्व्या.

४ आराज्ञीत्यन्यः MSS. (B. F. K.), cf. page 372, note 2. — आराज्ञी Bö., Yajñ., Kâṣ. V.; अराज्ञी and आराज्ञी Hem.

५ Hem. has these two & धार्तराष्ट्र; the others धार्तराज्ञी only.

६ सामुद्रकुचिकः F. — Hem. has कुचि and समुद्रकुचि; the others कुचि only.

७ वर्जो° वार्ज्यकः B. C. K.

८ आंजीमूलो° आंजीमूलकः B. K.; आंज्यमूलो° आंजामूलकः C.; ? आजीकूल cf. page 368, note 10.

९ ? आंजिकूल F. — आजीकूल Bö., Yajñ.; आञ्जीकूल K. V. ed.; आंगीकूल *a.*; अंजीकुल Hem.

१० कर्वड F.—बर्वड Hem.; the others वर्वर.

दक्षिणापथपट्टारौ समुद्रो नौमनुष्ययोः[१]।
मद्रकूलं च भक्षाली राजशब्दात्स्थलीगृहे[२]॥ ३३१॥

दक्षिणः पन्था दक्षिणापथः। ञ्याट्ले ह्रस्वश्च बञ्चलमिति[३] बञ्चलवचनादतः पाठाद्वा दीर्घः। दाक्षिणापथकः॥*॥ पट्टारो[४] ग्रामः। पाट्टारकः॥*॥ सामुद्रिका नौः। सामुद्रको मनुष्यः। अन्यत्र सामुद्रं लवणं जलं वा॥*॥ मद्राणां कूलं मद्रकूलम्। तत्समीपे ग्रामो मद्रकूलः। माद्रकूलकः॥*॥ भचाली ग्रामः। भाचालकः॥ भचादीत्यन्यः[५]॥*॥ राजस्थलकः॥*॥ राजगृहं नगरम्। राजगृहकः॥३३१॥

माहकादानकान्माषाद्घोषमानाट्टमद्रकात्[६]।
दाण्डायनसमुद्राभ्यां स्थलीशब्दः परो मतः॥ ३३२॥

माहकानां स्थली। माहकस्थली। माहकस्थलकः॥*॥ आनकस्थलकः॥*॥ माषस्थलकः॥*॥ घौषस्थलकः॥*॥ मानस्थलकः। मानकस्थलीत्यन्यः[७]॥*॥ आट्टस्थलकः[८]॥*॥ माद्रकस्थलकः[९]॥*॥ दण्डस्यापत्यं दाण्डिः। तस्यापत्यं युवा दाण्डायनः। तस्य स्थली

---

१ °पाट्टारी° B. C. F. K.; पदारौ E.

२ स्थलगृहे F.; A. D. om. text and comment.

३ ? ञ्याङ्ले ह्रस्वश्च° B. K. (perhaps right); ञ्याङ्वे° C.; ञ्याङे° F.; cf. p. 61, l. 5; p. 195, l. 2; p. 318, l. 15; P. vi. 3, 63-4.

४ ? पाट्टारो B. F. K.; पाट्टीरो C.—पट्टारः Bö., Yajñ.; om. Hem., K. V.

५ भचाली Bö., Yajñ.; भच्यादी। भच्यली। भच्याली। Hem.; भचास्थली K. V. ed., तचाली *a.*

६ मानाद्रिमद्रकात् B. C. F. K. (see note ८); °मडुकात् E.; A. D. om. text and comm.

७ मानस्थलीत्यन्यः B.—Hem. has both; Bö., Yajñ. मानस्थली; K. V. ed. *v.ll.* मनवल्ली & मानवस्थाली.

८ Thus acc. to E.; अट्टस्थली also Bö., Yajñ., Hem.; om. K. V.; आद्रिस्थलकः MSS. (B. C. F. K.); अद्रि° perhaps from misreading अद्द for अट्ट.

९ Bö. मद्रुकस्थली (? E. cf. n. ६); मद्रक° Yajñ., Hem.; om. K. V.

दाण्डायनस्थली । दाण्डायनस्थलकः ॥ * ॥ सामुद्रस्थलकः । अयं दिग्वस्त्रमतेन[1] ॥ ३३२ ॥

अर्जुनवातण्डायनविनादवणियावसायवाटूराः[2]।
कूलात्सौवीरिष्विमकान्तशकुन्तीकषायाश्च[3] ॥ 333 ॥

अर्जुनः पार्थोऽन्यो वा । तन्निवासोऽपि ग्रामोऽर्जुनः । आर्जुनकः ॥ * ॥ वातण्डायनकः[4] । अयं वामनमतेन ॥ अवतण्ड ऋषिग्राम[5] इत्यन्यः । वतण्ड इत्यपरः ॥ * ॥ विनादो ग्रामः । वैनादकः ॥ * ॥ अनुकम्पितो वणद्दत्तो वणियः[6] । वाणियकः ॥ * ॥ अवसायो ग्रामः । आवसायकः । अयं वामनमतेन[7] ॥ * ॥ वाटयतीति वाटूरो ग्रामः । वाटूरकः[8] ॥ खाटूर इत्यन्यः[9] ॥ * ॥ कौलको भवति सौवीरश्चेत् । कौलोऽन्यः ॥ कुलादित्यन्ये पठन्ति ॥ * ॥ द्रुमः कश्चित् । तस्य कान्त द्रुमकान्तः । ऐमकान्तकः ॥ * ॥ शाकुन्तकः[10] ॥ * ॥ काषायकः । अयं वामनमतेन ॥ * ॥ कृविषयेभ्यः प्राप्ते बाह्लीकग्रामेभ्यष्ठञ्ञिठयोः परिग्रिष्टेभ्योऽणि । विदेहानर्तपाठेयपाथेयानां प्रस्थपुरेत्यादिनाऽकञि[11] सिद्धे आदेशार्थः पाठः । तेन विदेहानामानर्तानां च क्षत्रियाणां स्वं वैदेह-

---

१ Also Bö., Yajñ., K. V, *a.*; om. Kâṣ. V. ed., Hem.

२ °वणिगाव E.; वादूराः C. E.; वाडूराः B.

३ °सकुंती° B. C. E.; A. D. om. text and comment.

४ वातंदाडायनकः C. K.; वातंडायनः F.

५ अवतंग° B.; ऋषिर्ग्राम B. C. K. —Hem. has अवतंड । तंडक । वतंडव ।; omitted by the others.

६ ? अनुकंतो° F.; cf. Pâṇ. v. 3, 76. —वणिय Hem.; om. by the others.

७ Not given by the other works.

८ वाडूरो° वाडूरकः B. K.; वाहयतीति वाहरो ग्रामा वाहरकः C.

९ Thus F. K.; खाडूर B. C.—Hem. वाडूर । खाडूर; om. by the others [cf. खदूर ṣl.220; खदूरक ṣl.215; *v.l.* °टू°].

१० साकुंतकः B. K.—शकुंति Hem.; not given by the other works.

११ See page 365, note 1.

कम्[1] आनर्तकम्। पाठेयस्य स्वं पाठेयकम्। एवं पट्टारमाठराराज्ञी-धार्तराज्ञीनाभीरोपान्तलादकञि[2] द्रष्टव्यम्॥ ३३३॥ इति धूमादिः॥

संध्या पञ्चदशी शश्वदमावास्या[3] चयोदशी।
प्रतिपत्संधिवेलाऽथ पौर्णमासी चतुर्दशी॥ 334॥

संध्यादिभावर्तुभ्यो[4] ऽण् इत्यनेन संध्यादिभ्यः कालवाचिभ्यः शेषेऽर्थेऽण् भवति॥ *॥ संध्याऽस्तमयकालः। तत्र भवं सांध्यं कर्म। यथा ममैव सिद्धराजवर्णने।

जाते यस्य प्रयाणे तुरगखुरपुटोत्खातरेणुप्रपञ्चे
तीव्रं ध्वान्तायमाने प्रसरति बहले सर्वतोदिक्कमस्मिन्।
भास्वच्चन्द्रार्कबिम्बग्रहगणरहितं व्योम वीक्ष्य प्रमुग्धाः
सांध्यं कर्मारभन्ते शिशुमुनिबटवो जातसंध्याभिशङ्काः[5]॥

पञ्चदशानां पूरणीयं पञ्चदशी। पाञ्चदशः॥ *॥ शश्वद्भवं शाश्वतम्॥ अशश्वत इत्यतः[6] शाश्वतिक इति ठणपि[7]। शकटाङ्गजमतमेतत्॥ संपदिति वामनः॥ *॥ आमावास्यः[8]। एकदेशविकृतस्यानन्यत्वाद-मावस्याशब्दादपि भवति। आमावस्यः[9]॥ *॥ चयोदशानां पूरणी

---

१ वैदेहिकं B. C. K.

२ पाट्टार°B.C.K.; °माठर आराज्ञी B. K.; °माठर आराज्ञी C.; cf. P. iv. 2, 123.

३ °शश्वदमावस्या B. C. K.; A. om. text and comment (but see note ५ for A. and D.).

४ संध्यादिभावर्षर्तुभ्यो B. C. K.—Hem.'s rule is भर्तुसंध्यादेरण्; cf. P. iv. 3, 16 (*sandhivelâdi*).

५ D. om. to व्योम वीक्ष्य, see page 344, note ८.—The passage from ध्वा- to पिचण्डकः in śl. 335 is inserted by A. in the comment on śl. 134, see p. 171, n. 3.

६ ? असश्वत इत्यतः। C. K.; असस्वत इत्यतः। A. B.; अश्वत इत्यन्यः। F.; अत्र शश्वच्च इत्यतः D.

७ शास्वतिक° A. B. C. K.; साश्वसिक° D.; ठणपीति A. D.—Hem. has शश्वत्; om. by the others.

८ अमावस्यः B. K.

९ °अमावास्याशब्दाद्° B. C.; आमावास्यः A. B. C.

चयोदशी । चायोदशः ॥ * ॥ प्रतिपद्यन्तेऽह्नाम्यस्याः । प्रतिपत् पचतिः ।

संधा प्रातिपदेनेव व्यतिभिन्ना[1] हिमांशुना ॥ * ॥

संधिवेला संधिकालः । सांधिवेलः ॥ * ॥ पूर्णो मास्यन्द्रो मासो वाऽस्यां तिथौ । पौर्णमासी[2] । अत एव गणपाठादणि । तत्र भवः पौर्णमासः ॥ * ॥ चातुर्दशः । कन्याकालाट्टञ्[3] इत्यनेन ठञि प्राप्तेऽखिधानम् ॥ २३४ ॥ इति संधादिः ॥

अश्मपादाशनिह्लादपिशाचाः शकुनिर्जयः ।
त्सवीकर्षपिचण्डाश्च निचयश्च नयो ह्रदः ॥ 335 ॥

कोऽश्मादेरित्यनेनाश्मादेः[4] सप्तम्यन्तात्तत्र साधुरित्यर्थे को भवति ॥ * ॥ अश्मन्यश्मकर्मणि कुशलः । अश्मकः ॥ * ॥ पादप्रक्षालनादौ कुशलः । पादकः ॥ * ॥ अशनिनिपातने साधुः । अशनिकः ॥ * ॥ ह्लादे प्रह्लादने साधुः । ह्लादकः ॥ * ॥ पिशाचापनयने साधुः । पिशाचकः ॥ * ॥ शकुनिरुतग्रहणादौ साधुः । शकुनिकः ॥ * ॥ जयकः ॥ * ॥ त्सरुकरणे साधुः । त्सरुकः ॥ * ॥ आकर्षणम् आकृष्यत आकर्षन्त्यस्मिन्निति वा । आकर्षो द्यूतम् अक्षः शारिफलकं[5] च । तत्करणे साधुः । आकर्षकः ॥ * ॥ पिचण्डापनयने साधुः । पिचण्डकः[6] ॥ * ॥ निचयकः । चय इत्यन्यः ॥ * ॥ नयकः ॥ * ॥ ह्रदकः । ह्राद इत्यन्ये[7] ॥

---

१ प्रतिभिन्ना F., perhaps right.

२ पूर्णामासी B. C. F. & orig. K.

३ कथाकाल० D.; cf. P. iv. 2, 102; 3, 11.—[? Hem. has rule वर्षाकालेभ्यः cf. P. iv. 3, 11; 18.]

४ कोश्मादिरित्य० A.; काश्मादे० B. C.; K. doubtful; अतसांदरित्य० D. —Hem.'s rule is काश्मादेः।

५ सारिफलकं A.—आक्षयते सुवर्णादिकमस्मिन्नित्याकर्षो निकषोपलः। तत्र कुशल आकर्षकः। आकर्षेति रेफरहितो मुख्यः पाठ इति दीक्षिताः। तत्राप्याकर्षति सुवर्णादिकमस्मिन्नित्येव विग्रहः। Yajñ.

६ See page 372, note ५.

७ Hem. ह्राद्; the others have both.

तत्र साधुरित्यर्थयोगादश्मादयः[1] शब्दास्तद्विषयायां क्रियायां वर्तमानाः प्रत्ययमुत्पादयन्ति ॥ ३३५ ॥ इत्यश्मादिः[2] ॥

कथेक्षुमांसौदनवृत्तिसंग्रहाः[3]
प्रवाससंघातनिवाससक्तवः ।
गुडो वितण्डाजनवादवेणवो
गणोपवासौ विकथागुणाविमौ ॥ ३३६ ॥

कथाप्रतिजनादिभ्यां ठञ्खञावित्यनेन कथादेः प्रतिजनादेश्च ठञ्खञौ क्रमेण भवतः ॥ * ॥ कथायां साधुः । काथिकः ॥ * ॥ ऐक्षुकः ॥ * ॥ मांसौदन इति व्यस्तसमस्तस्य ग्रहणम् । मांसिकः । औदनिकः । मांसौदनिकास्त्रेदयः[4] ॥ * ॥ वार्त्तिकः । धर्मदेशनानिपुणो वार्त्ताख्याननिपुणो वा ॥ * ॥ सांग्रहिकः ॥ * ॥ प्रावासिकः ॥ * ॥ सांघातिकः ॥ * ॥ नैवासिकः ॥ * ॥ साक्तुका यवाः ॥ * ॥ गौडिका इक्षवः ॥ * ॥ वैतण्डिकः ॥ * ॥ जनवादः कौलीनम् । जानवादिकः ॥ * ॥ वैणुका गिरयः ॥ * ॥ गाणिकः ॥ * ॥ औपवासिकः ॥ * ॥ स्त्रीभिक्षादिविषया कथा विकथा । वैकथिकः ॥ * ॥ गौणिकः ॥ ३३६ ॥

आयुर्वेदजनेवादौ संग्रामापूपसंकथाः ।
विश्वात्कथा च कुल्माषो[5] जनोवादोऽथ कुष्ठवित् ॥ ३३७ ॥

आयुर्वेदिकः[6] ॥ ननु वृत्तिसंग्रहगुणगणायुर्वेदानां पाठो निरर्थकः ।

---

१ साधुरित्यर्थः यो° C. K.; °इत्यन्यः यो° B.; इत्येवं योगाद° D.

२ आकर्षादि Pâṇ. v. 2, 64; अश्मादि Hem.

३ °मांसोदन° E.; A. om. text and comment.

४ °चेटयः C.; मांसौदनिकश्चेत्यादयः F.

५ कुल्माशो° E.; कुल्मोषो D.; A. om. text and comment.

६ Thus F., Yajñ.; आयुर्वैदिकः B. C. D. K.

उक्थादिपाठाट्ठण् सिद्धः । यो हि वृत्यादिषु साधुः स वृत्यादीनां बोद्धा भवत्येव । सत्यम् । अत्र पाठो द्विमर्थः । द्वयोर्वृत्त्योः साधुः । द्वैवृत्तिकः । त्रैवृत्तिक इत्यादि सिद्धम् ॥ * ॥ जने वादो जनेवादः । सप्तम्या अलुग् अत एव निपातनात् षष्ठ्या वैत्वम् । जानेवादिकः ॥ * ॥ सांग्रामिकः ॥ * ॥ आपूपिका गोधूमाः ॥ * ॥ संकथा ऽन्योन्यसंलापः । सांकथिकः ॥ * ॥ विश्वस्य कथा विश्वकथा । वैश्वकथिकः ॥ * ॥ कौल्माषिकाः कलायाः[1] ॥ * ॥ जनेषु निष्ठुरो वादो जनोवादः । उकारो निपातो मध्यभूतो नैष्ठुर्ये द्रष्टव्यः । अथवा षष्ठीसप्तम्योः स्थान उकारे ऽत एव निपातनात् । जानोवादिकः[2] ॥ * ॥ कुष्ठस्य श्वित्रस्य विज्ञानम् । तत्र साधुः कौष्ठवित्कः[3] । अयं वामनमतेन ॥ ३३७ ॥ इति कथादिः[4] ॥

जनः प्रतिमहद्विश्वपञ्चसर्वानुतः कुलम् ।
परामुष्यपरस्येभ्यः समेदंसंपराद्युगः[5] ॥ ३३८ ॥

जनं जनं प्रति प्रतिजनम् । तत्र साधुः प्रातिजनीनः । जने जने साधुरित्यर्थः ॥ * ॥ माहाजनीनः[6] ॥ * ॥ विश्वो जनो विश्वजनः । वैश्वजनीनः ॥ * ॥ पञ्चसु जनेषु साधुः । पाञ्चजनीनः । तद्धितद्विगोः खञ्[7] ॥ अथवा पञ्चानां जनः पञ्चजनः । पाञ्चजनीनः ॥ * ॥ सर्वो

---

१ Hem. has कुल्मास and गुल्मास.

२ Hem. has besides भृशोवाद and जनभृशोवाद.

३ कौष्टविष्कः B. K.; कौष्ठविष्कः C. F.; कौष्ठविकाः D.—Yajñ. has कुष्ठविद्° कौष्टविदिकः.

४ This gaṇa includes कथादि and गुडादि to P. iv. 4, 102-3; but Hem. also has कथादि only.

५ °भ्वर्वानुतः° E.; °परस्य स्यात्समेदं° E.; °परस्यात्स्यात्° D.; A. om. text and comment.

६ महाजनीनः B. C. F. K.; माहनीनः D.

७ तद्धितः द्विगोः° B. K. F.; तद्धितार्थात् द्विगोः खञ् Yajñ.

जनः सर्वजनः। सार्वजनीनः॥ शकटाङ्गजस्तु सर्वजनात्खञ्चेत्यनेन सूत्रेण सार्वजन्यः सार्वजनीन इत्याह[1]॥ * ॥ अनुगतो जनम् अनुजनः। जनं जनमनु। अनुजनः। आनुजनीनः। अयं शकटाङ्गजदिग्वस्त्रमतेन[2]॥ * ॥ कुलमिति परामुष्यपरस्मेभ्यः परं द्रष्टव्यम्। परं कुलं परकुलम्। परस्य वा कुलं परकुलम्। पारकुलीनः॥ आमुष्यकुलीनः। गणपाठात्षष्ठ्यलुक्॥ पादस्यकुलीनः। गणपाठात्षष्ठ्यलुक्॥ वाक्रोश इत्यनेन[3] वा यदा परकुलसंबन्धेनाक्रुश्यते॥ * ॥ समो युगोऽस्मिन्। समयुगो बलीवर्दः। समो युगः समयुगः। सममविषमं वा युगं कालविशेषः। सामयुगीनः॥ * ॥ ऐदंयुगीनः। अस्मिन्काले साधुरित्यर्थः॥ * ॥ संयुगं संग्रामः। सांयुगीनो भटः।

संयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः[4]॥ * ॥

परमिष्टमनवरम् अन्यद्वा[5] युगं परयुगम्। पारयुगीणः॥ * ॥

अत्र साधुर्योग्यः प्रवीणो वा गृह्यते। उपकारकवाची तु हितमित्यनेन[6] संगृहीतः। अत्र हि सूत्रकदम्बके सप्तम्यन्तात्प्रत्ययः। अग्रे तु हितार्थे चतुर्थ्यन्तात्प्रत्ययः। अतो न बाध्यबाधकभावः॥ ३३८॥ इति प्रतिजनादिः॥

दिग्वर्गपूगा गणपक्षमेधा
वंशानुवंशौ वनमित्रमेघाः।
धाय्यादिसाक्ष्यन्तरवेशकाशा
अव्यूथकालान्तरहोमुखाश्च[7]॥ ३३९॥

---

१ Hem. also does not include this word, but has a special rule: सर्वजनाण्खेनञौ। (*i.e.* ण्ख + ईनञ्).

२ Also Hem.; om. by others.

३ Cf. Pâṇ. vi. 3, 21.

४ Kumâras. ii. 57.

५ परिपिष्टमनवरतमन्यद्वा D.

६ Cf. Pâṇ. v. 1, 9 and vârtts.

७ °मुखाद्यौः B. C. F. K.; A. om. text and comment.

दिगादिदेहांशाद्य इत्यनेन[1] तत्र भव इत्यर्थे दिगादेर्यप्रत्ययो भवति ॥ * ॥ दिशि भवम् । दिश्यम् । यथा ।

विक्रीय दिश्यानि धनान्युरूणि
द्वैप्यानसावुत्तमलाभभाजः ।
तरीषु तत्त्यमफलञ्च भाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत्[2] ॥ * ॥

वर्ग्यः ॥ * ॥ पूग्यः ॥ * ॥ गण्यः ॥ * ॥ पत्त्यः ॥ * ॥ मेध्यः ॥ * ॥ वंश्यः ॥ * ॥ अनुवंश्यः ॥ * ॥ वन्यः करी ॥ * ॥ मित्र्यः ॥ * ॥ मेघ्यः ॥ * ॥ धाय्या सामिधेनी । धाय्यः ॥ धाय्या मित्रमस्येति ह्रस्वत्वे धाय्यमित्र इति केचित्[3] ॥ * ॥ आद्यः ॥ * ॥ साय्यः ॥ * ॥ अन्तरे भवः । आन्तर्यः ॥ अन्तरित्यन्ये । तन्मतेऽन्यः[4] ॥ * ॥ वेशे[5] प्रतिकर्मणि पुरे वा भवा । वेश्या । यथा । खास्तीर्णतल्परचितावसथः[6] क्षणेन
वेश्याजनः कृतनवप्रतिकर्मकाम्यः ।
खिन्नानखिन्नमतिरापततो मनुष्यान्
प्रत्यग्रहोच्चिरनिविष्ट इवोपचारैः ॥ * ॥

काश्यः[7] ॥ * ॥ अप्सु भवः । आप्स्यः[8] ॥ * ॥ यूथ्यः ॥ * ॥ काल्यः ॥ * ॥ अन्त्यः ॥ * ॥ रहस्यम् ॥ * ॥ मुख्यम्[9] ॥ ३२९ ॥

---

१ Hem. has the same sûtra.

२ Śiśupâlab. 3, 76.

३ D. om. from धाय्या मित्रमस्येति. —Hem. both combined and separate; the others separate only (धाय्य Bö.).

४ ?! Thus B. C. F. K.; D. om. from तन्मते.—Hem. both अन्तर and अन्तर्; the others अन्तर.

५ वेशे C. K.; विथे D.—वेश Bö.; वेश्या Hem.; विश K. V. ed., om. *a.*; वेशो नेपथ्यं वेश्या गृहं च तत्रभवा वेश्या Yajñ.

६ Śiśup. 5, 27 [आस्तीर्ण° eds.].

७ काश्यः C. K.; काश्युः B.—Not given by the other works.

८ आप्यः F.; cf. P. vi. 3, 1, v. 6.

९ C. F. K. add दिव्यं which is not given by the other works.

अमित्रजघनालीका आकाशाकालपथ्युखाः ।
माघन्यायकशा देशः संज्ञायामुदकं तथा[1] ॥ ३४० ॥

अमित्र्यः ॥ * ॥ जघन्यः ॥ * ॥ अलीक्यः ॥ * ॥ आकाश्यः ॥ * ॥ अकाल्यः । अयं चन्द्रवामनमतेन ॥ * ॥ पथ्यम् ॥ * ॥ उख्यम् । आकारान्तादप्युखाशब्दात्[2] पिठरादिवाचकाद्यः । कर्णपार्श्ववाचकात्तु देहांशद्वारैणैव सिद्धे इति केचित् ॥ * ॥ माघ्यं कुन्दकुसुमम् ॥ * ॥ न्याय्यम् ॥ * ॥ कश्ये देशे[3] भवम् । कश्यं मद्यम् ॥ * ॥ देश्यः ॥ * ॥ संज्ञायाम् उदक्या रजस्वला स्त्री ॥ संज्ञाया अन्यत्र । औदक्यो मत्स्यो ॥ * ॥ मुखजघनवंशानुवंशानामदेहांशार्थः पाठः । यथा शरीरस्य मुखं प्रधानमग्रभागो वा जघनं निकृष्टं पश्चाद्भागो वा तथाऽन्यस्मिन्नर्थे मुखजघनसदृशे यदैतावुपचारेण वर्तेते तदापि यप्रत्ययः स्यात् । तद्यथा । मुखे प्रधाने पदेऽग्रे वा भवो मुख्यः । सेनाजघने निकृष्टे पश्चाद्भागे वा भवो जघन्यः ॥ ३४० ॥ इति दिगादिः ॥

मुखोलूखलसीरौष्ठहनुशीलरथाः परैः ।
उपात्स्थूलाकलापौ च स्थानसीरादि[4] संमतम् ॥ ३४१ ॥

परिमुखादेरव्ययीभावादित्यनेन परिमुखादिभ्योऽव्ययीभावेभ्यस्त्र भव इत्यर्थे ञ्यप्रत्ययो भवति ॥ * ॥ परिमुखं भवः । पारिमुख्यः सेवकः । स हि यतो यतः स्वामिनो मुखं तत्र संनिहितो भवन्नेवमु-

---

१ A. om. text and comment.

२ अकारांताद° C.; °उषशब्दात् B. C. K.; °उखशब्दात् F.; D. om. from आकारान्ताद° to केचित्.

३ कश्ये देशे D.; कश्यदेशे भवं कश्यं Kshîrasv. to Amarak. ii. 10, 40.

४ °शीरादि B. D. E. F.; शारादि C.; A. om. text and comment.

च्यते ॥ * ॥ पार्युलूखल्यः ॥ * ॥ पारिसीर्यः । परिसिरमित्यपन्यः[1] ॥ * ॥ पार्योप्यः ॥ * ॥ पारिहनव्यः[2] ॥ * ॥ पारिशील्यः ॥ पारिरथ्यः ॥ एतौ दिग्वस्त्रमतेन । स च परिशालशब्दमप्याह ॥ परेरिति परिशब्दादित्यर्थः ॥ * ॥ उपस्थूले भवम् औपस्थूल्यम् । स्थूलाशब्देन[3] हलिरुच्यते ॥ स्थूणेत्यन्यः ॥ * ॥ औपकलाप्यः ॥ * ॥ औपस्थान्यः । अयं वामनमतेन ॥ * ॥ औपसीर्यः[4] ॥ * ॥ आदिशब्दात्कपालशालशब्दौ[5] संगृहीतौ ॥ ३४१ ॥

पदयूपवंशसीताः[6] पथितिलमाषाः ससातयवभङ्गाः ।
गङ्गासीरे[7] सरथे सर्वेऽप्येतेऽनुतो लक्ष्याः ॥ ३४२ ॥

आनुपद्यः ॥ * ॥ आनुयूप्यः[8] ॥ आनुसूप्य[9] इति वामनमतेन ॥ * ॥ आनुवंश्यः ॥ अनुवंशेति दिगादावपि पठ्यते तत्राव्ययीभावादन्यत्र यः । केचित्तु तत्राप्यव्ययीभाव एवेति मन्यन्ते[10] ॥ * ॥ आनुसीत्यः[11] ॥ * ॥ आनुपथ्यः ॥ * ॥ आनुतिल्यः ॥ * ॥ आनुमाष्यः ॥ * ॥ ससातेति सह सातयवभङ्गाभिर्वर्तन्ते । ससातयवभङ्गाः । स्थति दुःखमिति सातं सु-

---

१ ॥ पारिस्रैर्यः ॥ D.—परिसीर Bö., Kâṣ. V.; परिशीर (पारिसीर्यमित्यन्ये) Yajñ.; परिसीर & परिशर Hem.

२ पारिहानव्यः B. C. K.

३ °भवमौपस्थूलाशब्देन° D.—उपस्थूल (= स्थूलस्य समीपे comm.) Yajñ.; उपस्थूण Bö., Kâṣ. V. *a.*; both Hem.; अपस्थल K. V. ed.

४ औपशीर्यः MSS.

५ °कलापशालिशब्दौ D.; °कलापिशालि° F.—Hem. also has उपकपाल, the others only उपकलाप.

६ पदपूप° B. E. F. K.; पूपदपूवंश C.; पदाप्तपवश° D.; °शीताः B. F. K.

७ °शीरे B. D. F. K.; °शारे C.; A. om. text and comment.

८ आनुपूप्यः B. F. K.; आनुतप्यः C. अनुयूप Bö., Kâṣ. V., Hem.; om. Yajñ.

९ आनुसूप्य F.; अनुशूप्य B. K.; अनुरूप्य C.—अनुशूर्प Yajñ.; om. by the others.

१० D. om. from अनुवंशेति.

११ आनुशीत्यः B. F. K.; आनुशात्यः C.—अनुसीत Bö., Kâṣ. V. *a.*; अनुशीत Hem., K. V. ed.; om. Yajñ.

खम् । सातमनु । अनुसातम् । आनुसात्यः । अयं दिग्वस्त्रमतेन ॥ * ॥ आनुयव्यः ॥ * ॥ आनुभङ्ग्यः । अयं भोजमतेन ॥ * ॥ आनुगङ्ग्यः । अयं वामनादिमतेन ॥ * ॥ आनुशीर्यः[1] ॥ * ॥ आनुरथ्यः । अयं दिग्वस्त्रमतेन ॥ * ॥ ननु मुखं परित इत्यर्थे कथमव्ययीभावः । सत्यम् अस्मादेव निपातनात् । अथवा परेर्वर्जनार्थवृत्तित्वे सति बहिःपर्यपाङ्भ्यामित्यनेनाव्ययीभावः[2]। अनुशीरादीनां[3] तु सामीप्यवृत्तित्वात्खलर्थेनैवाव्ययीभावः ॥ अव्ययीभावादन्यत्र । परिगतं मुखं परिमुखम् । तत्र भवः पारिमुखः ॥ ३४३ ॥ इति परिमुखादिः ॥

ऋगयनपुनरुक्तन्यायशिक्षानिमित्ता
उपनिषदृषियज्ञश्लक्ष्णचर्चामुहूर्ताः[4]।
अपि निगमनिरुक्तोत्पातसंवत्सरा व्या-
करणमथ पदव्याख्यानविद्यात्रिविद्याः ॥ ३४३ ॥

ऋगयनेभ्योऽण् इत्यनेन ऋगयनादेस्तस्य व्याख्यानो ग्रन्थस्तत्र भव इति वार्थेऽण्प्रत्ययो भवति ॥ * ॥ ऋचामयनम् ऋगयनम् । न चुभादेरित्यनेन णत्वाभावः[5]। तस्य व्याख्यानस्तत्र भवो वा । आर्गयणः । रत्वनिमित्तं तु णत्वं[6] भवत्येव ॥ आर्गयन इत्यन्यः । अस्मन्मते तु गिरिनद्यादित्वादुभयम्[7] ॥ * ॥ पौनरुक्तः ॥ * ॥ नैयायः ॥ * ॥ शैक्षः ॥ * ॥

---

१ आनुशीर्यः MSS.

२ °पर्यपाङ्वाङ्भ्यां° B. C. K.; °पर्यपाङ्भ्यां° D.; पर्यपार्श्वाङ्भ्यां° F.; cf. P. ii. 1, 12; 13.

३ अनुशीरादीनां B. D. K.; अनुशारादीनां C.

४ °शिक्षानिमित्ता° D. E.; °श्लक्ष्ण° E.; A. om. text and comment.

५ णीत्वाभावः °णीत्वं B. C. K.; cf. page 195, note ६ (णी° probably suggested by णीभावः).

६ एवनिमित्तं तु° D.; स्वनिमित्तं° B. C.; णीत्वं B. C. K.

७ D. om. from अस्मन्मते. All other works read आर्गयन in the gaṇa गिरिनद्यादि; cf. śl. 160.

नैमित्तः ॥ * ॥ औपनिषदः ॥ * ॥ आर्षः ॥ * ॥ याज्ञः ॥ * ॥ ब्राह्मणः ॥ * ॥ चार्चः ॥ * ॥ मौहूर्तः ॥ * ॥ निगच्छन्त्यनेन निश्चयमिति निगमो ग्रन्थविशेषः । नैगमः ॥ * ॥ नैरुक्तः ॥ * ॥ उत्पातः प्रतिपादकशास्त्रम्[1] । औत्पातः ॥ * ॥ सांवत्सरः ॥ * ॥ वैयाकरणः ॥ * ॥ पदानां व्याख्यानं पदव्याख्यानम् । पादव्याख्यानः ॥ अन्ये तु पदं व्याख्यानमिति च्छिन्दन्ति[2] । तन्मते पादं वैयाख्यानम् ॥ * ॥ वैद्यः ॥ * ॥ त्रैविद्यः ॥ ३४३ ॥

छन्दसो विजितिर्भाषामानं[3] विचितिर्नामनी ।
क्षत्राङ्गवास्तुतो विद्या स्यादुत्पादः क्रमेतरः ॥ ३४४ ॥

छान्दोविजितः[4] ॥ * ॥ छान्दोभाषः ॥ * ॥ छान्दोमानः ॥ * ॥ छान्दोविचितः ॥ छान्दोव्याख्यान इत्यप्यन्यः[5] ॥ * ॥ छान्दोनामः । अयं वामनमतेन ॥ * ॥ क्षात्रविद्यः ॥ * ॥ आङ्गविद्यः ॥ * ॥ वास्तुविद्यः[6] ॥ * ॥ औत्पादः ॥ * ॥ क्रामेतरः ॥ * ॥ ऋद्यज्ञद्युगृगादिभ्यष्ठञ्[7] इत्यनेन ठञि प्राप्ते वचनम् । आदैजाद्यतस्थौ[8] ॥ ३४४ ॥ इति ऋगयनादिः ॥

ऋग्ब्राह्मणाध्वराख्यातनामाख्यातानि नाम च ।
आद्यन्तप्रथमावेतौ षत्वणत्वनतानतौ[9] ॥ ३४५ ॥

---

१ उत्पातप्रतिपादक° B. F.; उत्पादप्रति° C.

२ पदव्याख्यानमिति° B. C. D.; च्छिदंति B. C.

३ °विजितार्भाषा° E.; A. om. text and comment.

४ छन्दोविजिति Hem.; छन्दोविजितो *v.l.* Kâś. V. ed.; om. Bö., Yajñ.

५ छंदोव्याख्यान Hem., om. others.

६ वास्तव्यविद्यः D.

७ See P. iv. 3, 68; 72.—The MSS. are all more or less corrupt.

८ Thus C. F.; °द्यतीस्था D.; °द्यनस्थो B.; °द्यतस्थो K.; ? °श्छः ।; [? Pâṇ. iv. 2, 114.—व्याकरणशब्दात्तु वृद्धाच्छः प्राप्त इति ठञादेरपवादोऽयमण् Yajñ.].

९ षत्वनत्व° F.; A. om. text and comment.

ऋद्यज्ञद्व्यृगादिभ्यष्ठञ् इत्यनेन ऋकारान्ताद् यज्ञवाचिनो द्व्यच ऋगादेश्च तस्य व्याख्यानस्तत्र भव इत्यर्थे ठञ् भवति ॥ * ॥ ऋचां व्याख्यानस्तत्र भवो वा । आर्चिकः ॥ * ॥ ब्राह्मणिकः ॥ * ॥ आध्वरिकः ॥ * ॥ आख्यातिकः ॥ * ॥ नामाख्यातिकः ॥ * ॥ नामिकः । नामशब्दस्य द्व्यज्द्वारेण ठञ् सिद्धः ॥ * ॥ परं वामनपाणिनिचन्द्रादिमते न गणे[1] पठितः ॥ * ॥ आद्यन्तिकः ॥ * ॥ प्राथमिकः ॥ * ॥ षात्वणत्विकः ॥ * ॥ नातानतिकः ॥ * ॥ आकृतिगणश्चायम् । तेन पुरश्चरणप्रभृतयो द्रष्टव्याः ॥ ३४५ ॥ इति ऋगादिः ॥

शुण्डिकोलपतीर्थान्युदपाननृणभूमयः ।
कृकणस्थण्डिलौ पर्णोपतीर्थोदकपिप्पलाः[2] ॥ ३४६ ॥

आयस्थानादशुण्डिकादेरित्यनेन शुण्डिकादिवर्जिताच्चत[3] आगत इत्यर्थे ठञ् भवति । शुल्कशालाया आगतः । शौल्कशालिकः । आकरिकः ॥ * ॥ शुण्डिकादेः । शुण्डिकः शुण्डिका वा सुरापणः[4] । तत आगतः शौण्डिकः ॥ * ॥ औलपः । उपल[5] इति शकटाङ्गजः ॥ * ॥ तैर्थः ॥ * ॥ औदपानः ॥ * ॥ तार्णः ॥ * ॥ भौमः ॥ * ॥ कार्कणः ॥ * ॥ स्थाण्डिलः ॥ * ॥ पार्णः ॥ * ॥ औपतीर्थः[6] । अयं चन्द्रवामनमतेन ॥ * ॥ औदकः ॥ पैप्पलः ॥ एतौ शकटाङ्गजमतेन[7] ॥ ३४६ ॥ इति शुण्डिकादिः ॥

---

१ °मते गणे D.—See Pâṇ. iv. 3, 72, where, however, प्रथम is given. Hem. also has no special gaṇa ऋगादि.

२ °पर्णोप° D. E.

३ °वर्जनाच्चत B. C. K.

४ शुण्डः शुण्डा वा सुरा । ततो मत्वर्थीये । शुण्डिकः शुण्डिका वा । सुरापणः सुराविक्रयी वोच्यते । Hem.; शुण्डिकः शुण्डिका वा सुराऽपणः Yajñ.

५ Hem. has both words; the others उपल only.

६ Not given by the other works.

७ MS. Hem. has उदक । पिप्पल ।; both are omitted by the others.

कुलालसेनोपनिषन्निषादा
मधुश्वपाकौ रुरुदेवराजौ ।
रुद्रो वधूब्राह्मणकुम्भकाराः
कर्मारचण्डालयुतः सिरिन्ध्रः[1] ॥ ३४७ ॥

कुलालेभ्योऽकञ् इत्यनेन कुलालादेः शब्दगणाकृत इत्यर्थे संज्ञाविषयेऽकञ् भवति ॥ * ॥ कुलालेन कृतं कौलालकम् । घटघटीशरावोदञ्चनादि भाण्डम् ॥ * ॥ सैनकं नगरोपरोधादि ॥ * ॥ औपनिषदकम् । अयं वामनमतेन ॥ * ॥ नैषादकम् ॥ * ॥ माधवको मध्वासवः । अयं चन्द्रमतेन ॥ * ॥ शौवपाककम् ॥ * ॥ रौरवकम् ॥ * ॥ दैवराजकम् ॥ देव राजन्निति केचित्पठन्ति । तत्र दैवकम् । राजकम् ॥ * ॥ रौद्रकम् । शकटाङ्गजदिग्वस्त्रमतेन ॥ * ॥ वाधवकम् ॥ * ॥ ब्राह्मणकम् ॥ ब्रह्मन्निति[2] शकटाङ्गजादयः ॥ * ॥ कौम्भकारकम् ॥ * ॥ कार्मारकम् ॥ * ॥ चाण्डालकम् । उपानदादिकम् ॥ * ॥

अदासो दासवृत्तिर्यः स सिरिन्ध्र इति स्मृतः ।
सैरिन्ध्रकम्[3] ॥ ३४७ ॥

अनड्वान्परिषच्चैव सैरिन्ध्री[4] वरुटस्तथा[5] ।
अक्प्रत्ययुजो[6] ज्ञेयाः संज्ञायां बुधपुङ्गवैः ॥ ३४८ ॥

---

१ सिरिध्रः E.; सिरिंध्वः B.; सिरिंध्रुः C. D. K.; A. om. text & com.

२ Thus all works; ब्राह्मान्निति D.

३ सिरिध्र Bö., Yajñ.; Kâś. V. ed. (Bö., *v.l.* सिरिंघ्र); सिरंध्र Hem.; शिरंध्र Kâś. V. *a.* [सीरं हलमेव सैरम् । तद्धरतीति सैरंध्रः सैरिकः सिरिध्रोऽपि स एव । सैरंध्रकम् Yajñ.].

४ ? Thus D. E.; °परिषद्वैवसिरिंध्री K.; परिषद्वैवसैरिंध्रा B.; परिषद्वैवसिरिंध्री F.; --वसिरिध्रा C.

५ वरुठस्तथा E.

६ ? अस्कृत्ययुजो E. (? F.); अप्रस्कृत्ययुजो D.; B. C. K. omit this half-śloka; A. omits text and commentary.

आनडुहकम् ॥ * ॥ पारिषदकम् । पर्षच्छब्दोऽपि द्रष्टव्यः[1] ॥ * ॥ सैरिभ्रकः[2] । अयं श्रीभोजराजमतेन ॥ * ॥ वारूटकम्[3] । शूर्पपिटकादि ॥ * ॥ संज्ञाया अन्यत्र । कौलालः श्लोक इत्यादि ॥ ३४८ ॥ इति कुलालादिः ॥

[असुरो देवरक्षोभ्यां गुणान्मुख्यः परो मतः[4] ॥] ३४९ ॥

दैवासुरः ॥ * ॥ राचोऽसुरः ॥ * ॥ गौणमुख्यः ॥ * ॥ अत्र शिग्रुक्रन्दाद्यदेवासुरादिद्वन्द्वाच्छ इति छो न भवति ॥ ३४९ ॥ इति देवासुरादिः[5] ॥

शिग्रुप्रद्युम्नसीतेन्द्रयमाद् यथाक्रमं मताः ।
क्रन्दोऽभिगमनं चैवान्वेषणं जननं सभः[6] ॥ ३५० ॥

शिग्रुक्रन्दाद्यदेवासुरादिद्वन्द्वाच्छ इत्यनेन शिग्रुक्रन्दादेः शब्दगणाद् देवासुरादिवर्जिताच्च द्वन्द्वाद् द्वितीयान्तादधिकृत्य कृतो ग्रन्थ इत्येतस्मिन्नर्थे छप्रत्ययो भवति ॥ * ॥ शिग्रवो बालास्तेषां क्रन्दस्तमधिकृत्य कृतो ग्रन्थः । शिग्रुक्रन्दीयः । बालपुस्तकः ॥ शैग्रुक्रन्द इत्यन्यः[7] ॥ * ॥ प्रद्युम्नस्याभिगमनं प्रद्युम्नाभिगमनम् । प्रद्युम्नाभिगमनीयः ॥ * ॥ सीतान्वेषणीयः ॥ * ॥ इन्द्रजननीयः ॥ * ॥ यमस्य सभा यमसभम् ।

---

१ B. C. F. add दैवकः.

२ सैरिंद्रकः D.; सैरिध्रकः C.—Bö. has सरिन्ध्र; Yajñ. सैरंध्र; K. V. ed. सेन्द्रिय (!), om. *a*.

३ वरूड Bö., K. V. ed.; बरूड Yajñ.; वरूट Hem., K. V. ed.; cf. śl. 208, p. 250, with notes 6 and 8.

४ °रचाभ्यां° B. C. K.; D. E. (A.) om. this gaṇa.

५ Cf. Pâṇ. iv. 3, 88 v.—Hem., to his sûtra vi. 3 (163), अदेवासुरादिभ्यो वैरे द्वन्द्वात् । enumerates दैवासुरं । राचोसुरं ।

६ °भिगमश्चैवा° समः E.; A. om. text and comment.

७ D. om. from शैग्रुक्रन्द.—Hem. remarks शिग्रुक्रन्दशब्दात्केचिन्नेच्छन्ति । शैग्रुक्रन्दं ।

यमसभीयः ॥ * ॥ आकृतिगणोऽयम् । तेन प्रद्युम्नप्रत्यागमनप्रद्युम्नोदयनसीताहरणप्रभृतयो द्रष्टव्याः[1] ॥ ३५० ॥ इति शिशुक्रन्दादिः ॥

सिन्धुस्तक्षशिलावसानदरदो गान्धारशाल्वोरसाः[2]
कर्णः सामलकाण्डधारच्छगलाः कैर्मेदुरो ग्रामणीः[3] ।
कंसार्धासनसिंहकर्णमधुमत्कश्मीरसिंहा इमे
स्याद्वत्सोड्डरणोऽथ बर्बरयुतो वर्णुस्तथा किंनरः ॥ ३५१ ॥

सिन्धुशृङ्खिकादिभ्योऽण्यावित्यनेन सिन्ध्वादेः शृङ्खिकादेश्च[4] सोऽस्याभिजन इत्यर्थेऽण्यौ क्रमेण भवतः ॥ * ॥ सिन्धुः समुद्रो नदी वा । सिन्धवो जनपदः । सोऽभिजनोऽस्य । सैन्धवः ॥ * ॥ ताक्षशिलः ॥ * ॥ आवसानः ॥ * ॥ दरदो जनपदः । दारदः ॥ * ॥ गान्धारः[5] ॥ * ॥ शाल्वः ॥ * ॥ उरसा[6] जनपदः । औरसः ॥ * ॥ कार्णः ॥ सामलः ॥ द्वयं वामनमतेन ॥ * ॥ काण्डधारः । काण्डवरक[7] इति शकटाङ्गजः ॥ * ॥ छगलो ग्रामः । छागलः ॥ * ॥ कैर्मेदुरः[8] ॥ * ॥ ग्रामणः ॥ * ॥ कांसः ॥ * ॥ आर्धासनः । अयं वामनमतेन ॥ * ॥ सैंहकर्णः ॥ सिंह कर्ण[9]

---

१ °प्रत्यागमनप्रमाणागमनसीता° D.; lac. from सीता C.—Hem. has all three forms.—Yajñ. gives also किरातार्जुनौ and विरुद्धभोजन।

२ °शाल्वौरसाः D. E. F.; शाल्वारसाः C.

३ °वगला कौमे – – ग्रामणीः C.; कौमदुरो° D.; कौर्मडुरो° E.; कौमंडुरो F.—A. om. text and comm. [B. might also be read कौर्मदुरो].

४ सिध्वादेश्च B. C. K.

५ All MSS. read गांधार in text; the other works गन्धार.

६ औरसा B. C.; औरसो F.—उरसा Bö., Yajñ.; उरस K. V., Hem.

७ ? कांडचरक F.; काडधारक D.; कांडधारक suppl. K.; see note ९.—काण्डधार Bö., Yajñ.; कांडवरक Hem., K. V. *a.*; काण्डवारण K. V. ed.

८ कैर्मेदुकः D.; कौमुंदुरः F.; om. B. C.—कैर्मेदुर Bö., Yajñ.; कौमेदुर K. V. ed.; कौशेदुरः *a.*; [? Hem.].

९ ॥ सिंहकर्ण इति° B. C.;—? Bhoja only singly &. Vâmana (cf. सिंह & कर्ण) singly and combined.—सिंहकर्ण Bö., Yajñ.; सिंहकोष्ठ K. V. ed. *a.* [Hem. next page n. 6.]

इति भोजः ॥ * ॥ मधुमान्पर्वतः । माधुमतः ॥ * ॥ काश्मीरः ॥ * ॥ सैंहः । अयं वामनमतेन ॥ * ॥ वात्सोद्धरणः ॥ * ॥ बार्बरः ॥ * ॥ वार्णवः ॥ * ॥ कैंनरः ॥ ३५१ ॥

गब्दिकावासकम्बोजक्रोष्टुकर्णसुमङ्गलाः[1] ।
संकुचितोऽथ किष्किन्धा पर्वतोऽपि निगद्यते ॥ ३५२ ॥

गब्दिका[2] जनपदः । गाब्दिकः ॥ * ॥ आवासः । अयं वामनमतेन ॥ * ॥ काम्बोजः ॥ * ॥ क्रौष्टुकर्णः ॥ क्रोष्टुकर्णक[3] इति भोजः ॥ क्रोष्टुकशब्दो[4] वामनमतेन ॥ * ॥ सौमङ्गलः । अयं वामनमतेन ॥ * ॥ सांकुचितः ॥ * ॥ कैष्किन्धः ॥ * ॥ पार्वतः ॥ * ॥ येऽत्र कच्छादिषु च पठ्यन्ते तेषां तत एवाणि सिद्धे नृतत्थलक्षणेऽकञि । अन्येषां च राष्ट्रलक्षणेऽकञि प्राप्ते वृद्धेभ्यश्च बाह्वीकग्रामेभ्यष्ठञ्ञठयोः शेषेभ्योऽणि प्राप्ते वचनम्[5] ॥ ३५२ ॥ इति सिन्ध्वादिः[6] ॥

शुण्डिका कुचवारो[7]ऽथ सर्वसेनशटौ शकः ।
सर्वकेशरहौ[8] बोधश्चणकः शङ्खशंकरौ[9] ॥ ३५३ ॥

शुण्डिका ग्रामः । अभिजनोऽस्य शौण्डिकः ॥ अयं वामनमताभि-

---

१ गद्दिका° E.—A. om. text and comm.

२ Thus Hem., K. V. ed.; गन्दिका Bö., Yajñ.

३ क्रौष्टुकः । क्रोष्टु° B. C.; °क्रोष्टुकणुक F.

४ ? क्रोष्टुशब्दो B. C. K.

५ °ठञ्ञिठयोर्वचनं ॥ B. C. F. K.—Cf. Pâṇ. iv. 2, 134; 124; 114; 117.

६ This *gaṇa* includes Pâṇ.'s and Hem.'s सिन्ध्वादि and तक्षशिलादि (P. iv. 3, 93).—Hem.'s तक्षशिलादि not found in MS., though referred to. [It may however form part of सिन्ध्वादि, which seems incomplete in the MS.]

७ ? Thus E.; कूचवारो B. C. D. F. K. (P. iv. 3, 92); cf. śl. 244.

८ रहो B. D. K.; °केशारहो F.; °केशहरौ E.; °केरांशहो C.

९ वोधो चणकः संखशंकरौ E.; वोधा चणकः शंकरौ ॥ D.; बोधश्चणकः° B.; A. om. text and comm.

प्रायः । पाणिन्यादयस्तु शृण्डिकस्य ग्रामजनपदवाचिनः शाण्डिक्य इत्युदाहरन्ति[1] ॥ * ॥ कौचवार्यः ॥ * ॥ सर्वसेना जनपदः । सार्वसेन्यः ॥ * ॥ शटा जनपदः । शाट्यः ॥ * ॥ शका जनपदः । शाक्यः सुगतः[2] ॥ रक इत्यपि शकटाङ्गजः[3] ॥ * ॥ सर्वकेशा जनपदः । सार्वकेश्यः ॥ * ॥ राह्यः । अयं भोजमतेन । वह इति वामनः[4] ॥ * ॥ बौध्यः ॥ * ॥ चाणक्यः[5] ॥ * ॥ शाङ्ख्यः[6] कपिलः ॥ * ॥ शांकर्यः ॥ कत इत्यपि वामनः ॥ * ॥ राष्ट्रवाचिभ्योऽकञि शेषेभ्योऽणि प्राप्ते वचनम् ॥ ३५३ ॥ इति शृण्डिकादिः ॥

कर्णाक्षिकेशा नखपादगुल्फ-
भ्रूशृङ्गदन्तौष्ठमुखास्यपृष्ठम् ।

कर्णादिपचान्मूलंजाहतिरित्यनेन[7] कर्णादेः शब्दगणात्यच्शब्दाच्चास्य मूलमित्यर्थे जाहतिप्रत्ययौ भवतः ॥ * ॥ कर्णस्य मूलम् । कर्णजाहम् । यथा ।

अपि कर्णजाहविनिवेशितानन[8] ॥

यथा च । दधाना वलिभं मध्यं कर्णजाहविलोचना ।
वाक्चेनातिसर्वेण चन्द्रलेखेव पचतो[9] ॥

अक्षिजाहम् ॥ * ॥ केशजाहम् ॥ * ॥ नखजाहम् ॥ * ॥ पादजाहम् ॥ * ॥

---

१ वामनामताभिप्रायेण °शृंडिकस्य शृंडिक्य° D.—Hem. also शृण्डिक.

२ D. om. सुगतः.

३ रेक इति° C.; D. adds सौद्धोदनिः ।—All other works have रक.

४ B. C. om. राह्यः; अय श्रीभोजमतेत्वह दति वामनः D.—The other works have neither word.

५ बाणाख्यः B. C.; वाणक्यः D.—चणक Hem.; om. others.

६ Thus MSS.; °कापिलः F.—The other works also read शङ्ख.

७ cf. P. v. 2, 24; 25.

८ Mâlatîm. v. śl. 8. [अयि for अपि B. F. K.]

९ Bhaṭṭik. iv. 16.

गुल्फजाहम्। गुल्म[1] इत्यपि चन्द्रः ॥ * ॥ भ्रूजाहम् ॥ * ॥ शृङ्गजाहम् ॥ * ॥ दन्तजाहम् ॥ * ॥ ओष्ठजाहम् ॥ * ॥ मुखजाहम् ॥ * ॥ आस्यजाहम्[2]। अयं शकटाङ्गजमतेन ॥ * ॥ पृष्ठजाहम्। अयं वामनमतेन ॥ पुष्प[3]। इति चन्द्रादयः ॥ वक्त्रफले[2] अपि शकटाङ्गजः ॥ * ॥ इति कर्णादिः ॥

कर्णादिरेषोऽथ च पीलुशम्याव्
अश्वत्थकर्कन्धुकरीरयुक्तौ[4] ॥ ३५४ ॥

पील्वादेः पाके कुण इत्यनेन पील्वादेः शब्दगणादस्य पाक इत्यर्थे कुणप्रत्ययो भवति ॥ * ॥ पीलूनां वृक्षाणां फलानां वा पाकः। पीलुकुणः ॥ * ॥ शमीकुणः ॥ * ॥ अश्वत्थकुणः ॥ * ॥ कर्कन्धुकुणः ॥ * ॥ करीरकुणः ॥ ३५४ ॥

कुवलं बदरं पुष्पकर्कन्धूखदिरास्तथा।
बदरीकुवलीशब्दौ शाकटायनसंमतौ[4] ॥ ३५५ ॥

कुवलकुणः ॥ * ॥ बदरकुणः ॥ * ॥ पुष्पकुणः। अयं चन्द्रमतेन ॥ * ॥ कर्कन्धूकुणः ॥ * ॥ खदिरकुणः ॥ * ॥ बदरीकुणः ॥ * ॥ कुवलीकुणः ॥ ३५५ ॥ इति पील्वादिः ॥

रैवतिकबैजवापी गौरग्रीविस्तथौदमेघिश्च।
स्वापिशिरथौदवापिः परिपठितः क्षैमवृत्तिश्च[5] ॥ ३५६ ॥

रैवतिकादेश्छ इत्यनेन रैवतिकादेः शब्दगणाद् अस्येदमित्यर्थे

---

१ गुल्फ D.
२ Thus Hem.; om. others.
३ Thus Hem.; the others पृष्ठ.
४ A. om. text and comment.
५ स्वापिशि° B.C.F.K.; क्षेमवृत्तिश्च E.; क्षैमवृकिश्च D.; A. om. text & comm.

ङप्रत्ययो भवति ॥ * ॥ रेवत्या अपत्यं रैवतिकः । रेवत्यादेष्ठण् इत्यनेन ठणि । रैवतिकस्यायं रैवतिकीयः शकटाद्यादिः ॥ * ॥ बीजवापस्यापत्यं बैजवापिः । बैजवापीयः ॥ * ॥ गौरग्रीवीयः ॥ * ॥ औदमेघीयः ॥ * ॥ स्वः पिशः स्वपिशः । तस्यापत्यं स्वापिशिः[1] । अत एव गणपाठाद् द्वारादेरित्यनेन टैज् न भवति[2] ॥ * ॥ औदवापीयः ॥ औदवाहिरित्यन्ये[3] ॥ * ॥ चैमवृत्तीयः[4] ॥ * ॥ अस्यापि शिष्येत्यादिना[5] ऽकञि प्राप्ते वचनम् ॥ ३५६ ॥ इति रैवतिकादिः ॥

गोहविःखरदरामुरमेधा[6]
अष्टकायुगखदा[7] विषकूपौ ।
सुक्स्खदाध्वसहिताक्षरवेदाव्
ऊधसोऽनडि नभेऽपि च नाभेः[8] ॥ ३५७ ॥

गवाद्योस्तु य इत्यनेन गो । इत्यादेः शब्दगणाद् उवर्णान्ताच्च यप्रत्ययो भवति वक्ष्यमाणेष्वर्थेषु ॥ * ॥ गव्यम् ॥ * ॥ हविर्होतव्यं वस्तु । हविषे हितं तदर्थं वा । हविष्यम् ॥ * ॥ खर्यम्[9] ॥ * ॥ दर्यम् ॥ * ॥ असुर्यम् ॥ * ॥ मेथम् ॥ * ॥ अष्टका श्राद्धकालः । अष्टक्यम् ॥ * ॥ युगाय हितं युगोऽस्य स्यादिति वा । युग्यम् ॥ * ॥ खदतीति खदो

---

१ स्वः० स्वपिशः० F.; स्वापिशिः B. F. K.; lacuna C.

२ See sl. 167; P. vii. 3, 4.

३ औदवापि Bö., Yajñ.; औदवाहि Kâś. V. ed., *a.*, Hem.

४ चैमवृत्तीयः B. C.; चैमवृ॒यः D. —? चैमधृत्वि with Hem., and sl. 205, 320; चैमवृद्धि Bö., Yajñ., K. V. ed.; चौम। वृत्ति *a.*

५ अस्यांशिष्ये० B. C. K.—Cf. P. iv. 3, 126.

६ गोहविःखर० D. E. F.

७ °युगषदा B. F. K.; युगपदी C.

८ ऋक्० D. F.; स्कदा० F.; A. om. text and comment.

९ ? स्वर्यं D. F. (cf. note 6). — खर् Bö., Yajñ., Kâś. V. ed., Hem.; स्वर् Kâś. V. *a.*

हिंसकः । खद्यम्[1] ॥ * ॥ विष्यम् ॥ * ॥ कूप्यः ॥ * ॥ खुच्यः ॥ * ॥ खदा[2] कुद्दाली । तदर्थं खद्यं लोहम् ॥ * ॥ अध्वन्यः ॥ * ॥ अचर्यः ॥ * ॥ वेद्यः । अयं वामनमतेन ॥ * ॥ ऊधस दूत्यूधःशब्दस्यानङादेशे[3] सति पाठः । ऊधसे हितः । ऊधन्यो[4]ऽभ्यङ्गः ॥ * ॥ नाभये हितम् । नभ्यमञ्जवम् । नभ्योऽचः ॥ प्राण्यङ्गवाचिनस्तु नाभिशब्दादुत्तरसूत्रेण[5] य एव । नाभ्यं तैलम् ॥ ३५७ ॥

शुनो यण[6] इति ज्ञेयं दीर्घत्वं च विभाषया ।
कूर्पबीजक्षरा[7] दीसबर्हिःशब्दौ मताविह ॥ ३५८ ॥

शुने हितं शुन्यं शून्यं च[8] । रज्जपालमात्रेणापि रहितं गृहं कुटीरकादि पर्वतारण्यादिस्थानं[9] त्वुपचारेण ॥ * ॥ कूर्प्यो[10] देशः ॥ * ॥ बीजेभ्य इमे । बीज्या व्रीहयः ॥ * ॥ चरायेदम् । चर्यं काष्ठम् ॥ * ॥ दीसः[11] क्षेपः । तदर्थं काष्ठं दीस्यम् ॥ * ॥ बर्हिर्दर्भः । बर्हिष्यम् ॥ ३५८ ॥ इति गवादिः ॥

---

१ षदतीति षद्यः F.; षद्यं B. F. K.; lacuna C.

२ Thus also Bö.; स्वद् Yajñ., Hem., K. V. ed.; om. *a.*—स्वदो विद्रावणं तस्मै हितं स्वद्यं पौरुषम् Yajñ. [? कुद्दाली all MSS., cf. p. 363, note 3].

३ °स्थानत्रादेशे F.; °स्थ नत्रादेशे B. K., lac. C.; °स्थ नञ्यादेशे D.

४ ऊधस्यो B. K.; औधस्यो F.; lacuna C.

५ Cf. Pâṇ. v. 1, 6.

६ शुणो यण E.

७ कूपबीज° B. E. F. K.; lac. C.—A. om. text and comment.

८ B. C. D. K. om. शून्यं च.

९ रहितगृहकुटीरं को पर्व° D.—Hem. has a special rule vii. 1, (34) शुनो वश्चोदूत् ॥ °शुने हितं शुन्यं शून्यं ॥

१० ? Thus D.; कूप्यो B. C. F. K.—K. V. *a.* has कूप and कुप; the others कूप only.

११ दीश Hem.; दोश (*v.l.* दीस) Bö.; om. K. V.; दीपनं दीश्नम् दीप्यमिंधनम् Yajñ.

अपूपयूपौ[1] कटकोऽथ किण्वः
सूपौदनौ तण्डुलकर्णवेष्टौ ।
अवोषदीपौ[2] पृथुकश्च पत्रं
स्थूणार्गलाश्वा मुसलोऽपि पूपः[3] ॥ ३५९ ॥

हव्यापूपादेर्वेत्यनेन वक्ष्यमाणेष्वर्थेषु हविर्विशेषवाचिनोऽपूपादेश्च यप्रत्ययो भवति वा ॥ * ॥ आमिक्ष्यम् आमिक्षीयं[4] दधि ॥ * ॥ अपूप्यम् अपूपीयम् अन्नम् ॥ यवापूप्यम् । यवापूपीयम् ॥ * ॥ यूपो यज्ञस्तम्भः । यूप्यम् । यूपीयम् ॥ * ॥ कटक्यम् । कटकीयं हेम ॥ * ॥ किण्वं मदिराकिट्टः[5] । किण्व्यम् । किण्वीयम् ॥ * ॥ सूप्यम् । सूपीयम् ॥ * ॥ ओदन्यम् । ओदनीयम् ॥ * ॥ तण्डुल्यम् । तण्डुलीयम् ॥ * ॥ कर्णवेष्ट्यम् । कर्णवेष्टीयम् ॥ कर्णवेष्टक[6] इत्यन्ये ॥ * ॥ अवोष्याः । अवोषीयाः[7] कलायाः ॥ * ॥ दीप्यम् । दीपीयं वेश्म ॥ * ॥ पृथुक्याः । पृथुकीया व्रीहयः ॥ * ॥ पत्र्यम् । पत्रीयम् ॥ अश्वपत्र्यम् अश्वपत्रीयमित्यपि ॥ * ॥ स्थूण्यम् । स्थूणीयं काष्ठम् ॥ * ॥ अरेण कर्षणेन गलति । अर्गला[8] दारुमयो लोहमयो वा दण्डः । अर्गल्यम् । अर्गलीयम् ॥ अयं भोजमतेन । वामनाद्यास्त्वर्गल इति पेठुः ॥ * ॥ अश्व्यम् । अश्वीयम् ॥ * ॥ मुसल्यम् । मुसलीयम्[9] ॥ * ॥ पूप्यम् । पूपीयम्[10] ॥ * ॥

---

१ अपूपपूपौ F. K.

२ अभ्योषदीपौ B. C.; अभूषदीपौ E.; अवापदीपौ F.; आवाषदीपौ D.

३ मुशलो° B. E. F. K.; यूपः B. K.; यूषः F.; lac. C.; A. om. text and comm.

४ आमीक्ष्यं आमीक्षीयं D.

५ किण्वं पापं तस्मै हिता किण्व्या कुसंगतिः Yajñ.

६ Thus all other works.

७ आवाष्याः आवाषीयाः D.; अवाप्याः अवापीयाः F.—The other works have अवोष, अभूष, अभ्येष (om. Hem.), and अभ्योष.

८ अर्गलं B. C. D.—Bö., Yajñ., K. V. अर्गल; Bö., Yajñ. also इर्गल; Hem. इर्गल, इल्ज, इल्जलक.

९ मुशल्यं मुशलीयं D. F.

१० यूप्यं यूपीयं B. C. F. K.

शाकटायनमतमाश्रित्यान्नविकाराश्चेति न पठितम् । एभ्यस्तु सुर्याः सुरीयास्तण्डुला इत्याद्युदाहरणम् । सादेश्चेत्यधिकारात्प्रदीप्यं प्रदीपीयमित्यादि[1] । अन्ये तु प्रदीपशब्दमपि[2] पठन्ति । तन्मते नियमार्थं विदीपीयमित्यादि । अन्नविकारेभ्यस्त्वर्थपरत्वान्न[3] भवति । यवसुरीयम् । पिष्टसुरीयम् । अत एवापूपाद्यन्नविकाराणां पृथग्ग्रहणमर्थवद्भवति । अपूपादिषु येऽन्नभेदशब्दा अपूपादयस्तेषां केनचिदाकारसादृश्येनार्थान्तरवृत्तौ प्रत्ययार्थमुपादानमिति शकटाङ्गजः । अस्माकं त्वयमाशयः । शष्कुलीमोदकप्रभृतयोऽन्नविकाराः पृथुकापूपादयस्त्वन्नमेव[4] विशिष्टावस्थं नान्नविकार इति पृथगुपादानम् ॥ ३५९ ॥ इत्यपूपादिः ॥

इति

श्रीगोविन्दसूरिशिष्यपण्डितश्रीवर्धमानविरचितायां स्वीयगणरत्नमहोदधिवृत्तौ शेषसाध्वर्थभवाख्यानागतार्थकृताभिजनपाकेदमर्थविहितताद्धितप्रत्ययगणनिर्णयो नाम पञ्चमोऽध्यायः समाप्तः ॥

---

१ °सुदीप्यं सुदीपीयमित्यादि D.

२ प्रतीपशब्द्° B. F. K.; अन्ये ङ्कगुतीय° C.—All other works include प्रदीप in the *gaṇa*.

३ °अर्थे परत्वान्न D.

४ पृथुकाभ्यूषादयस्त्वन्नमेव B.F.K.; पृथुकाप्रषोदय° C.; पृथुकापूपादयो अन्नमेव D.

अथ षष्ठोऽध्यायः ॥

संशयषष्ठान्नव्रतभारतरामायणैकभक्तानि ।
अष्टममासक्षपणोपवासपारायणानि स्युः[1] ॥ ३६० ॥

तत्संशयादेः करोतीत्यनेन द्वितीयान्तात्करोतीत्येतस्मिँल्लोकप्रसिद्धेऽर्थे ठञ् भवति ॥ * ॥ संशयं करोति । सांशयिकः स्थाणुादिः ॥ * ॥ षाष्ठान्नव्रतिकः ॥ * ॥ भारतिकः ॥ रामायणिकः ॥ अनयोः करोतिः कथने वर्तते ॥ * ॥ ऐकभक्तिकः ॥ * ॥ आष्टमिकः ॥ * ॥ मासक्षपणिकः ॥ * ॥ औपवासिकः ॥ * ॥ पारायणं साकल्यवचनम् । पारायणिकः ॥ अथवा पारायणमिति सामान्येनाभिधानाद्धातुपारायणं नामपारायणं वाभिधीयते । तत्करोति पठनपरिसमाप्तिं नयतीत्यर्थः । एतच्च करोतेरशेषधात्वर्थानुगतवृत्तित्वाल्लभ्यते । तदुक्तम् ।

विकारभेदसंसर्गोत्कर्षहानादिरूपतः ।
करोतिः परिणामार्थं[2] चित्रमाह स्वभावतः ॥

आकृतिगणोऽयम् । तेन तुरायणचान्द्रायणप्रभृतयो[3] द्रष्टव्याः ॥ ३६० ॥ इति संशयादिः[4] ॥

अजशङ्कूत्तरा वारि कान्तारस्थलजङ्गलाः ।

तेनाजाद्यादेराहृतं वेत्यनेनाजादिपूर्वपदात्पथिशब्दात् तेनाहृतं तद्गच्छतीत्येतस्मिन्नर्थे ठञ् भवति ॥ * ॥ अजपथेनाहृतम् अजपथं[5]

---

१ संशय °चपणोपवास° E.; A. om. text and comment.
२ परिमाणार्थं D.; lac. C.
३ तेनन्तरायणचांद्रायण° B.; तेनांतरायण° D.; lac. C.
४ संशयादिः E.—Cf. P. v. 1, 72-3.; Hem. vi. 4, (80. 89. 90).
५ अजपथा D.; lac. C.

गच्छति वा । आजपथिकम् । आजपथिकः ॥ * ॥ शृङ्गरिव ऋजुः पन्थाः । शृङ्गपथः । शृङ्गपथिकम् ॥ * ॥ औत्तरपथिकम् ॥ * ॥ वारिपथिकम् ॥ * ॥ कान्तारपथिकम् ॥ * ॥ स्थालपथिकम् ॥ * ॥ जाङ्गलपथिकम् ॥ * ॥ इत्यजादिः[1] ॥

ऋतुस्तथोपवस्ता च प्राशिता च बुधैर्मतः[2] ॥ ३६१ ॥

ऋत्वादिभ्योऽण् इत्यनेन ऋत्वादेरस्य प्राप्त इत्येतस्मिन्नर्थेऽण् भवति ॥ * ॥ ऋतुः प्राप्तोऽस्य । आर्तवं पुष्पम् । आर्तवी कलिका । आर्तवः पुष्पवन्धः ॥ * ॥ उपवस्ता । उपवासव्रती । स प्राप्तोऽस्य । औपवस्तं पर्व भोज्यं वा ॥ * ॥ प्राशिता भोक्ता प्राप्तोऽस्य । प्राशित्रं भोजनम् । प्राशित्री रसवती ॥ * ॥ ऋत्वादयः प्रयोगगम्याः ॥ ३६१ ॥ इति ऋत्वादिः[3] ॥

संतापसंघातनिसर्गयोगोपवाससंपादनसंपरायाः ।
संग्रामसंयोगविसर्गमांसप्रवासमांसौदनसंनिपाताः[4] ॥ ३६२ ॥

तस्मै प्रभवति संतापादिभ्य इत्यनेन संतापादेश्चतुर्थ्यन्तात्तस्मै प्रभवतीत्येतस्मिन्नर्थे ठञ् भवति ॥ * ॥ संतापाय प्रभवति । सांतापिकं दुर्जनसंगतम् । सांतापिको ग्रीष्मकालः । सांतापिकी नीचसेवा ॥ * ॥ सांघातिकम् ॥ * ॥ नैसर्गिकम् ॥ निःसर्ग[5] इत्यपि वामनः ॥ * ॥ यौगिकम्[6] । अयं शकटाङ्गजमतेन ॥ * ॥ औपवासिकः ॥ * ॥ सांपाद-

---

१ See P. v. 1, 77; Hem. vi. 4, (87).

२ प्राशिता विबुधै° F.; A. om. śloka and comment.

३ See Kâś. V. v. 1, 107 (उपवस्त्रादि); Hem. vi. 4, (126) ऋत्वादिभ्योऽण् ॥

४ A. om. text and comment.

५ Hem. has both; निसर्ग Bö., Yajñ., K. V. ed.; निःसर्ग *a.*

६ With Hem. this *gaṇa* is योगादि; cf. Pâṇ. v. 1, 102.

निकः ॥ * ॥ सांपरायिकः ॥ * ॥ सांग्रामिकः ॥ * ॥ सांयोगिकः ॥ * ॥ वैसर्गिकः ॥ * ॥ मांसिको व्याधागमः[1] ॥ * ॥ प्रावासिकः ॥ * ॥ मांसौदनिकः ॥ सक्तुमांसौदन[2] इत्यन्यः ॥ * ॥ सांनिपातिकः ॥ ३६२ ॥

संनाहौदनसंवेशसक्तुसंमोदनं[3] निरः ।
पेषघोषावुपात्सर्गः पेषवासक्रमाः[4] समः ॥ ३६३ ॥

सांनाहिकः ॥ * ॥ औदनिको दानपतिसंयोगः ॥ * ॥ सांवेशिकः[5] ॥ * ॥ सक्तुभ्यः शुक्रः । साक्तुकः ॥ * ॥ संमोदनं हर्षः । सांमोदनिकः ॥ * ॥ नैष्पेषिकः ॥ * ॥ नैर्घोषिकः ॥ * ॥ औपसर्गिकः ॥ * ॥ सांपेषिकः ॥ * ॥ सांवासिकः ॥ * ॥ सांक्रामिकः[6] । अयं शकटाङ्गजमतेन ॥ ३६३ ॥ इति संतापादिः ॥

व्युष्टोपवासौ परिषत्प्रवासौ
संग्रामतीर्थं समुदायनित्यम् ।
प्रवेशनो निष्क्रमणः समोऽग्रे
घातः[7] पदं पीलुपरं च मूलम् ॥ ३६४ ॥

व्युष्टादिभ्योऽण् इत्यनेन व्युष्टादेस्तत्र कार्यं दीयत इत्येतयोरर्थयोरण् भवति ॥ * ॥ व्युष्टं प्रभातम् । तत्र कार्यं दीयते वा । वैयुष्टम् ॥ * ॥

---

१ व्याधागमः B. C. K.

२ मांसौदिकः । सक्तुः । मांसौदन इ° F.; Hem. has both compounds.

३ °संदेशसक्तु° B. C. F. K.; °सवेश-सक्तु° D.; संमोदना MSS.

४ पेषवाशक्रमाः E.; A. om. text and comment.

५ सांवेथिकः D.; सांदेशिकः B. C. F. K.—Hem., K. V. *v.l.* संवेश; Bö., Yajñ. संवेष; Bö., Yajñ., K. V. *a.*, *v.l.* ed. also संवेशन.

६ सांक्रमिकः F.; cf. śl. 166.—Only Hem. has this word.

७ घातं E.; A. om. text and comment.

औपवासम् ॥ * ॥ पारिषदम् ॥ * ॥ प्रावासम् ॥ * ॥ सांग्रामम् ॥ * ॥ तैर्थम् ॥ * ॥ सामुदायम् ॥ * ॥ नित्यशब्दो दिवसाभ्यावृत्तिविषयो[1] द्रष्टव्यो व्युष्टसाहचर्यात् ॥ ननु कूटस्थाकाशादिवस्तुवृत्तिस्तत: सर्वे ऽध्वभावकाला इति सप्तमीप्रसङ्गे द्वितीया स्यात् । नैत्य: । सर्वकालं दीयत इत्यर्थ: ॥ * ॥ प्रवेशने गृहान्नगराद्वा कार्यं दीयते वा । प्रावेशनम् ॥ * ॥ एवं नैष्क्रमणम् ॥ * ॥ सांघातम् ॥ * ॥ आग्निपदम् ॥ * ॥ पैलुमूलम् ॥ * ॥ परिषत्समुदायशब्दौ न्यासकृन्मतेन ॥ * ॥ आकृतिगणश्चायम् । तेन लोकयात्राप्रभृतयो द्रष्टव्या: ॥ ३६४ ॥ इति व्युष्टादि: ॥

चूडा श्रद्धा द्वादशाहस्तथायं
ज्ञेया याचा देवतीर्थात्परेह ।
स्वर्ग: कामो वो[2] धनायुर्यशांस्य-
नेको लक्ष्यो धीमता लक्ष्यतश्च[3] ॥ ३६५ ॥

चूडास्वर्गोत्थापनास्वस्तिवाचनादेरण्यच्छठञ्लुगित्यनेन[4] चूडादिस्वर्गाद्युत्थापनादिस्वस्तिवाचनादीत्येतेभ्यो गणेभ्य: प्रथमान्तेभ्यो ऽस्य प्रयोजनमित्येतस्मिन्नर्थे ऽण्यच्छठञ्लुगित्येते[4] क्रमेण भवन्ति ॥ * ॥ चूडा प्रयोजनमस्य । चौडम् । यथा ।

स वृत्तचौलश्चलकाकपक्षकै-
रमात्यपुत्रै: सवयोभिरन्वित: [5] ॥

---

१ दिचसाषयो D.

२ °कामो बाध: नायु° B.; कामो बाधना° K.; स्वर्गीकाम्या बाधना° C.; कामो धो धना° F. (cf. n. 1 next page); कामो थो D.

३ °यशस्त्रलोकाल्लक्ष्या धी° D.; °अनोकालक्ष्यो° E.; A. om. text and comment.

४ °ठञ्ञुगि° D.

५ Raghuv. iii. 28.

एवं आद्धम् ॥ * ॥ द्वादशाहम् ॥ * ॥ दैवयाची पुष्पप्रचितिः ॥ * ॥ तैर्थयाज्यन्नपङ्क्तिः ॥ * ॥ इति चूडादिः ॥

स्वर्गः प्रयोजनमस्य । स्वर्ग्यं धनम् । स्वर्ग्या देवपूजा ॥ * ॥ काम्या दृष्टयः[1] ॥ * ॥ धन्यम् ॥ * ॥ आयुष्यम् ॥ * ॥ यशस्या विद्या ॥ ३६५ ॥ इति स्वर्गादिः ॥

उदुपाभ्यां परात्स्थापेरनोऽनोः प्रवचेर्वचेः२ ।
विशेर्वासेस्तथाङ्प्राच्च रुहेः समा विशे रभेः३ ॥ ३६६ ॥

उत्थापनम् उत्थापना[4] वा प्रयोजनमस्य । उत्थापनीयम् ॥ उपस्थापनीयम् ॥ * ॥ अनुप्रवचनीयम् ॥ अनुवचनीयम् ॥ अनु पश्चाद्वाचनम् अनुवाचनमिति[5] वामनः ॥ अनुवादनम् । अनुपानमित्यपरः[6] ॥ * ॥ अनुवेशनीयम् ॥ संवेशनमिति वामनः ॥ * ॥ अनुवासनीयम् ॥ * ॥ आङ्प्राच्चेति चकारेणानोरित्यनुकृष्यते । आरोहणीयम् ॥ प्ररोहणीयम्[7] ॥ अनुरोहणीयम्[8] ॥ * ॥ समावेशनीयम् ॥ * ॥ समारम्भणीयम् ॥ ३६६ ॥

विशेः पदे रुहेः पूरेः समापेश्च सपूर्वतः ।
स्वस्तिवाचनं पुण्याहवाचनं शान्तिवाचनम्[9] ॥ ३६७ ॥

---

१ F. adds अधस्यः

२ °परा स्थापेरतो° प्रवर्देर्वधेः E.; °अतोऽनोः° F.; °स्थापेनोनोः C. K.

३ रजः D.; रतः E.; A. B. om. text and comment.

४ उपस्थापना F.; उत्थीयना D.

५ Bö., Yajñ. have both; K. V. ed. अनुवचन only; Hem. om. this and अनुप्रवचन.

६ अनुपादनमित्य° C. F. K.; °दित्यपरः D.—Hem. has अनुवादन and अनुपान; Kâṣ. V. ed. अनुवादन; Bö., Yajñ., K. V. β. om. both.

७ प्रारोहणीयं D. F. K.—प्ररोहण K. V., Hem.; om. Bö., Yajñ.

८ Thus Hem., Yajñ.; अन्वारोहण Bö., K. V., Hem.

९ A. B. om. text and comment.

अत्र इत्यनुवर्तते ॥ गृहप्रवेशनं प्रयोजनमस्य । गृहप्रवेशनीयम् ॥ * ॥ अश्वप्रपदनीयम् ॥ * ॥ प्रासादारोहणीयम् ॥ * ॥ प्रपापूरणीयम् ॥ * ॥ व्याकरणसमापनीयम् ॥ * ॥ सप्तर्वत इति गृहादिपूर्वपदोपेतात् ॥ * ॥ इत्युत्थापनादिः[1] ॥

स्वस्तिवाचनं प्रयोजनमस्य । स्वस्तिवाचनम् ॥ * ॥ पुण्याहवाचनम् ॥ * ॥ शान्तिवाचनम् ॥ * ॥ उत्थापनादयः स्वस्तिवाचनादयश्च प्रयोगगम्याः ॥ * ॥ इति स्वस्तिवाचनादिः[2] ॥ ३६७ ॥

देवतिलदेशविरतेर्महतः सामायिकाद्व्रतं[3] गदितम् ।
दीक्षाऽवान्तरपूर्वा त्रिश्रुतिकाः[4] स्युर्महानाम्न्यः ॥ ३६८ ॥

तच्चरति देवव्रतादिभ्यो डिन् इत्यनेन तदिति द्वितीयान्ताद् देवव्रतादिशब्दगणाच्चरतीत्यर्थे डिन् भवति ॥ * ॥ देवव्रतं चरति । देवव्रती ॥ * ॥ तिलव्रतं चरति । तिलव्रती ॥ * ॥ देशविरतिव्रती ॥ * ॥ महाव्रती ॥ * ॥ सामायिकव्रती[5] ॥ * ॥ अवान्तरदीची ॥ * ॥ इति देवव्रतादिः[6] ॥

त्रिश्रुतिका इति त्रिशब्दो[7] महानाम्न्यादिरित्यर्थः । महानाम्न्यादेरित्यनेन महानाम्न्यादेर्द्वितीयान्ताच्चरतीत्यर्थे ठञ् ॥ * ॥ महानाम्न्यो नाम ऋचः । तत्सहचरितं व्रतं तच्छब्देनोच्यते । महानाम्नीश्चरति । माहानाम्निकः । आख्यातरूपत्वादस्त्रीत्वाभावः ॥ * ॥ आदित्यव्रतिकः

---

१ अनुप्रवचनादि Pâṇ. v. 1, 111; उत्थापनादि Hem. vi. 4, (122).

२ Thus Hem. vi. 4, (124); पुण्याहवाचनादि Pâṇ. v. 1, 111 vârtt.

३ °देशेविरहेर्महत° E.; °विरर्महतः सामापि° D.

४ स्त्रीश्रुति D.; A. B. om. text & c.

५ सामयिक° C.; सामापिक° D.

६ Thus also Hem. (om. सामायिकव्रत and देशविरतिव्रत); अवान्तरदीचादि P. v. 1, 94 vârtt.

७ स्त्रीश्रुतिका° स्त्रीशब्दो D.

॥ * ॥ गौदानिकः[1] ॥ * ॥ तथाऽस्य ब्रह्मचर्यं दृत्यनेन ब्रह्मचर्येऽभिधेय एषां तुल्यं रूपम् ॥ * ॥ इति महानाम्न्यादिः ॥ ३६८ ॥

अश्ववस्वश्मभङ्गोमावर्षोर्णा गणमित्यपि[2]।
वंशबल्वजमूलाक्षस्थूणाखट्वाकुटेक्षवः ॥ ३६९ ॥

ब्रह्मवर्चसद्व्यचोऽसंख्यामानाश्वादेर्यं दृत्यनेन ब्रह्मवर्चसशब्दात्संख्यामानाश्वादिवर्जिताच्च[3] द्व्यचः शब्दात् तस्य हेतुः संयोगोत्पातावित्येतस्मिन्नर्थे[4] यप्रत्ययो भवति ॥ * ॥ ब्रह्मवर्चसस्य निमित्तं संयोग उत्पातो वा । ब्रह्मवर्चस्यः ॥ * ॥ द्व्यचः । धनस्य निमित्तम् । धन्यम् । स्वर्ग्यमित्यादि ॥ * ॥ संख्यामानाश्वादिप्रतिषेधः किम् । पञ्चकः । सप्तकः । प्राश्विकः । खारीकः ॥

अश्वादेः ॥ आश्विकः ॥ * ॥ वासुकः ॥ * ॥ आश्मिकः ॥ * ॥ भाङ्गिकः ॥ * ॥ औमिकः ॥ * ॥ वार्षिकः ॥ * ॥ और्णिकः ॥ * ॥ गाणिकः[5] ॥ * ॥ इत्यश्वादिः ॥

वंशादिभारं हरति वहत्यावहतीत्यनेन वंशादेः पराद् भारशब्दाद् भारभूताद्वा वंशादेर्द्वितीयान्ताद्धरति वहत्यावहतीत्यर्थे ठञ् भवति ॥ * ॥ वंशभारं हरति वहत्यावहति वा । वांशभारिकः ॥ * ॥ बाल्वजभारिकः ॥ * ॥ मौलभारिकः ॥ * ॥ आक्षभारिकः ॥ * ॥ स्थौणाभारिकः[6] ॥ * ॥ खाट्वाभारिकः[6] ॥ * ॥ कौटभारिकः ॥ कुटज

---

१ पौपनिकः D.—Hem. calls this *gaṇa* गोदानादिः.

२ मणमित्यपि C. F. K.—A. om. to ऽसंख्या in the comm.; B. to य[प्रत्ययो].

३ ब्रह्मचर्येर्थे सशब्दा० A.

४ हेतुः संयोगो० A. D., cf. P. v. 1, 38.

५ माणिकः B. C. F. K.; om. D.—The other works have गण.

६ स्थौणभारिकः० C. F.; खाट्वभारिकः F.

इति वामनः[1] ॥ * ॥ ऐचुभारिकः ॥ * ॥ अश्वत्थ इत्यपि दिग्वस्त्रः। स्रुघ्ण[2] इत्यपि भोजः ॥ * ॥

भारभूतान्वा वंशान्हरति वहत्यावहति वा । वांशिकः ॥ वाल्वजिकः ॥ मौलिकः ॥ आचिकः ॥ स्त्रौणिकः ॥ खाट्विकः ॥ कौटिकः ॥ ऐचुकः ॥ * ॥ अश्वाश्मशब्दौ गणे द्रष्टव्यौ ॥ * ॥ हरति देशान्तरं प्रापयति चोरयति वा[3] । आवहत्युत्पादयतीत्यर्थः ॥ * ॥ इति वंशादिः ॥ ३६८ ॥

छेदं भेदं संप्रयोगं विकर्षं
दोहद्रोहौ विप्रकर्षप्रकर्षौ ।
कर्षं नर्तं विप्रयोगप्रयोगौ
संवेः प्रश्नं प्रेषणं विद्धि विद्वन् ॥ ३७० ॥

छेदादेर्नित्यमित्यनेन च्छेदादेस्तदर्हतीत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति ॥ * ॥ छेदं नित्यमर्हति । छैदिकस्तरुः ॥ * ॥ भैदिकः शत्रुः ॥ * ॥ सांप्रयोगिकः ॥ * ॥ वैकर्षिकः ॥ * ॥ दौहिकी गौः ॥ * ॥ द्रौहिकः ॥ * ॥ वैप्रकर्षिकः ॥ * ॥ प्राकर्षिकः ॥ * ॥ कार्षिकः ॥ * ॥ नार्तिकः ॥ गौनर्त इत्यन्ये[4] ॥ * ॥ वैप्रयोगिकः ॥ * ॥ प्रायोगिकः[5] ॥ * ॥ सांप्रश्निकः ॥ * ॥ वैप्रश्निकः ॥ * ॥ प्रैषणिकः ॥ प्रेक्षण[6] इति शकटाङ्गजः ॥ * ॥ विराग विरङ्ग चेति गणसूत्रं वामनमतेन । वैरङ्गिकः ॥ ३७० ॥ इति छेदादिः ॥

---

१ Hem. has कुट and कुटज; the others कुटज only.

२ स्रुच्च A.; स्रुष्ण D.; शुल्क B.; C. om. from इत्यपि.—Hem. has स्रुघ्ण (appar. corr. into स्रुच्च); K. V. *a.* स्रुच्च; om. Bö., Yajñ., K. V. ed.

३ वोद्यति वा A.; नोद्यति वा B. C. F. K.; प्रापयति वहति वारयति D.

४ गौनर्त्त° F.—Hem. has both words; the others नर्त (K. V. ed. वर्त्त!).

५ ? प्रायौगिकः cf. śl. 164.

६ Thus Hem., the others प्रेषण.

दण्डार्घमेधामुसलानि[1] मेघो[2]
वधोदक्येभा मधुपर्कयुक्ताः ।
युगं कशासौ[3] पितृदेवता च
दण्डादिरेवं विबुधैः प्रणीतः ॥ ३७१ ॥

दण्डादेरित्यनेन दण्डादेः शब्दगणादर्हतीत्येतस्मिन्नर्थे यो भवति ॥ * ॥ दण्डमर्हति । दण्ड्यः । दण्डो दमनं न तु यष्टिः । यथा । स्त्रियै दण्डयतो दण्ड्यान्[4] ॥ ननु दण्ड्यत इति दण्ड्यः पूर्वतोत्यादिना[5] सिद्धम् । सत्यम् । दण्डमर्हतीति ठञ् प्रसज्येत[6] ॥ * ॥ अर्घ्योऽतिथिः । यथा । तमर्घ्यमर्घादिकयादिपूरुषः[7] ॥ * ॥ मेध्यः[8] ॥ * ॥ मुसलघातो मुसलः । मुस्ल्यः[9] ॥ * ॥ मेध्यः[10] ॥ * ॥ वध्यः ॥ * ॥ उदक्यः ॥ * ॥ दृभ्यो धनी ॥ * ॥ मधुपर्क्यः श्रोत्रियो गृहागतः ॥ * ॥ युग्यो दम्यः ॥ * ॥ कशाघातोऽपि कशा । कश्यो[11]ऽश्वः ॥ * ॥ पितृदेवत्यः[12] श्राद्धकालः ॥ * ॥ आकृतिगणश्चायम् । तेन रथकन्यादयो[13] द्रष्टव्याः ॥ ३७१ ॥ इति दण्डादिः ॥

सुस्नाताभ्युन्नती बन्धुमैत्री निद्रा सुखात्परा ।
सुखाच्छय्या तपो रात्रिर्दिवसः शयनं शयः[14] ॥ ३७२ ॥

---

१ °मेघा° B. C. F. K.; मुशलानि A. B. C. F. K.
२ मेधा A. B. C. F. K.; मेघा E.
३ कसासौ A. D. E.
४ Raghuv. i. 25.
५ ? मूच्यतीत्यादिना D. F.; पूच्चती° (or पू°) A.; apparently refers to the kṛitya य (P. iii. 1, 95 ff.; 3, 139 ff.)
६ प्रयुज्यते A.; cf. P. v. 1, 19; 63.
७ Śiś. i. 14 (तमर्घ्यमर्घ्यादि° eds.).
८ मेध्यः B. F. K.
९ मुशल° मुशल्यः A. B. C. F. K.
१० मेध्यः A. B. C. F.
११ कसा° कसा° कश्यो A. D.
१२ पितृदैवत्यः B. C. K.; °दैवत्यं A. D.
१३ Hem. om. these; Bö., Yajñ. have instead गुहा, अङ्ग, भाग (also K. V.), सुवर्ण.
१४ सुखाच्छरया तथा रात्रिः शयः शयनमित्यपि D. E.

सुखातादेः पृच्छतीत्यनेन सुखातादेर्द्वितीयान्तात्पृच्छतीत्यर्थे ठञ् भवति ॥ * ॥ सुखातं पृच्छति । सौखातिकः । यथा । सौखातिको यस्य भवत्यगस्त्यः[1] ॥ * ॥ आभ्युन्नतिकः ॥ * ॥ बान्धुमैत्रिकः ॥ * ॥ सौखनिद्रिकः ॥ * ॥ सौखशय्यिकः ॥ * ॥ सौखतपसिकः[2] ॥ * ॥ सौखरात्रिकः ॥ * ॥ सौखदिवसिकः[2] ॥ * ॥ सौखशयनिकः[3] । अयं शकटाङ्गजमतेन । अस्मन्मते तु सौखशायनिक इति स्यात् ॥ * ॥ सौखशयिकः[2] ॥ ३७२ ॥ इति सुखातादिः ॥

परदारा गुरोस्तल्पं माथोत्तरपदं[4] तथा ।
पदव्यनुपदाक्रन्दजन्ययाचाः[5] प्रकीर्तिताः ॥ ३७३ ॥

परदारादेर्गच्छतीत्यनेन परदारादेर्गणाट्ठञ् भवति ॥ * ॥ परदारान्गच्छति कामयते । पारदारिकः ॥ * ॥ गुरोस्तल्पं कलत्रं गुरुतल्पम् । गौरुतल्पिकः ॥ * ॥ दाण्डमाथिकः । शौल्कमाथिकः[6] ॥ माथशब्दः पथिपर्यायः[7] ॥ * ॥ पादविकः ॥ * ॥ आनुपदिकः । अनुगतप्रत्युत्तरवक्ता प्रत्यासत्त्या धावति वा[8] ॥ * ॥ दृष्टविपत्तावुल्बणरुदितारावे आक्रन्दः । आक्रन्दन्त्यस्मिन्नित्याक्रन्दो देश आर्तशरणं वा । आक्रन्दिकः ॥ * ॥ जान्ययाचिकः[9] ॥ * ॥ अन्येऽपि प्रयोगगम्याः ॥ ३७३ ॥ इति परदारादिः ॥

---

१ *Raghuv. vi. 61.*

२ Om. D.

३ सौखशायनिकः A.; सौखशयकः D.—Hem. and K. V. also have सौखशायनिक; Bö. सुखशयन.

४ माषोत्तरपदं A.

५ °यन्ययाचा B. F. K.; यनयाचाः C.; जन्ययाचः D.

६ दांथमाथिकः° F.; दांडमाषिकः। शौल्कमासिकः° A.

७ माषशब्दः पषिपर्यायः A.; A. B. C. K. place पादविकः before माथशब्दः; D. om. from माथशब्दः to आनुपदिकः—The other works om. these three words, as well as आक्रन्द & जन्ययाचा; cf. P. iv. 4, 37-8, and K. V.; Hem. has गुरुदार, भ्रातृजाया and सभर्तृका instead.

८ अनुत्तरात्तर° F.; अनु--प्रत्युत्तरवत्ता° C.; A. om. वा.

९ यान्ययाचिकः B. C. F. K.; om. A.

प्रभूतस्वागतस्वस्तिपर्याप्ता गमनं स्वरः ।
नित्यमाकार्यतः शब्दः प्रभूतादिगणे मतः ॥ ३७४ ॥

आह प्रभूतादिभ्य इत्यनेन ठञ् ॥ * ॥ प्रभूतमाह । प्राभूतिकः । प्रभूतं भवतां धनधान्यादिकमभीष्टं स्यादिति[1] प्रियाशिषं वदन्नेवमुच्यते ॥ * ॥ स्वागतिकः[2] ॥ * ॥ सौवस्तिकः ॥ * ॥ पार्याप्तिकः ॥ * ॥ सौवर्गमनिकः ॥ * ॥ नित्यशब्द इति ब्रुवाणः । नैत्यशब्दिकः ॥ मा कृथाः पापमनाचारं वेति ब्रुवाणः । माशब्दिकः ॥ कार्यशब्द इति ब्रुवाणः । कार्यशब्दिकः ॥ माशब्दादिभ्यो[3] वाक्यात्प्रत्ययविधानम् ॥ ३७४ ॥ इति प्रभूतादिः ॥

पर्पाश्वत्थावाकषजालव्यासा रथाश्वघासाः स्युः[4] ।
कृतपङ्क्तावः पादो निर्दिष्टोऽर्थध्वनिः कैश्चित् ॥ ३७५ ॥

पर्पादेष्ठङ् इत्यनेन तेन चरतीत्यर्थे ठङ्[5] भवति ॥ * ॥ पर्पो[6] दारुनिर्मितः शकटप्राय उपकरणविशेषः । तेन चरति । पर्पिकः । पर्पिकी[7] ॥ * ॥ अश्वत्थिकः । अश्वत्थिकी[8] ॥ * ॥ आकषन्ति सुवर्णमत्र परीक्षार्थमित्याकषो निकषोपलः । आकषन्ति पिंषन्त्यस्मिन्नोषधीरित्याकषः[9] पाषाण इत्येके । आकषिकः । आकषिकी ॥ आकर्षो[10]

---

१ स्यादिति A. B. K.; स्या--दिति C.; अभीष्टदिति D.

२ Bö., Yajñ., K. V. om. स्वागत, स्वस्ति and स्वर्गमन; Hem. adds निपुण, विचित्र and विपुल.

३ नित्यशब्दादिभ्यो A.—Hem. (as P. iv. 4, 1 vârtt. and K.V., where नित्यः शब्दः । कार्यः शब्दः ।) has a special *gaṇa* माशब्द इत्यादिः for these three words.

४ °जालव्यासा° E.

५ पर्पादेष्ठञि° ठञ् MSS. (which would require vṛiddhi; cf. śl. 378); P. iv. 4, 10 ष्ठन्; Hem. इकट्.

६ पार्पो A.; पर्पा C. D.

७ पार्पिकः पार्पिकी (°का C.) B. C. F. K. (Hem. पर्पिकः).

८ आश्वत्थिकः । आश्वत्थिकी (°का C.) B. C. F. K.

९ °ओषधानित्याकषः A. D.

१० ? आकषो B. C. F. K.—The other works give neither word.

लोहोपकरणविशेष इति वामनः ॥ * ॥ जालिकः ॥ * ॥ व्यासो महाजालम्[1]। व्यासिकः ॥ व्याल इत्यप्यन्यः[2] ॥ * ॥ रथिकः ॥ * ॥ अश्विकः ॥ * ॥ घासिकः ॥ * ॥ पदिकः। पदातिर्लेखवाहकादिर्वा[3] ॥ * ॥ अर्थिकः[4] : ३७५ ॥ इति पर्पादिः ॥

स्युर्वेतनप्रेषणशक्तिदण्ड-
वाहार्धवाहोपनिषत्सुखानि[5]।
वेश्मोपवस्ती भृतिपाद्वेशो-
पवेशशय्याः स्फिगचालजालम् ॥ ३७६ ॥

वेतनादेर्जीवतीत्यनेन तेन जीवतीत्येतस्मिन्नर्थे ठञ् भवति ॥ * ॥ वेतनेन जीवति। वैतनिकः कर्मकरः ॥ * ॥ प्रैषणिकः ॥ * ॥ शाक्तिकः ॥ * ॥ दाण्डिकः ॥ * ॥ वहनं वाहनं वा वाहः। वाहिकः[6] ॥ * ॥ आर्धवाहिकः[6] ॥ * ॥ औपनिषदिकः ॥ * ॥ सौखिकः ॥ वैश्मिकः ॥ द्वयं वामनमतेन ॥ * ॥ औपवस्तिकः ॥ * ॥ भार्तिकः ॥ * ॥ पादिकः ॥ * ॥ वेशो दारिकावाटः। वैशिकः ॥ * ॥ औपवेशिकः ॥ * ॥ शाय्यिकः[7] ॥ अन्ये सुखशय्येति पठन्ति। त आहुः। सुखशय्यया जीवति किं सुखं शयितवन्तो[8] भवन्त इति यः परप्रश्नेन जीवति स सौखशय्यिक इति ॥ * ॥ चलनं चालः[9]। स्फिगस्य चालः। स्फिगचालः। स्फैगचालिकः[9] ॥ पुतचाल[9] इत्यन्ये ॥ * ॥ जालिकः ॥ ३७६ ॥

---

१ महाजलं A., महाज्यलं D.—व्यास Bö., Yajñ., K.V. ed.; व्यास Hem., K.V. *a*.

२ D. om. from व्याल.—All the other works have the word.

३ यादातिः। हलवाहकादिर्व्वे D.

४ अर्थ्य (or अर्घ्य) Hem.; om. others.

५ °प्रेषणशक्ति° B. C. K. (K. V. ed.)

६ वाह and अर्धवाह K. V., Hem; वाहन and अर्धवाहन Bö., Yajñ.

७ शायिकः B. C. K.; शय्यिकः F.

८ शयितंतो A.; शापितवतो D.—Hem. has it both combined and separated; the others separated only (सुखशय्याः। इति केचित Yajñ.)

९ The MSS. waver between च and व here and in the text.—Hem. has स्फिगचाल and पुतचाल; both of which are omitted by the others.

उपदेशधनुर्देशडोपनिजस्तधनुःस्फिजः ।
उपाच्च हस्तिवेषस्थस्थानान्युपास्तिरित्यपि[1] ॥ ३७७ ॥

उपदेशेन जीवति । औपदेशिकः ॥ * ॥ धानुर्दण्डिकः ॥ * ॥ उपनिजस्तं[2] किल पैशुनम् । औपनिजस्तिकः ॥ * ॥ धानुष्कः ॥ * ॥ स्फैजिकः ॥ * ॥ औपहस्तिकः[3] ॥ * ॥ औपवेषिकः[4] ॥ * ॥ औपस्थिकः[5] ॥ * ॥ औपस्थानिकः ॥ * ॥ औपास्तिकः[6] ॥ ३७७ ॥ इति वेतनादिः ॥

उत्सङ्गपिटकावुक्तावुट्टुपोत्तुपसंयुतौ[7] ।
उडुपोऽथ पिटाकश्च स्यादुत्पुटोत्पुतौ तथा[8] ॥ ३७८ ॥

हरत्युत्सङ्गादेरित्यनेन तेन हरतीत्येतस्मिन्नर्थे ठञ् भवति ॥ * ॥ उत्सङ्गेन हरति । औत्सङ्गिकः कुमारः ॥ * ॥ पैटकिकः ॥ * ॥ उत्पूर्वात् तुप तुम्प हिंसायामित्यत इगुपान्तलक्षणे के[9] । अत एव निपातनात्तकारस्य पत्वे टकारः । औट्टुपिकः[10] ॥ औत्तुपिकः[11] ॥ * ॥ औडुपिकः ॥ * ॥ पैटाकिकः ॥ * ॥ औत्पुटिकः ॥ * ॥ उद्गतं[12] पुतम् उत्पुतम् । औत्पुतिकः ॥ ३७८ ॥ इत्युत्सङ्गादिः ॥

---

१ °वेश° E.; वेषस्थास्था° B. C. D.; °वेषस्थाः स्था° K.

२ Thus also Hem.; om. others.

३ उपहस्त Bö., Yajñ., Hem.; om. Kâś. V.

४ औपवेशिकः B. C. K. (preceding śloka).—Hem. उपवेश and उपवेष; the others उपवेश.

५ उपस्थेन जीवति औपस्थिकी वराङ्गना Yajñ.

६ औपास्थिकः A.—उपास्थि Hem.; om. by the others.

७ उट्टुपोत्तप° B.K.; उट्टुपोत्तप° C.; °उट्टुपो उत्तुप° D.; °उत्तुपोत्तुटसंयुतौ E.; उट्टुपोत्तु° F.

८ उडपो थ° स्यादुत्पुत्पुतो तथा B. C.K.; स्यत्पुरोथशुतो थुतः D.; °ततः E.

९ Cf. Pâṇ. iii. 1, 135.

१० ठकारः° A. F.; औट्टुपिकः F. K.

११ औत्तूपिकः A.; औत्तपिकः B. C. K.—उत्तुप । उट्टुप Hem.; उट्टुप, उत्तुप Kâś. V. *a.*; om. by the others.

१२ उद्गतं° A.; उद्वतं F.; औद्गतं C.

प्रोक्ता भस्त्रा भरणं शीर्षभारः
शीर्षभारो भरटश्चांसभारः[1]।
अंसेभारः करणं पङ्कभारो
ज्ञेयः प्राज्ञैः करटोऽन्येऽपि शब्दाः[2] ॥ ३७९ ॥

भस्त्रादेष्ठङ् इत्यनेन[3] तेन हरतीत्यर्थे ठङ्[4] भवति ॥ * ॥ भस्त्रया हरति। भस्त्रिकः। भस्त्रिकी ॥ * ॥ भ्रियते भरणम्। भरणिकः ॥ * ॥ शीर्षे भारः शीर्षभारः। शीर्षभारिकः ॥ शीर्षेभारिकः ॥ * ॥ भरटः स्रवविशेषः। भरटिकः[5] ॥ * ॥ अंसभारिकः ॥ अंसेभारिकः[6] ॥ * ॥ करणिकः ॥ * ॥

शनैः शनैरुपचितपङ्कभारिकाः
पयोधराः प्रययुरपेतवृष्टयः[7] ॥
करटिकः[8] ॥ एतौ वामनमतेन ॥ * ॥ वातोर्मीयं गदिता भौ तगौ ग इति वृत्तम्[9] ॥ ३७९ ॥ इति भस्त्रादिः ॥

अक्षद्यूतोऽथ जङ्घाप्राङ्हतं हतं गतागतम्।
पादस्वेदनं यातोपयातं कण्टकमर्दनम् ॥ ३८० ॥

---

१ चरटश्चासंभारः E.; °चांशभारः B. D. F. K.

२ अंशेभारः° D.; आंशंभारः° F.

३ भस्त्रादेष्ठञ्° A. (cf. śl. 375).

४ ठञ D.; तदु A.

५ ?सरटः° C.; भरतः° A.; भारटिकः A. D.—सरटः स्रवविशेषः सरटिकः। भरटेति केचित् Yajñ.; भरट Bö., Kâś. V., Hem.

६ अंशभारिकः। अंशेभारिकः MSS. —Hem. has the above two and अंगभार, अंगेभार.

७ Śiś. 17, 63 (पयोमुचः° eds.); D. om. from शनैः.

८ The other works omit करण, करट and पङ्कभार.

९ वातोर्म्मौ स्तौ गदिता° A.; om. D.; °तगौ गुरुश्चेत्। इति° F.

निर्वृत्ते[1] ऽचद्यूतादेरित्यनेनैतस्मात् तेन निर्वृत्त इत्यर्थे ठञ् भवति ॥ * ॥ अचद्यूतेन निर्वृत्तम् । आचद्यूतिकम् ॥ * ॥ जाङ्घाप्रहृतिकम् ॥ * ॥ जाङ्घाप्रहृतिकम् ॥ * ॥ गतं च तद् आगतं च । गतागतम् । गातागतिकम् ॥ गतानुगतमित्यन्ये ॥ * ॥ पादयोः खेदनं पादखेदनम् । पादखेदनिकम् ॥ पादखेद इत्यन्ये ॥ * ॥ यातोपयातिकम् ॥ यातिकम् औपयातिकमित्यन्ये[2] ॥ * ॥ काण्टकमर्दनिकम् ॥ कण्टकमर्द इत्यन्ये ॥ ३८० ॥

शर्करामर्दनं[3] सत्त्ववागङ्गानुगतानि च ।
अन्येऽपि ध्वनयो लक्ष्या अक्षद्यूतादिनामनि ॥ ३८१ ॥

शार्करामर्दनिकम् । शर्करामर्द[4] इत्यन्ये ॥ * ॥ सत्त्वं मनो गुणो वा । सात्त्विकः ॥ * ॥ वाचिकः ॥ * ॥ आङ्गिकः ॥ * ॥ आनुगतिकः ॥ * ॥ अन्येऽपीत्याकृतिगणत्वादिति शेषः ॥ ३८१ ॥ इत्यचद्यूतादिः ॥

निकटो भिक्षुके वृक्षमूलमावसथस्तथा ।
श्मशानाभ्रावकाशौ च निकटादौ बुधैर्मतौ ॥ ३८२ ॥

निकटादेर्वसतीत्यनेनास्मात्तच्च[5] वसतीत्यर्थे ठञ् भवति ॥ * ॥ निकटे वसति । नैकटिकः । यो ग्रामसमीपे वसत्यारण्यको भिक्षुः स एवमुच्यते प्रसिद्धेः[6] ॥ * ॥ वार्क्षमूलिकः ॥ * ॥ आवसथिकः ॥ * ॥ श्मा-

---

१ निवृत्ते° throughout A. B. C. F. K.

२ Hem. combined and separate; the others combined only.

३ सर्करामर्दनं E.

४ शर्करामर्दन A.; सर्करामर्द D.—शर्करामर्दन Hem.; om. by the others.

५ निकटादीर्व° A.; निकटादी व° D.; cf. P. iv. 4, 73; 74.

६ नैकटिकः । आरण्यकेन भिक्षुणा ग्रामात् कोशे (read क्रोशे) वस्तव्यमिति यस्य शास्त्रतो वासः स एवोच्यते । Hem.

ग्रानिकः ॥ * ॥ आभ्रावकाग्निकः ॥ अभ्यवकाग्[1] इति ग्रकटाङ्गजः ॥ ३८२ ॥ इति निकटादिः ॥

महिषी मणिपाली ग्रानोर्लेपिका पुरोहितः ।
प्रजापतिप्रजावत्यनुचारकविलेपिकाः ॥ ३८३ ॥

ऋमहिष्यादेरण् इत्यनेन ऋकारान्तान्महिष्यादेश्चास्य धर्म्यमित्यर्थे ऽण् भवति ॥ * ॥ होतुर्धर्म्यम् । हौत्रम् ॥ * ॥ महिष्या धर्म्यं न्याय्यं युक्तमित्यर्थः । माहिषम् ॥ * ॥ मणीन्पालयतीति मणिपाली स्त्री । माणिपालम् ॥ * ॥ प्रलिम्पत्यनुलिम्पति वा । प्रलेपिका । अनुलेपिका । प्रालेपिकम् । आनुलेपिकम् ॥ * ॥ पुरो दधाति स्म । पुरोहितः । पौरोहितम् ॥ * ॥ प्रजानां पतिः । प्रजापतिः । प्राजापतम् ॥ * ॥ प्रजा अस्याः सन्ति । प्रजावती । प्राजावतम् ॥ * ॥ अनुचरति । अनुचारकः । आनुचारकम् ॥ * ॥ विलिम्पतीति विलेपिका । वैलेपिकम् ॥ ३८३ ॥

यजमानोऽनुवाकश्च नरो वर्णकपेषिका ।

यजते । यजमानः । याजमानम् ॥ होढ्रयजमानेति केचित्पठन्ति । तत्र होता च यजमानश्च । होढ्रयजमानम् । तस्य धर्म्यं[2] हौढ्रयजमानम् ॥ * ॥ आनुवाकम् ॥ * ॥ नारम् ॥ * ॥ पिनष्टीति पेषिका । वर्णानां पेषिका वर्णकपेषिका[3] । अकयाजकादिभिरित्यनेन समासे ।

---

१ अभ्यवाकाग्र B. C. F. K.—अभ्यवकाग्र Hem.; cf. St. Petersb. Dict. s.v. अभ्रावकाग्निक and अभ्यवकाग्निक.

२ B. C. K. om. from होतृयजमानं.—होतृ and यजमान Bö., Yajñ., K. V.; यजमान and होतृयजमान Hem., whose rule ऋन्नरादेरण् (नरादि = our महिष्यादि), as the one quoted by Vardh., includes होतृ; cf. P. iv. 4, 48-9.

३ वर्णपेषिका MSS. (D. orig. °क°).

वार्णकपेषिकम्[1] ॥ अन्ये तु वर्णक पेषिकेति[2] च्छिन्दन्ति ॥ * ॥ इति महिष्यादिः ॥

शक्तियष्ट्यष्टमा दण्ड ईषेष्टी[3] काम्पनाभ्रसी ॥ ३८४ ॥

शक्त्यादेष्टीकण् इत्यनेन[4] शक्त्यादेरस्य प्रहरणमित्यर्थे टीकण् भवति ॥ * ॥ शक्तिः प्रहरणमस्य[5]। शाक्तीकः। शाक्तीकी।

स्खलन्ती न क्वचित्तेऽण्वादभ्यग्रफलशालिनी।
अमोघि शक्तिः शाक्तीकैर्लोहजा न शरीरजा[6] ॥ * ॥

याष्टीकः। यथा धनंजयस्य।

याष्टीकं ते स्मरव्यग्राः खेचरस्त्रीवृता वराः[7]।
याष्टीकं ते स्मरव्यग्रास्तं प्रतीच्छन्ति नाभितः ॥ * ॥

अष्टमः प्रहरणमस्य[8]। आष्टमीकः। अयं जिनेन्द्रबुद्धिमतेन ॥ * ॥ दाण्डीकः ॥ * ॥ ईषा प्रहरणमस्य। ऐषीकः ॥ * ॥ इष्टिः प्रहरणमस्य[9]। ऐष्टीकः ॥ * ॥ कम्पनं प्रहरणमस्य। काम्पनीकः ॥ * ॥ अभ्रः प्रहरणमस्य। आभ्रसीकः ॥ * ॥ अपरेषां मते ठञेव[10]। दाण्डिकः। ऐष्टिकः। काम्पनिकः। आभ्रसिकः ॥ ३८४ ॥ इति शक्त्यादिः ॥

---

१ वर्णषिकं A.; वार्णपेषिकं B. F. K.; वर्णपेषिकं C.

२ वर्णकपिकेति B. C. K.; वर्णकापेषिकेति F.—Hem. has वर्णक। पेषिका २ (*i.e.* also combined); the others omit all three.

३ शक्तिषष्ट्याष्ट° A.; इषेष्टी° A. E.; °यष्ट्यमद्दिडेद्देषेष्टी D.

४ शक्त्यादेरकर्णित्य° B. K.; °देरकर्णिरित्य° C.

५ शक्तिप्रहरणमस्य A. B. C. K.

६ Śiśup. 19, 59.

७ ? खेचरः स्त्रीमृताचराः A.; (खेचरी स्त्री नृत्यचराः C.;) °नृताचराः B. K.; °तृतावराः D.; °मृतावराः F.; [? याष्टीकन्ते°; or खेचराः स्त्री°].

८ अष्टमप्र° B. C. K.; अष्टमा प्र° A.

९ इष्टिप्रहरण° A. B. C. K.

१० Cf. P. iv. 4, 57 (शाक्तीक & याष्टीक *ib.* 59); Hem. has the rules vi. 4, (63) शक्तियष्टेष्टीकण्। (64) वेध्यादिभ्यः। (ऐष्टिकः° की। ऐष्टीकः °की).

छत्त्रं चुराप्ररोहौ च विशिकाविशिखे[1] तथा।
अनृतं स्यादुदस्थानं पुरोडा कृषिसंयुता[2] ॥ ३८५ ॥

छत्त्रादेर्ण इत्यनेन तदस्य शीलमित्यर्थे णो भवति ॥ * ॥ छादनादावरणाच्छत्त्रम्। गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तः। छत्त्रशीलः शिष्यः। छात्त्रः ॥ अन्येत्वाञ्ज्ञः। छत्त्रशीलश्छात्त्रः। छत्त्रस्येव शीलमस्येत्यर्थः। छत्त्रं यथा धार्यमाणं वातातपवर्षत्राणाय भवति पुरुषस्य। एवमुपाध्यायो धार्यमाणः शिष्यस्य रागद्वेषक्रोधमोहत्राणाय भवति। स शिष्यं धर्मं ब्रूते। एवमसावुपाध्यायश्छत्त्रमिव च्छत्त्रम्। तच्छीलानुकारिशीलः शिष्यश्छात्त्र इत्युच्यते। गुरुशील इत्यर्थः ॥ * ॥ चोरणं चुरा भिदादिः। चुराशीलश्चौरः ॥ * ॥ प्रारोहः ॥ * ॥ विशिका परहृदयानुप्रवेशः। वैशिकः[3] ॥ * ॥ बञ्चमतया विशिखेव विशिखा। वैशिखः[4] ॥ * ॥ अनृतभाषणम् अनृतम्। आनृतः ॥ * ॥ उदके स्थानम् उदस्थानम् उदवासः। औदस्थानम् ॥ * ॥ पुरो दीयत इति पुरोडा। अत एव वचनादनुपसर्गादप्यड्[5]। पौरोडः ॥ पुरोद इत्यन्ये[6] ॥ * ॥ कर्षणं कृषिः। कार्षः ॥ ३८५ ॥

भक्षाशिक्षाविश्वधाकर्मभिक्षा
विक्षाचुक्षामन्द्रसत्यास्तितिक्षा[7]।
स्योपस्थानं वा तपः स्याद्बुभुक्षा
छत्त्रादिर्विज्ञायतामेष दक्षैः[8] ॥ ३८६ ॥

---

१ °विशिषे A. B. F. K.; °विशेषे C.

२ पुरोडाः क्र° D. F.; °संयुतः F.

३ परहृदयप्रवेशरूपा विशिखक्रियापि विशिखेत्युच्यते। वैशिखः। वैशिकोऽपि अस्यैव पर्यायः। Yajñ.

४ विशिषैव विशिषा विशिखः। A.; विशिषेव विशिखा° B.; विशिखेव विशिखः। C.

५ Cf. Pâṇ. iii. 3, 106.

६ पुरोडा Bö., Yajñ., Hem.; पुरोह Kâś. V. ed.; पुरोड and पुरोडाश Kâś. V. MS. *a*.

७ A. C. om. विक्षा; विक्षानुक्षा° D.; °विक्षावृक्षा° E.; विक्षानुक्षा° F. K.; वुक्षा° C.

८ धीरैः। D. E.

भच अदने भचणं भचा। भाचः॥ * ॥ ग्रेचः॥ * ॥ विश्वं दधाति। विश्वधा सुधा[1]। वैश्वधः॥ * ॥ कार्मः॥ * ॥ भैचः॥ * ॥ विचुचुची[2] इत्यपरिपठितौ धातू। विचणं विचा। वैची॥ चुचणं चुचा शौचम्। चौचः[2]॥ चोचा वस्त्रादिवेषपङ्क्तिरिति[3] वामनः॥ * ॥ मन्द्रशीलः। मान्द्रः॥ * ॥ सत्यभाषणं सत्यम्। तच्छीलमस्य। सात्यः॥ * ॥ तैतिचः॥ * ॥ स्थाशब्दोऽच पठ्यते। स प्रादिपूर्वो गृह्यते। आतो गोऽन्तः[4] प्रादेरित्यङ्प्रत्यये। आस्था नियतविषये प्रत्याशा। संस्था। व्यवस्था। आस्थः। सांस्थ इत्यादि[5]॥ * ॥ औपस्थानः॥ * ॥ तापसः॥ * ॥ बौभुचः॥ * ॥ शकटाङ्गजस्तु चौरी तापसीत्यादौ[6] ङीविधानार्थं क्षुद्रादेरञ् इत्यनेनाञमाह। अस्मान्मते तु गौरादिपाठाश्रयणाद् ङीप्रत्ययः सिद्धः॥ ३८६॥ इति क्षुद्रादिः॥

किंशरस्तगरोशीरपर्णीहरिद्रुगुग्गुलु[7]।
हरिद्रानलदावेतौ स्यगलो[8] नरदस्तथा॥ ३८७॥

किंशरादेष्ठङ् इत्यनेन किंशरादेरस्य[9] पण्यमित्यर्थे ठङ् भवति। किंशरादयो गन्धविशेषवचनाः॥ * ॥ किंशरं पण्यमस्य। किंशरिकः। किंशरिकी॥ * ॥ तगरिकः। तगरिकी॥ * ॥ उशीरिकः। उशीरिकी॥ * ॥

---

१ Thus also Yajñ.; ब्रह्मा F.

२ The MSS. waver throughout between व and च.—विचा and चुचा Bö., Yajñ.; चिचा and चुचा Hem.; विचा and चुचा Kâś. V. *a.*, om. ed.

३ वस्त्रादिपंक्तिरिति A.

४ अतो गोतः° B. C. F. K.; °गोतः D.; cf. Pâṇ. iii. 3, 106 (? गो = उपसर्ग Vop. 26, 193).

५ Hem. excludes °स्थ from the gaṇa, his rule being अङ्स्थाक्षत्रादेरञ्।.

६ चौरतापसीत्यादौ F.

७ °शीरयणी° E.; °गुग्गुलः B. C. K.; गुग्गुलाः F.; गुग्युलाः D.

८ °स्थपलो° D.; क्षुगलो B. C. F. K.

९ B. C. K. waver between किंशर and किसर.—किसर Bö., Yajñ., K. V. *a.*; किंशर K. V. ed., Hem.

पर्णिकः । पर्णिकी ॥ हरिद्रुकः ॥ हरिद्रुपर्णीत्यन्ये[1] ॥ * ॥ गुग्गुलुकः[2] ॥ * ॥ हरिद्रिकः ॥ * ॥ नलदिकः ॥ * ॥ स्थगलिकः । स्थगर[3] इति शकटाङ्गजः ॥ * ॥ नरदिकः ॥ ३८७ ॥ इति किंशरादिः ॥

इति

श्रीगोविन्दसूरिशिष्यपण्डितश्रीवर्धमानविरचितायां स्वोपज्ञगणरत्नमहोदधिवृत्तौ करोत्याहृतगच्छतिप्राप्तप्रभवति-कार्यदीयतेप्रयोजनचरत्युत्पातसंयोगहरतिवहत्यावहति-पृच्छतिगच्छत्याहृतेनचरतिजीवतिहरतिनिर्वृत्तवसति-धर्म्यप्रहरणशीलपण्यलक्षणार्थविहिततद्धितप्रत्यय-गणनिर्णयो नाम षष्ठोऽध्यायः

समाप्तः ॥

---

१ Hem. has them both combined and separate; Bö., Yajñ. separate only; हरिद्रायणी K. V. ed., हरिद्रापाण (!) *a.*—Bö., Yajñ., K. V. also हरिद्रा, om. Hem.

२ Thus all MSS.—गुग्गुलु & गुग्गुल Hem.; गुग्गुलु Bö., Yajñ., Kâṣ. V. ed.; गुग्गुल *a.*

३ च्छगर A.; A. B. C. F. om. स्थगलिकः, suppl. K.—स्थगर Hem.; स्थागल Bö.; स्थगल (कगलिक इत्यन्ये) Yajñ.; स्थल K. V. *a.*, सुमङ्गल (!) ed.

अथ सप्तमोऽध्यायः ॥

तारकाकुसुमपल्लववेगाः
पुष्पगौरवविचारपिपासाः ।
मञ्जरीस्तबकवर्णकतन्द्रा
दुःखशास्त्रसुखमूर्च्छतरंगाः ॥ ३८८ ॥

संजातं तारकादेरित्यनेनैतस्मात् तदस्य संजातमित्यर्थे इतो भवति ॥ * ॥ तारकाः संजाता अस्य । तारकितं नभः ॥ तारकशब्दोऽप्यत्र ग्राह्यः ॥ * ॥ कुसुमितस्तरुः ॥ * ॥ पल्लवितः ॥ * ॥ वेगितः । वेगवान् ॥ * ॥ पुष्पितः ॥ * ॥ गौरवितः ॥ * ॥ विचारितः ॥ * ॥ पिपासितः ॥ * ॥ मञ्जरितः ॥ * ॥ स्तबकितः ॥ * ॥ वर्णकितः ॥ कर्णकितो[1] वेणुरित्यन्यः ॥ * ॥ तन्द्रितः ॥ * ॥ दुःखितः ॥ * ॥ शास्त्रितः ॥ * ॥ सुखितः ॥ * ॥ मूर्च्छितः ॥ * ॥ तरंगितः ॥ ३८८ ॥

निद्रामुद्रापुलकतिलकाश्चन्द्रकाभ्रान्धकारा
गर्वोत्कण्ठामुकुलमुकुरद्रोहदोहा बुभुक्षा ।
हर्षोत्कर्षव्रणकुवलयव्याधिगर्धाः पुरीषं
क्षुत्सीमन्तज्वरभरगरा रागरोमाञ्चरोगाः ॥ ३८९ ॥

---

१ कर्णवितो A.; ॥ वर्णकितो वेणु° B. C. F., orig. K. (corr. ॥ वर्णकितः वर्णकितो वेणु).—कर्णक Bö., Yajñ., Hem., K. V. *a.*; वर्णक Bö., *v.l.* Kâś. V. ed.; पर्णक Hem., K. V. *a.* [कर्ण इव कर्णको दारुविकारः कर्णकितः स्तंभः । Yajñ.]

निद्रितः ॥ * ॥ मुद्रितः साधुवादः ॥ * ॥ पुलकिता तन्वी तवेयं तनुः[1] ॥ * ॥ तिलकितः ॥ * ॥ चन्द्रकितः ॥ * ॥

ददर्श काले दिवमभ्रितामिव[2] ॥ * ॥

अन्धकारितः ॥ * ॥ गर्वितः ॥ * ॥ उत्कण्ठितः ॥ * ॥ मुकुलितः ॥ * ॥ मुकुर आदर्शो मुकुलं च। मुकुरितः ॥ * ॥ द्रोहितः ॥ * ॥ दोहितः ॥ * ॥ बुभुक्षितः ॥ * ॥ हर्षितः ॥ * ॥ उत्कर्षितः ॥ * ॥ व्रणितः ॥ * ॥ कुवलयितः ॥ * ॥ व्याधितः ॥ * ॥ गर्धितः ॥ * ॥ पुरीषितः ॥ * ॥ क्षुधितः ॥ * ॥ सीमन्तितः ॥ * ॥ ज्वरितः ॥ * ॥ भरितः ॥ * ॥ गरितः ॥ * ॥ रागितः ॥ * ॥ रोमाञ्चितः ॥ * ॥ रोगितः ॥ ३८९ ॥

पण्डा कन्दलकज्जलं किसलयं तृट् कण्टकं[3] कोरकः
कल्लोलस्थपुटं कुतूहलफलं चाङ्गारकः कञ्चुकः।
शृङ्गाराङ्कुरशैवलानि बकुलश्वभ्रप्रचारास्तथा
वर्मारालकलङ्ककर्दमयुतं श्रद्धा ऋजीषं[4] मतम् ॥ ३९० ॥

पण्डा बुद्धिः। पण्डितः ॥ * ॥ कन्दलितः ॥ * ॥ कज्जलं मषी। कज्जलितः ॥ * ॥ किसलयितः[5] ॥ * ॥ तृषितः ॥ * ॥ कण्टकितः ॥ * ॥ कोरकितः ॥ * ॥ कल्लोलितः ॥ * ॥ स्थपुटितः ॥ * ॥ कुतूहलितः ॥ * ॥ फलितः ॥ * ॥ अङ्गारकितः पलाशः[6] ॥ अथवा।

अङ्गारितमिवोत्पाते वारिराशेरिवोदकम्[7] ॥ * ॥

---

१ तथेयं तनुः MSS., except F.—See com. on Kâvyapr. i. 4; on Sâhity. śl. 27.

२ Raghuv. iii. 12.

३ किशलयं° A. D.; चिष्कंटकं A.

४ चर्माराल° C. F.; श्रद्धजजीषं E.

५ किशलयितः A.

६ पलाशठी D.—अत्रांगारकशब्दोंगारसदृशेषु पलाशकुसुमेषु लक्षणया वर्तते। Yajñ.

७ अंगारकितमिवो° MSS. [अङ्गार cf. next śloka]; वारिराशिरि° A. K.; वारिदोदकं B. C., orig. K.

कञ्चुकितः ॥ * ॥ भृङ्गारितः ॥ * ॥ अङ्कुरितः ॥ * ॥ श्रैवलितः ॥ * ॥ बकुलं मुकुलम्[1]। बकुलितस्तरुः। अयं शकटाङ्गजमतेन ॥ * ॥ श्वानो भ्रमन्त्यत्र। श्वभ्रं गर्तः। श्वभ्रितं भूतलम् ॥ * ॥ प्रचारितः ॥ * ॥ वर्मितः[2] ॥ * ॥ आरालमिति मूत्रपुरीषयोः[3] संज्ञा। आरालितः ॥ * ॥ कलङ्कितः ॥ * ॥ कर्दमितः ॥ * ॥ अङ्कितः ॥ * ॥ ऋजीषम् उपहतं मलं पिष्टपचनं च। ऋजीषितः[4] ॥ ऋचीषमित्यन्यः ॥ ३९० ॥

संज्ञाकुड्मलमूर्छानिष्क्रमणाङ्गारहस्तकोच्चाराः[5]।
प्रतिबिम्बविघ्नतन्त्रप्रत्ययदीक्षा[6] भवेन्नर्जा ॥ ३९१ ॥

संज्ञितः ॥ * ॥ कुड्मलितः ॥ * ॥ मूर्छितः ॥ * ॥ निष्क्रमणितः ॥ * ॥ अङ्गारितः ॥ * ॥ हस्तकितः[7] ॥ * ॥ उच्चारितः ॥ * ॥ प्रतिबिम्बितः[8] ॥ * ॥ विघ्नितः ॥ * ॥ तन्त्रं संजातमस्य। तन्त्रितः ॥ तन्द्रा। आलस्यमिति द्रमिडाः[9] पठन्ति ॥ * ॥ प्रत्यय आश्वासः। प्रत्ययितः। आप्तः ॥ यथा मुरारेः[10]। ब्रवीति च प्रत्ययितो महर्षिः ॥ * ॥ दीक्षितः ॥ * ॥ गर्जितः। मत्तो गजः ॥

---

१ मकुलं B. C. K.; बकुलं कुड्मलम् Yajñ.—F. (and once corr. K.) and Yajñ. write बकुल; Bö., Hem. वकुल; om. K.V.

२ चर्मितः A. F.—Bö., Yâjñ. वर्मन्; om. Kâṣ. V., Hem.

३ पुंमूत्रपुरीषयोः A.—आरालमिति (!) मूत्रपुरीषयोः संज्ञेति वर्धमानः। आरालः कुटिले सर्जरसे समदर्दंतिनीति मेदिनीकारः (ल 58) आरालितः। Yajñ.; आराल Bö.; om. Kâṣ. V., Hem.

४ ऋजीष उपहतमलं पिष्टपवनं च Yajñ.—All others have ऋजीष only.

५ °कुड्मल° A. E.; कु-ल° D.

६ प्रतिबंधविघ्न° B. C. K.; इतिविस्तविघ्न° D.

७ हस्तको हस्तावलंबः° Yajñ.

८ प्रतिबंधितः B. C. K.—प्रतिबिम्ब Bö., Yajñ.; om. Kâṣ. V., Hem.

९ तंत्रा आल° द्रनिडाः A.; तंत्रा आलस्य इति प्रामिडाः D.—तंत्र Yajñ.; विघ्नतन्त्र Bö.; तन्द्रा K. V. ed., MSS.; Hem.

१० Anarghar. iii. śl. 29 (ed. Calc. S. 1782 p. 71).

ननु क्तप्रत्यये भुजेः पिबतेश्च सनन्तस्य विहिते सिद्धं बुभुक्षितः पिपासित इति । तथा पुष्प विकसन[1] इति दैवादिकधातोः पुष्पित इति । सुखितो दुःखित इति चुरादिण्यन्ताद्धातोः । नैवम् । अर्थवैषम्यात् । तथा हि । भोक्तुमिष्टो बुभुक्षित ओदनो नरेण । पातुमिष्टं पिपासितं चीरमिति कर्मणि क्तप्रत्यये बुभुक्षितादिशब्द ओदनादौ कर्मणि वर्तते न तु नरि कर्तरि[2] । इतप्रत्ययान्तस्तु भोक्तृपुरुषवृत्तिः ॥ पुष्पितशब्दोऽपि क्तान्तः । पुष्पिता कलिका । पुष्पितं कमलमिति वा विकासक्रियोपेतेऽर्थे प्रतीत इतप्रत्ययान्तस्तु[3] प्रसवोपेते चम्पकादौ वर्तते । सुखितदुःखितशब्दयोस्त्वपेक्षितापरकर्तृव्यापारः सुखादिसंवित्तिमांश्चेत्रादिः प्रतीयते । इतप्रत्यये त्वनपेक्षितपरव्यापारः सुखाद्यनुभवयुक्त इति ततो युक्तोऽमीषामत्र पाठः । एवमन्येषामपि फलं दर्शनीयम् ॥ * ॥ आकृतिगणोऽयम् । तेन शिक्षाजिगीषाक्षिद्रारोहप्रभृतयो द्रष्टव्याः[4] ॥ ३९१ ॥ इति तारकादिः ॥

पृथ्वाप्रियपाण्डुचण्डपटवः खण्डूरुखण्डाणवः[5]
साधुः स्वादुमृदू महल्लघुतनुक्षिप्राणि वृद्धो गुरुः ।
वक्राकिंचनचारुपाकबहवो वत्सर्जुतृप्राणि[6] च
क्षुद्रः कालवृषौ महिष्ठ[7] बहुलं ह्रस्वोऽथ होडः कृडुः[8] ॥३९२॥

पृथ्वादेरिमन् इत्यनेन तस्य भाव इत्यर्थे इमन् वा भवति । पक्षे

---

१ Dhâtup. 26, 15.

२ ननु रि क°रि D.; F. om. नरि.

३ D. om. from भोक्तृपुरुषवृत्तिः.

४ ? °जिगीषानिद्रारोह° A.; °जिगीषाक्षिद्ररोद्रप्रभृतयो K. (suppl.); B. C. F. and orig. K. om. from एवमन्येषामपि.

५ पृथ्वासु° पटवर्षदूरखंडाणवः A.; °पटवो खंडूरू° (!) B. C. E. F. K.; °चंद्रपटवः° D.

६ °तप्राणि E.; तृप्राणि A. D.

७ महश्च° E.

८ ? क्षदुः C. K. (? B.); कडुः D. E.; कटुः F.

यथाप्राप्तम् ॥ * ॥ पृथोर्भावः । प्रथिमा । पार्थवम् । पृथुत्वम् । पृथुता ॥ * ॥ आश्रिमा ॥ * ॥ प्रेमा ॥ अयमिमनन्तः[1] पुंलिङ्गः सर्वत्र व्याकरणग्रन्थे पटिमा लघिमेत्युदाह्रियमाणो दृश्यते । भर्त्रीश्वरेणापि[2] वारणार्थानामित्यत्र पुंलिङ्ग एव प्रयुक्तः । सत्त्वेन परिगृहीतः[3] प्रेमा संनिविशते ॥ लिङ्गकारिकास्वयं नित्यं पुंलिङ्ग एव । ततश्चार्धर्चाद्यन्तर्भावप्रसारिकापि[4] कर्तुं न युज्यते ।

भवतोऽपजनोपपदे अङ्गपदे[5] पुंसि नित्यमिमनिच्च ।

अपशब्दजनशब्दोपपदे यथासंख्यमङ्गपदे नित्यं पुंसि भवतः । अयमपाङ्गः । अयं जनपदः । इमनिच्च नित्यं पुंसीति वर्तते । पटिमा लघिमेत्ययमर्थोऽस्याः । एवं य एते काव्यनाटकप्रयोगाः ।

प्रेम कारयति वा निरन्तरम्[6] ।
प्रेम पश्यति भयान्यपदेऽपि[7] ।
प्रेम मानमवधूय वधूः स्वाः[8] ।
सामर्थ्यं च तवार्जुनस्य[9] च समं दुर्योधने प्रेम च ।

इत्येकवाक्यतया नपुंसकेन दृश्यन्ते । तेष्वियं गतिः । स्नेहपर्याय श्रीणादिको मनिन्प्रत्ययान्तः प्रातिपदिको वाव्युत्पन्नः[10] प्रेमन्शब्दोऽस्तीति ॥ * ॥ पाण्डिमा । अयं श्रीभोजमतेन[11] ॥ * ॥ चण्डिमा ॥ * ॥ पटिमा

---

१ °इनंतः A.; इनंनतः B.; अनंतः D.

२ भर्त्तास्वरेणापि A.; भर्त्तश्चिरेणापि D.—[? °वर्णार्थानामित्यत्र].

३ स्वत्वेन° B. C. F. K.; सत्वेन परिगृहीत। A.; सत्वेन परिगृहीते D.

४ ? °द्यन्तर्भावः । प्रसारिकापि A.; °र्भावः पादप्रसारिकापि B. C. F. K.

५ भवतोंगजनोपपदांगपदे B. C. K.; भवतो जनो° A.; लिंगानुशासनेऽपि अपजनोपपदांग° इमनिच्चेति स्मर्यते । Yajñ.; cf. Siddh. K. 4°. p. 249b. l. 13.

६ Kirât. 13, 61.

७ Kirât. 9, 70.

८ Śiśup. 10, 2.

९ तथार्जुनस्य B. C. F. K.

१० वा अव्युत्पन्नः D.; cf. Un. S. iv. 144.

११ Hem. alone has the words पांडु, वृद्ध, चारु, काल.

॥ * ॥ खण्डोर्भावः । खण्डिमा । दण्ड इत्यन्यः[1] ॥ अयं शकटाङ्गजमतेन ॥ * ॥ वरिमा । उरुत्वम् ॥ * ॥ खण्डस्य भावः । खण्डिमा ॥ * ॥ अणिमा ॥ * ॥ साधिमा ॥ * ॥ खादिमा ॥ * ॥ स्वदिमा ॥ * ॥ महिमा । महत्त्वम् । महत्ता ॥ * ॥ लघिमा ॥ * ॥ तनिमा ॥ * ॥ क्षेपिमा । क्षिप्रत्वम् ॥ * ॥ वर्षिमा । वृद्धत्वम्[2] ॥ * ॥ गरिमा । गुरुत्वम् ॥ * ॥ वक्रिमा ॥ * ॥ अकिंचनिमा । आकिंचन्यमिति ब्राह्मणादित्वात्[3] ॥ * ॥ चारिमा । चारुत्वम् । अयं श्रीभोजमतेन[2] ॥ * ॥ पाकिमा ॥ वयोऽर्थलक्षणेऽणि[4] । पाकम् ॥ * ॥ बह्वोर्भावः । भूमा । यथा । परं भूमानमातन्वते[5] ॥ बाहवम् ॥ * ॥ वत्सिमा । वात्सम् ॥ * ॥ ऋजिमा[6] । आर्जवम् ॥ * ॥ तृप्रिमा[7] । अयं श्रीभोजमतेन ॥ * ॥ क्षोदिमा । क्षुद्रत्वम् ॥ * ॥ कालिमा । कालत्वम् । अयं श्रीभोजमतेन[2] ॥ * ॥ तृषिमा ॥ * ॥ महिमा । महित्वम्[8] । अयं शकटाङ्गजमतेन ॥ * ॥ बंहिमा । बाऊल्यं ब्राह्मणादिपाठात् ष्ण्ट्[3] । मनोज्ञादिपाठाद् बाऊलकम्[9] ॥ * ॥ ह्रसिमा । ह्रस्वत्वम् ॥ * ॥ होडिमा[10] । वयोऽर्थलक्षणेऽणि प्राप्ते । ब्राह्मणादित्वाद् हौड्यम्[11] ॥ * ॥ क्षुर्मन्तुः । क्षुडिमा । क्षुडुत्वम् । कार्डवम्[12] ॥ ३९२ ॥ इति पृथ्वादिः ॥

---

१ षंडो । भाव षंडिमाः ।° A.; °डंड इत्यन्यः D.—खंडु Hem.; दण्ड Bö., Yajñ.

२ See note 11, preceding page.

३ Not given in (âkṛitigaṇa) ब्राह्मणादि ṣl. 395-404.

४ Cf. ṣl. 405 com.; & P. v. 1, 129.

५ Mahâvîrach. ii. ṣl. 45.

६ Om. A. D. F.; °चिप्रिमाः° B.; तृप्रिमा D.

७ तृप्रिमा D. (cf. page 416, note 6); Hem. apparently तृप्र; om. by the others.

८ महत्त्वं F.—Hem. महत् and महि; the others महत् only.

९ See ṣl. 410.

१० होडबालशब्दौ समानार्थौ Yajñ.

११ See ṣl. 401.

१२ ? क्षुर्मंतु क्षुडिमा° कार्डुवं A.; क्षुदु° क्षुद्रिमा क्षुदुत्वं कार्द्दवं C. K.; कटु° कटिमा । कटुत्वं । काटवं F.; कडुर्मभुश्च (or कटु?) कटिमा कटुत्व । काटवंत्वं । D.; Hem. क्षुद्र (corrected from क्षुज्र); om. by the others.

दृढपरिवृढौ मूकश्चुक्रो विशारदसंमती[1]
बधिरमधुरौ बालो मूलं कलो जडपण्डितौ।
लवणतरुणावुष्णः शीतः स्थिराम्लकृशा वृढो[2]
विमतिविमनोमन्दा मूर्खो वियातभृशं तथा ॥ ३९३ ॥

वर्णदृढादेर्ण्यदेत्यनेन वर्णवाचिनो[3] दृढादेश्चास्य भाव इत्यर्थे ण्यद् भवति। ट्यन् च वा ॥ शैथिल्यम् ॥ * ॥ दृढस्य भावः। दार्ढ्यम्। द्रढिमा। दृढता। दृढत्वम् ॥ * ॥ परिवृढस्य भावः। पारिवृढ्यम्। परिव्रढिमा[4] ॥ * ॥ मौक्यम्। मूकिमा ॥ * ॥ चुक्रम् अम्लम्[5]। चौक्र्यम्। चुक्रिमा ॥ * ॥ वैशारद्यम् ॥ शारदशब्दः प्रत्यग्रवाची। यथा। रज्जुशारदमुदकम्। दृषच्छारदाः सक्तवः। सद्यो हि रज्ज्वोद्धृतमुदकं प्रत्यग्रमनुपहतं रज्जुशारदमुच्यते। सद्यश्च दृषदा पिष्टाः सक्तवो दृषच्छारदाः। तत्रायं गुणप्रधानः। शारदं प्रत्यग्रत्वम् अभिनवत्वम्। तद्विगतमस्य। विशारदः प्रवीणः। प्रवीणो लक्षणया। तथा हि। यो यत्र नवः स तत्र मूढः। यस्तु पुराणः स सर्वं जानाति ॥ अथवा। व्युत्पत्तिशून्यः प्रवीणवाची विशारदशब्दः ॥ * ॥ संगता मतिर्यस्यासौ संमतिः। तस्य सांमत्यम्। संमतिमा ॥ शकटाङ्गजमते तु सांमतमित्यपि। स हि लघ्वादेरिक इत्यस्य सूत्रस्यैवंविधमर्थमाह[6]। तथा हि। लघुरादिः समीपभूतो यस्येकस्तदन्तात्तस्य भावे कृते वाणप्रत्ययः[7]। वामनादीनामप्येतत्संमतम् ॥ केचिल्लघ्वादेरिति प्रकृतेर्विशेषणमिच्छ-

---

१ दृढपरिद्दौ A.D.E.; विसारद E.
२ °सीतः E.; शीतः स्थरा° D.; क्षशादृपेर्विमति° A.
३ वर्णादिवाचिनो B. C. F. K.
४ परिदृढस्य° दृढं° द्रढिमा A.
५ चुक्रोऽम्लवेतसः Yajñ.
६ सूत्रस्यैवंविधस्यमर्थमाह B.C.D.K.
७ भावो कृते नाणप्रत्ययो भवति A.; कृत्वे वा° K.; कृत्यया णप्रत्ययः B.; भावे कप्रत्ययाणत्ययः C.

न्ति । कार्शानवम् आरातमित्यणुदाहरन्ति । सांमतमिति च नेच्छन्ति ॥ * ॥ बाधिर्यम् ॥ * ॥ माधुर्यम् ॥ * ॥ बाल्यम् ॥ * ॥ मौख्यम् ॥ * ॥ काव्यम् ॥ * ॥ जाड्यम् ॥ * ॥ पाण्डित्यम् ॥ * ॥ लावण्यम् । लवणिमा ॥ * ॥ तारुण्यम्[1] ॥ * ॥ औष्ण्यम् ॥ * ॥ शैत्यम् ॥ * ॥ स्थैर्यम् ॥ * ॥ आम्ल्यम् । अम्लिमा ॥ * ॥ कार्श्यम् । कृशिमा ॥ * ॥ वार्द्ध्यम् । वृद्धिमा । रत्वविधौ परिवृढशब्दे[2] परिरतन्त्रः । अन्ये तु परिशब्दं विना दृढशब्दं पठन्ति । अयं शकटाङ्गजवामनमतेन ॥ * ॥ विविधा मतिर्यस्यासौ विमतिः । वैमत्यम् । वैमतम् ॥ * ॥ विविधं मनो यस्यासौ विमनाः । वैमनस्यम् ॥ * ॥ मान्द्यम् । मन्दिमा ॥ * ॥ मौर्ख्यम् ॥ * ॥ वैयात्यम्[3] ॥ * ॥ भार्श्यम् । भृशिमा ॥ ३९३ ॥

विलातः स्यात्तथा शुक्रदीर्घसंमनसो[4] मताः ।
ताम्रमाम्रं तथा तृष्णां प्राह श्रीशाकटायनः ॥ ३९४ ॥

विलातो विलासी वयोवचनश्च । वैलात्यम् । विलातिमा[5] ॥ वयोऽर्थलक्षणेऽणि । वैलातम् ॥ * ॥ शुक्रं वीर्यम् । शौक्र्यम् । शुक्रिमा[6] ॥ * ॥ दैर्घ्यम् । द्राघिमा । वामनादयस्तु दीर्घमन्दबालशब्दान्पृथ्वादिगणे पठन्ति ॥ * ॥ सामनस्यम् । समनिमा[7] ॥ * ॥ ताम्रं शुल्बम् । ताम्र्यम् । ताम्रिमा ॥ * ॥ आम्र्यम् । आम्रिमा । अयं वामनमतेनापि ॥ * ॥ तार्ष्ण्यम् । तृष्णिमा ॥ ३९४ ॥ इति दृढादिः ॥

---

१ Bö., Yajñ., K. V. *a.* (ed.) have जवन instead [तरुणेति पाठांतरं Yajñ.]

२ परिदृढशब्दे A.—See comms. on P. vi. 4, 161.—Bö., Yajñ., Hem., दृढ and वृढ; also K.V. *a.* (वृद्ध *β.*); ed. only दृढ.

३ विरुद्धं यातं चेष्टितमस्येति वियात उद्धतः Yajñ.

४ °समनसो D. E.

५ विलातशब्दः प्रथमवयोवाची । विलासिपर्याय इति केचित् Yajñ.—K. V. ed., *a.* *β.* read विलाभ.—For वयो ऽर्थ° see p. 418, note 4.

६ शुक्लं वैर्य° B. C. K.; शुक्लिमा C.

७ सामनस्यां समानिमा D.

ब्राह्मणो वाडबो धूर्तः कुशलालसबालिशाः ।
सममध्यपुरोभ्यः[1] स्थः कविर्नुम् चार्हतो[2] मतः ॥ ३९५ ॥

ब्राह्मणादिपत्यन्तगुणवचनात्कर्मणि वेत्यनेन ब्राह्मणादेः पत्यन्तागुणवचनाच्चास्य भावः कर्म वेत्यर्थे ष्णट् वा भवति । पचे यथाप्राप्तं च ॥ * ॥ ब्राह्मणस्य भावः कर्म वा । ब्राह्मण्यम् ॥ * ॥ वाडव्यम् ॥ * ॥ धौर्त्यम् ॥ * ॥ कौशल्यम् ॥ * ॥ न विद्यते लसः क्रीडनं यस्य सोऽलसः । न लसोऽलस इति वा । आलस्यम् ॥ * ॥ बालिश्यम् ॥ * ॥ सामस्त्यम् ॥ * ॥ माध्यस्थ्यम् । दृष्टेऽप्यवलम्बितेऽर्थे ॥ * ॥ पौरःस्थ्यम्[3] ॥ * ॥ काव्यम् ॥ * ॥ आर्हन्त्यम् आर्हन्ती ॥ ३९५ ॥

निपुणचपलचोरास्तत्परेदंपरौ स्तः
सुहितपिशुनदीना माणवोऽथ प्रकामम् ।
उचितगडुलशीला निष्कुलो दुष्कुलः[4] स्यात्
तरतमविषमस्थावेकभावान्यभावौ ॥ ३९६ ॥

नैपुण्यम् ॥ * ॥ चापल्यम् ॥ * ॥ चौर्यम् ॥ * ॥ तात्पर्यम् ॥ * ॥ ऐदंपर्यम् । यथा भवभूतेः ।

इदं तैदंपर्यं यदुत नृपतेर्नर्मसचिवः ।
सुतादानाम्नित्वं भवतु स भवान्नन्दन इति[5] ॥ * ॥

---

१ °पुरेभ्यः° A. D. E. K.; C. om. the second half-śloka.

२ कविर्नुम्वार्हतो A. B. C. E. F. K.; °र्नुश्वा° D.; see vârtt. on Pân. v. 1, 124.

३ पौरस्थ्यं A. B. K. F.; पौरष्यं D.; पौरव्यं C.

४ दुष्कलः B.E.; दुःखल A.; D. om. from ला निष्कुलो to śl. 399.

५ Mâlatîm. ii. śl. 7 [ed. Bhandarkar, p. 91 reads °भवतु स हि नो (*v.l.* MS. सचिवान्; ed. Calc. 1866, p. 37 स हि मे) नन्दन इति].

सौहित्यम् ॥ * ॥ पैशून्यम् ॥ * ॥ दैन्यम् ॥ * ॥ माणव्यम् ॥ * ॥ प्रकाममित्यस्य भावः प्राकाम्यम् ॥ प्राकाम्यं ते विभूतिषु[1] ॥ * ॥ औचित्यम् । औचिती ॥ * ॥ गडुरस्यास्तीति गडुलः । गाडुल्यम् ॥ * ॥ शैल्यम् । शैली ॥ * ॥ नैष्कुल्यम् ॥ * ॥ दौष्कुल्यम् ॥ * ॥ तरतमेत्यस्य भावः । तारतम्यम् । द्विबह्वपेक्षः प्रकर्षः ॥ * ॥ वैषम्यम् ॥ * ॥ एको भावो यस्य तस्य भाव ऐकभाव्यम् ॥ * ॥ आन्यभाव्यम् ॥ ३९६ ॥

विदग्धदायादयथापुरद्विभावा
यथाकामयथातथौ च ।
विराधयः कापुरुषस्वभावाभीक्ष्णं
समग्राधिपतित्रिभावाः[2] ॥ ३९७ ॥

वैदग्ध्यम् । वैदग्धी ॥ * ॥ दायमादत्ते । दायादः । दायाद्यम् ॥ * ॥ यथापुरं पुरातनमित्यर्थः । यथापुरमित्यस्य भावः । यथापुर्यम् ॥ * ॥ द्वैभाव्यम् ॥ * ॥ यथाकाममित्यस्य भावः । यथाकाम्यम् । यथाकामी ॥ * ॥ यथातथं सत्यम् । यथातथ्यम् ॥ यथातथेत्यन्यः[3] ॥ * ॥ विपूर्वाद् राधयतेरचि णेर्लुग् न भवति गणपाठात्[4] । जनपदसमाननामा क्षत्रियः । तस्मादपत्यार्थे विहितस्याञः कम्बोजादित्वात् लुकि[5] । वैराधय्यम् । एवम् उपराधयापिराधयाराधयशब्देषु[6] द्रष्ट-

---

१ Kumâras. ii. 11.

२ विधारयः° E., cf. note ५; D. om. śloka and comment.

३ ? यथातथेत्य° A.—Hem. has यथा । तथा । यथातथ among the बुधादि, which take य, (also?) when नञ्तत्पुरुष cf. śl. 404.

४ गणपाठसामर्थ्यात् C.

५ See śl. 201 where राधय should be read for धारय (see note २).

६ °उपराधयापराधयाराधय° B. F.; उपराधयाराधयाराधय° C. K. (the second रा suppl. in K.); for अपिराधय see śl. 401.

व्यम् ॥ * ॥ कापुरुष्यम् ॥ * ॥ खाभाव्यम् ॥ * ॥ अभीक्ष्णमित्यस्य भावः । आभीक्ष्ण्यम् ॥ * ॥ सामय्यम् । सामग्री ॥ * ॥ आधिपत्यम् ॥ * ॥ चैभाव्यम् ॥ ३९७ ॥

ज्येष्ठश्रेष्ठप्रकटनिकटा विश्वरूपाभिरूपौ
साक्षी तत्स्थश्चतुरपरमस्थेतिहाः शीर्षघाती ।
ऋत्विक् सम्राड् गणपतिमहाराजसंवादिदूताः
सात्मस्तेनौ[1] सुकरसदृशौ मानुषाराधयौ च ॥ ३९८ ॥

ज्यैष्ठ्यम् ॥ * ॥ श्रैष्ठ्यम् ॥ * ॥ प्राकट्यम् ॥ * ॥ नैकट्यम् ॥ * ॥ वैश्वरूप्यम् ॥ * ॥ आभिरूप्यम् ॥ * ॥ साक्ष्यम् ॥ * ॥ तस्मिंस्तिष्ठतीति तत्स्थः । तात्स्थ्यम् ॥ * ॥ चातुर्यम् । चातुरी ॥ * ॥ पारमस्थ्यम् ॥ * ॥ ऐतिह्यम् ॥ * ॥ शैर्षघात्यम् ॥ * ॥ आर्त्विज्यम् ॥ * ॥ साम्राज्यम् ॥ * ॥ गाणपत्यम् ॥ * ॥ माहाराज्यम् ॥ * ॥ सांवाद्यम् ॥ * ॥ दौत्यम् ॥ लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति न्यायाद् दूतीशब्दादपि भवति । दूतीनां कर्म दौत्यम् । आगतप्रियकथैरपि दौत्यम्[2] । वणिक्सखिदूताद्य दूत्यनेन ये[3] । दूत्यम् । दूतता । दूतत्वम् ॥ * ॥ सहात्मना वर्तते । सात्म शरीरम् । तस्य कर्म भावो वा । सात्म्यम् । सात्मी ॥ * ॥ स्तेनश्चौरः । तस्य भावः कर्म वा । स्तैन्यम् । आगमिकोऽयं शब्दः । स्तैन्याशयेनाभिमतं[4] यदेवेति किमस्य लक्षणचिन्तया लोके[5] ।

---

१ आत्मस्तेनौ B.; सत्यस्तेनौ E.; D. om. text and comment.

२ Kirât. 9, 34 (eds. Calc. दूत्यम्).

३ Cf. Pân. v. 1, 126 with Kâś. V.—Hem. also has the rule vii. 1 (62) सखिवणिग्दूताद्यः॥ °वणिज्या। वणिज्यम्।° दूत्यम्। राजादेराकृतिगणत्वात् ष्यणपि । वाणिज्यम्। दौत्यम् ॥ cf. p. 428, note 5.

४ °येनाभिगतं A.

५ लक्षणे चिंतया लोके B. C. K.; cf. Pân. v. 1, 125.

स्तेयमित्येव भवतीति कश्चित्सचेताः ॥ * ॥ सौकर्यम् ॥ * ॥ सादृश्यम् ॥ * ॥ मानुष्यम् ॥ * ॥ आराधष्यम् ॥ ३९८ ॥

पूर्वापरं दुष्पुरुषो विशायो[1]
विशालसंवेशिविघातिनश्च ।
स्वाराजसंभाषिविशस्तयो[2]ऽपी-
श्वराभिजातौ परिमण्डलं च ॥ ३९९ ॥

पौर्वापर्यम् ॥ * ॥ दौष्पुरुष्यम् ॥ * ॥ वैशाय्यम् ॥ * ॥ वैशाल्यम् ॥ * ॥ सांवेश्यम् ॥ * ॥ वैघात्यम् ॥ * ॥ स्वाराज्यम्[3] ॥ * ॥ सांभाष्यम् ॥ * ॥ वैशस्त्यम्[4] । विशायविशस्तिभ्यां त्वतलौ त्वनभिधानान्न भवतः ॥ * ॥ ऐश्वर्यम् ॥ * ॥ आभिजात्यम् ॥ * ॥ पारिमाण्डल्यम्[5] ॥ ३९९ ॥

परिशेषराजपुरुषौ युगपत्
प्रतिकूलनास्तिकपुनःपुनरः ।
प्रतिभूसुराजबहुभाषिपरं-
परमुत्तराधरसधर्मवणिक्[6] ॥ ४०० ॥

पारिशेष्यम् ॥ * ॥ राजपौरुष्यम्[7] ॥ * ॥ यौगपद्यम् ॥ * ॥ प्रातिकूल्यम् ॥ * ॥ नास्तिक्यम् ॥ * ॥ पौनःपुन्यम् ॥ * ॥ प्रातिभाव्यम्[5] ॥ * ॥

---

१ विसाय A. E.

२ स्वराज° (right?) A., cf. next note.—D. om. text and comment.

३ स्वराज *v.l.* K. V. ed.; om. by the other works.—Hem. has the rule पतिराजान्तगुणाङ्गराजादिभ्यः (cf. p. 428, note 5; P. v. 1, 128).

४ वैशस्त्यं A.—विशस्ति Bö., Kâṣ. V.; विशस्त Hem.

५ Cf. ṣl. 166;—om. by the others, except Kâṣ. V. *β.*; *v.l.* ed.

६ °सुराजिवङ्गभाषि° A. D. E.; °उत्तरावर° E.

७ राजपुरुष्यं A. D.; cf. ṣl. 166.

सुराज्ञो भावः कर्म वा । सौराज्यम् ॥ * ॥ बाऋभाष्यम् ॥ * ॥ पारंपर्यम् ॥ * ॥ औत्तराधर्यम् ॥ * ॥ साधर्म्यम् ॥ * ॥ वणिजो भावः कर्म वा । वाणिज्यम् । अयं शकटाङ्गजमतेन ॥ वणिज्या वणिज्यमिति वामनः[1] ॥ * ॥ प्रमिताचरा सजयुतावथ सौ ॥ ४०० ॥

जनराजसमाचारपरिख्यातोपराधयः ।
युवराजयथात्मानुपूर्वहोडनिघातिनः ॥ ४०१ ॥

जानराज्यम् ॥ * ॥ सामाचार्यम् । सामाचारी ॥ * ॥ पारिख्यात्यम् । पारिख्याती ॥ * ॥ औपराधय्यम् ॥ अपिराधय इत्यपि[2] । अपि भृशार्थे ॥ * ॥ यौवराज्यम् ॥ * ॥ याथात्यम् ॥ * ॥ आनुपूर्व्यम् । आनुपूर्वी ॥ * ॥ हौड्यम् ॥ * ॥ नैघात्यम् ॥ ४०१ ॥

पुरोहितग्रामिकचर्मिकास्तिकाः[3]
स्वस्थोऽथ[4] शौण्डीरविधर्मकर्मिकाः[5] ।
बालानुकूलं[6] शिलिकोऽथ सूचिकः[7]
संरक्षसारथ्यधिराजदण्डिकाः[8] ॥ ४०२ ॥

पौरोहित्यम् ॥ * ॥ ग्रामोऽस्यास्तीति ग्रामिकः । ग्रामिक्यम् ॥ * ॥

---

१ वाणिज्यमिति° A.;—B. C. F. and orig. K. omit from वणिज्या.—Cf. Kâś. V. v. 1, 126; and above p. 423, note 3.

२ अपराधय° B. F. K.; अराधय C.; cf. page 422, note 6.—Hem. अपिराधय; the others अपराधय.

३ °चार्मिकास्तिकाः B. C. K.; वर्मिकास्तिकाः F.

४ स्वस्थो पि D. E.

५ सौडीर° A.; शौडीर° D.; शौंडार° C.; सौंडीर° E.

६ तथानुकूलं E.; ताऽनुकूलं D.

७ Thus A. E.; शूलिकः B. C. F. K.; सचिकः D.

८ संरक्ष्य° A. B. C. F. K.; सरक्ष° D.—Bö., Yajñ. have संरक्ष; om. by Kâś. V., Hem.

चर्मास्यास्तीति चर्मिकः । चार्मिक्यम् [1] ॥ * ॥ आस्तिक्यम् ॥ * ॥ स्वस्मिन्नात्मनि तिष्ठति । स्वस्थः । तस्य स्वास्थ्यम् ॥ * ॥ शौण्डीरो गर्ववान् । शौण्डीर्यम् [2] ॥ * ॥ वैधर्म्यम् ॥ * ॥ कर्मास्तित्वात् कर्मिकः [3] । कार्मिक्यम् ॥ * ॥ बाल्यम् । यथा ।

अवाप बाल्योचितनीलकण्ठपिच्छावचूलाकलनामिवोरः [4] ॥ * ॥ आनुकूल्यम् ॥ * ॥ शिलम् उञ्छम् । तदस्तित्वात् । शिलिक [5] उञ्छवृत्तिकः । शैलिक्यम् ॥ * ॥ सौचिक्यम् [6] ॥ * ॥ सारंग्यम् ॥ * ॥ सारथ्यम् ॥ * ॥ आधिराज्यम् ॥ * ॥ दण्डास्तित्वाद् दण्डिकः । दाण्डिक्यम् ॥ ४०२ ॥

पर्षिकवर्मिकचौक्षौदासीनाः [7] खण्डिकस्तथाञ्जनिकः ।
प्रविकाञ्जलिकच्छत्रिकसूचकविश्वस्तविफलाश्च [8] ॥ ४०३ ॥

पार्षिक्यम् । परिषदिक [9] इति वामनः । अयं भोजमतेन ॥ * ॥ वर्मास्यास्तीति वर्मिकः । वार्मिक्यम् [10] ॥ * ॥ चुचाशीलश्चौचः । चौच्यम् ॥ * ॥ औदासीन्यम् ॥ * ॥ खण्डोऽस्यास्तीति खण्डिकः । खा-

---

१ चार्मिकः° B. K.; वर्मा° वार्मिकः वार्मिक्यं C. F.; वर्मा° वार्मिकं D.; cf. note १०.

२ शौडीरो° A.; शौडीर्य A. D.—Bö., Yajñ. शौटीर; om. by Kâś. V., Hem.

३ का । र्मकः D.; om. B. C. K.

४ Śiś. 3, 5; D. om. from बाल्यं.

५ शिलकः A. D.

६ शौचिकं A.; शौलिक्यं B. F. K.; शैलिक्यं C.—सूचिक Bö., Yajñ., K. V.; twice सूचक (see next śl.) Hem.

७ °धर्मिक° A. D.; चर्म्मिक° F.

८ अविकांजलिक° E.; प्रचिकांजलि° F.; °शूचक° A. D.

९ पारिषदिक° D.; परिषकदिति A.—पर्षिक Bö., Yajñ.; om. K. V., Hem. [पर्षः सेकोऽस्यास्तीति पर्षी अभिषिक्तः स एव पर्षिकः Yajñ.]

१० धर्मोऽस्यास्तीति धर्मिकः । धार्मिक्यं A. D.; चर्मा° चर्मिकः चार्मिक्यं F.; वार्मिकः° B. C.—वर्मिक & धर्मिक Bö., Yajñ., K.V. *a.* (वर्मित ed.); वर्मिक Hem.

ण्डिक्यम् ॥ * ॥ अञ्जनमस्यास्तीति । अञ्जनिकः । आञ्जनिक्यम्[1] ॥ अञ्जनक[2] इत्यपि शकटाङ्गजः ॥ * ॥ प्राविक्यम्[3] । अयं भोजमतेन ॥ * ॥ अञ्जलिरस्यास्तीति । अञ्जलिकः । आञ्जलिक्यम् ॥ * ॥ छात्रिक्यम् ॥ * ॥ सूचयतीति सूचकः । सौचक्यम् ॥ सूतक[4] इत्यन्यः ॥ * ॥ वैश्वस्यम् ॥ * ॥ विगतं फलमस्य । विफलः । वैफल्यम् ॥ ४०३ ॥

क्षेचज्ञोऽथ यथातथपिशुनविदूरा यथापुरनृशंसौ ।
कुशलेश्वरनिपुणा अपि नञ्पूर्वाः सूरिभिः कथिताः ॥ ४०४ ॥

अक्षेचज्ञस्य भावः कर्म वा । आक्षेचज्ञ्यम् । नञः क्षेचज्ञेश्वरकुशलशुचिनिपुणानामित्यनेन[5] नित्यमुत्तरस्यारैच् । पूर्वपदस्य वा ॥ * ॥ अयथातथ्यम् । यथा । गुणानामायथातथ्यात्[6] ॥ अयाथातथ्यम् । यथातथायथापुरयोः पर्यायेणेत्यनेनारैच्[7] । अन्येषां मतमेतत् ॥ * ॥ अपिशुन्यम्[8] ॥ * ॥ अविदूर्यम् ॥ * ॥ अयथापुर्यम् । अयथापुर्यम् ॥ * ॥ आनृशंस्यम् ॥ * ॥ आकौशल्यम् । अकौशल्यम् ॥ * ॥ आनैश्वर्यम् । अनैश्वर्यम् ॥ * ॥ आनैपुण्यम् । अनैपुण्यम् ॥ * ॥ भाष्यकारस्य त्वक्षेचज्ञानीश्वरशब्दावेव संमतौ । नञस्तत्पुरुषादित्यनेनैतेषां त्वतलोरेव

---

१ आंजनक्यं A.; अमनक्यं D.

२ अंजनिक A. C.; अजनिक B.—अजानिक and अञ्जनिक (*v.l.* अन्तनिक) Bö.; अजानिक (अजनीकं केचित्) and अंजनिक Yajñ.; अजानिक, *v.l.* अञ्जतिक K. V. ed., आंजनिक *β.*, om. *a.*; अजिनिक and अंजनिक Hem. [जनादागतं जानं न जानमजानं तद्वान् अजानिकः । अंजनिको अंजनवान् । Yajñ.]

३ प्राचिक्यं F.—K. V. ed. gives the *v.ll.* प्रचिक and प्रविक; प्रतिक Bö., Yajñ. [प्रतिगतं कं सुखं यस्मिन्स प्रतिकः सुखी Yajñ.]

४ सूचक A.—सूचक and सूतिक Bö., Yajñ. [सूतिकायाः सौतिक्यं], K. V.; सूचक and सूतक Hem.

५ Cf. Pâṇ. vii. 3, 30.—Hem. has the rule (vii. 4, 23) नञः क्षेचज्ञेश्वरकुशलचपलनिपुणशुचेः ।; cf. p. 429, l. 10.

६ Śiśup. 2, 56.

७ See Pâṇ. vii. 3, 31.

८ आपिशून्यं MSS.

प्राप्नयोः पाठः[1]। शकटाङ्गजस्तु नञ्पूर्वाणां संवादिन्संवेशिन्वञ्चभाषिन्शीर्षघातिन्समस्थविषमस्थपुरःस्थपरमस्थमध्यस्थदुष्पुरुषकापुरुषविशालशब्दानामेतेषां ष्यणमाह[2]। ब्राह्मणबालिशशब्दौ प्राणिजातिवयोऽर्थौ ताभ्यामण्बाधनार्थम्। माणववाडवशब्दौ चरणवचनौ ताभ्यामकण्बाधनार्थम्। तत्स्थसमस्थविषमस्थपरमस्थमध्यस्थशब्दानां नञ्समासेऽपि पाठः। विराधयाराधयोपराधयापिराधयशब्दानामपत्यलक्षणस्याकणो[3] बाधनार्थः। गणपत्यधिपत्योः पाठः परप्रसिद्ध्या। गडुलदायादविशस्तिविशंपुरशब्देभ्यस्खतलौ[4] न भवत इति वृद्धाः। शकटाङ्गजस्तु बालिशसंवादिन्वञ्चभाषिन्शब्दानामपि नेच्छति। भोजः पुनर्विशस्तिविशायवर्जितेभ्यः सर्वेभ्योऽपि स्वतलाविच्छति ॥ * ॥ आकृतिगणोऽयम्। तेन यथादर्शनमन्येऽपि द्रष्टव्याः ॥ ४०४ ॥ इति ब्राह्मणादिः[5] ॥

युवमिथुनकुलीनभ्रातृसुस्त्रीप्रशास्तृ-
स्थविरचपलदुःस्त्रीदुष्टवो होतृसुष्ठु।

---

१ Cf. Mahâbh. on P. v. 1, 121.

२ Hem. also includes असंवादिन् etc. in the gaṇa बुधादि.

३ अपराधय for अपिराधय F.

४ ? °दायादविश[स्ति suppl. K.]पुर° B. K. F.; °विशपुर° C.; ? K. V. विष (विप्र *a.*; विश्र Bö., Yajñ.) and पुरः; Hem. विशंप.

५ This gaṇa includes ब्राह्मणादि and पुरोहितादि to Pâṇ. v. 1, 124; 128. Also Hem.'s राजादि, गडुलादि and बुधादि (*i.e.* अबुध etc.) in the rules vii. 1 (50-55) भावे स्वतल्॥ प्राक्कादगडुलादेः [गाडुल्य etc. only.] ॥ नञ्तत्पुरुषाद्बुधादेः [°गडुलादीनामपि पाठं केचिदिच्छन्ति। अन्ये तु बुधादीनामष्टानामेव (*i.e.* बुध। चतुर। संगत। लवण। वंड। कत। रस। लस) प्रतिषेधमिच्छन्ति। एषामेव विकल्पमपरे। अथ अणन्तानामेषां नञ्समासो भवति वा न वा। बुधस्य भावः कर्म वा बौध्यं। न बौध्यमबौध्यमिति भवतीत्येके। न भवतीत्यन्ये] ॥ पृथ्वादेरिमन्वा ॥ वर्णदृढादिभ्यष्ष्यञौ ॥ पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ॥. Hem. om. many of the words given above.

कुतुककितवकुस्त्रीकर्तृसब्रह्मचारि-
श्रमणनिपुणवध्वध्वर्यवः कन्दुकश्च[1] ॥ ४०५ ॥

प्राणिजातिवयोऽर्थहायनान्तयुवादिलघ्वादीको ऽण्[2] इत्यनेन युवादेस्तस्य भावः कर्म वेत्यर्थेऽण् भवति । पक्षे यथाप्राप्तम् ॥ * ॥ यूनो भावः कर्म वा । यौवनम् । युवत्वम् । युवता ॥ यौवनिकेत्यपि मनोज्ञादिपाठात्[3] ॥ एवं युवतिशब्दस्यापि लिङ्गग्रहणे[4] लिङ्गविशिष्टस्यापि ग्रहणमिति न्यायात् ॥ * ॥ मैथुनम् ॥ * ॥ कौलीनम् ॥ * ॥ भ्रात्रम् ॥ * ॥ सौस्त्रम् ॥ * ॥ प्रशास्ता ऋत्विक् । प्राशास्त्रम् ॥ * ॥ स्थविर इव स्थविरः । स्थाविरम् ॥ स्थाविर्यमित्यपि ब्राह्मणादित्वात्[5] ॥ * ॥ चापलम् ॥ केचिन्नञ्पूर्वस्याप्यस्य पाठं मन्यन्ते । तन्मते अचापलम् अचापलम्[6] । एवं चेत्रज्ञकुशलनिपुणानामपि ॥ अभ्यघाति मुनिचापलात्त्वया[7] ॥ * ॥ निन्दिता स्त्री । दुःस्त्री । दौःस्त्रम् ॥ * ॥ दुष्टु निन्दितम् । दौष्टवम् ॥ * ॥ होता ऋत्विक् । हौत्रम् ॥ होतुरित्यपि भोजः । हौतवम् ॥ * ॥ सुष्ठु शोभनम् । सौष्टवम् ॥ * ॥ कुतुकं कुत्सितं हसम् । विवाहवाचीत्यन्ये । कौतुकम्[8] ॥ * ॥ कैतवम् ॥ * ॥ कुत्सिता स्त्री कुस्त्री । कौस्त्रम् ॥ * ॥ कार्त्रम् । अयं भोजमतेन[9] ॥ * ॥ समानो ब्रह्मचारी । सब्रह्मचारी । साब्रह्मचारम् । ब्रह्मादीनामित्यनेनान्त्याजादिलुकि[10] ॥ सुब्रह्मचारिन्निति वामनः । तन्मते सौब्रह्मचारिणम् ॥

---

१ °वंध्वध्वर्यवः° A.; पट्वध्वर्यवः° C.; वधध्वर्यवः D.; वद्वध्वर्यवः कुंदुकश्च B.

२ °युवादिशब्दादीकोण् F.; cf. P. v. I, 129-131.

३ Cf. śloka 409.

४ B. C. K. om. लिङ्गग्रहणे.

५ Not given in that (âkṛiti) gaṇa.

६ Om. B. C. F. K.; see p. 427, n. 5.

७ Kirâtârj. 13, 63; D. om. from केचिन्नञ्पूर्व°.

८ कुतुकं कौतुकं कुतू° अन्ये। कौतवं। B. C. K.

९ कर्तृ Hem., K. V. MS. β., *v.l.* ed.; हर्तृ MS. α., Bö., Yajñ.

१० See śloka 163.—Yajñ. forms साब्रह्मचारिणं in accordance with Pâṇ. vi. 4, 134 (ट्नणनपत्ये).

ब्रह्मचारिन्निति चन्द्रः। तन्मते ब्राह्मचारिणम्। अनपत्ये चेति प्रतिषेधाद् इनोऽनोऽणादाविति[1] नान्त्याजादिलोपः ॥ * ॥ आम्यतीति श्रमणः। श्रामणम् ॥ कथं श्रामण्यं प्रतिपेदिर इति प्रयोगो ब्राह्मणादित्वाङ्भवति ॥ श्रृणोति तथोपदेशं[2] श्रवण इति वामनादयः ॥ * ॥ नैपुणम् ॥ * ॥ वाधवम्[3] ॥ * ॥ अध्वर्युर्ऋत्विग्विशेषः। आध्वर्यवम् ॥ * ॥ कान्दुकम्[4] ॥ ४०५ ॥

कुशलवृषलौ क्षेत्रज्ञोऽथानृशंसकुतूहलं[5]
पिशुनसुहृदावुन्नेताऽथो सहस्र[6] कमण्डलुः।
अपि च हृदयं दुःसोः पत्ते रथाङ्गणकस्तथा[7]
हृदयपुरुषौ ज्ञेयावेतौ समासविपर्यये ॥ ४०६ ॥

कौशलम् ॥ * ॥ वार्षलम् ॥ * ॥ क्षैत्रज्ञम् ॥ * ॥ आनृशंसम् ॥ * ॥ कौतूहलम् ॥ * ॥ पैशुनम् ॥ * ॥ शोभनं हृदयं यस्य सुहृन्मित्रम्। निन्दितं हृदयं यस्य दुर्हृद् अमित्रः। सुहृदुर्हृन्मित्रामित्र[8] इति हृदादेशः॥ वामनमतेन हृच्छब्देनैतयोः सिद्धिः। सौहार्दम्। दौर्हार्दम्[9]।

---

१ इनोनोणादाविति A. F.; इनोनोणाः दाविति B. C. K.; अपत्य वेति° इनोणादाविति D.—The other works have सब्रह्मचारिन् only.

२ तत्वोपदेशमिति F.; तत्त्वोत° B. C. K.—श्रवण K. V.; श्रमण Yajñ.; श्रणम (*v.l.* श्रमण) Bö.; श्रमण। श्रमणक। श्रवण। Hem.

३ वांधवं A.; वाटवं B. K.; पाटवं C.; वाघकं D.—वधू Bö., Yajñ., K. V.; om. Hem. (? rightly, as it falls under the general category of लघ्वादीक्;—or बन्धु with A.?).

४ कांडुकं B. C. K.—कंडुक Hem.; कन्दुक K. V. *β.*, *v.l.* ed.; कतक *a.*; om. Bö., Yajñ.

५ चैत्रज्ञो वानृशंस° all MSS.

६ °उन्नेतासौ° A. D.; उन्नेता साहस्र E.

७ पात्ते कुरुषाङ्गणस्तथा A.; रथाङ्गण° B. C. D. E. K.

८ Cf. Pân. v. 4, 150.

९ दौहार्द° दौहार्द्य etc. A. throughout, D. mostly, other MSS. occasionally; cf. दुर्हृद् in next śloka, and the comment. p. 433, l. 6.

हृङ्गसिन्धूनामित्यनेनोभयपदारैच्[1]। शोभनं हृदयं यस्य स सुहृदयः साधुः। दुष्टं हृदयं यस्य स दुर्हृदयः क्रूरः। तयोरपि हृदयस्य हृल्लासलेखाण्[2] इति हृदयस्य हृदादेशः। सौहार्दम्। दौर्हार्दम्। ब्राह्मणादित्वमप्येषाम्। तेन दौर्हार्द्यं सौहार्द्यम्। सौहृदय्यं दौर्हृदय्यमित्यपि। इह सुहृदयदुर्हृदयशब्दावेव पठितव्यौ सुहृदुर्हृच्छब्दावेव वा न तु चत्वारः। अन्यतरपाठेऽपि हि सौहार्दं दौर्हार्दमिति सिध्यति। उच्यते। अर्थभेदात् सुहृदुर्हृच्छब्दौ मित्रामित्रवाचिनौ सुहृदयदुर्हृदयशब्दौ तु नैवम्। तौ हि प्रशस्तनिन्दितहृदयसंबन्धमात्रे वर्तेते। उभयत्रापि च सौहार्दं दौर्हार्दमित्युभयपाठः॥ सौहृदं दौर्हृदमिति च प्रयुज्यते। यथा। तत्सौहृदं यत्क्रियते परोक्षे[3]। कुसुमं कृतदौहृदस्त्वया[4]। तदर्थमेकत्रोभयपदारैज्[5] मा भूत्। अन्यथोभयत्राप्येकरूपत्व उभयपाठानर्थक्यं स्यादित्युभयपाठः। अयं पक्षो वामनस्यापि हृङ्गेत्यत्र सुहृदो भावः सौहार्दमिति दर्शयतः संमतो लक्ष्यते। जयादित्यस्तु सुहृदयदुर्हृदयशब्दौ सुहृदुर्हृच्छब्दौ च[6] पपाठ। स चैवं मन्यते। ब्राह्मणादौ प्रयोगदर्शनादनयोः[7] पाठाङ्गीकरणे वचनसामर्थ्यादेवाण् ष्यञ् च भविष्यतः। असाक्षात्पठितोऽपि हि साक्षात्पठितवत्कल्पत आकृतिगणेष्विति॥ सौहृदेनापि भाषे त्वामि-

---

1 See Pâṇ. vii. 3, 19.

2 हृल्लासण् लेखाणे A.; cf. Pâṇ. vi. 3, 50.

3 Vṛiddha-Châṇ. 15, 8, in Böhtl.'s Ind. Spr. (2nd ed.) 2483 (ed. °यत्क्रियते परस्मिन्॥).

4 Raghuv. 9, 61 (कृतदोहदस्त्वया eds.).

5 तदत्रमेक° B. C. F.

6 B. C. K. om. सुहृदुर्हृच्छब्दौ; °दुर्हृदयशब्दावेव C.—For Vâmana's view see Kâś. V. vii. 3, 19; as to Jayâditya, Vardh. seems to refer to the *gaṇa* in Kâś. V. v. 1, 130 (? v. 4, 150), though only the first four adhyâyas are generally ascribed to Jayâditya. See next page, note 9.

7 प्रयोगदर्शनयोः A.

त्यादयस्तु[1] कविप्रवाहे छन्दोवत्कवयः प्रयुञ्जत इत्युक्तम् ॥ चन्द्रस्तु सौहृदमिति हृदयस्याणि[2] हृदादेशो न हृदुत्तरपदं हृङ्गेत्युत्तरपदारैजभावमाह[3] ॥ भोजस्तु सुहृदुर्हृदौ मित्रामित्रयोरित्यत्र निपातनसामर्थ्यादवयवानर्थक्ये[4] सौहृदं दौर्हृदमिति हृङ्गसिन्धोः पूर्वपदस्य चेत्युत्तरपदारैज् न भवति[5] ॥ * ॥ उन्नेता गवेषणशील इत्यन्ये । औन्नेत्यम् ॥ * ॥ साहसम् ॥ * ॥ कामण्डलवम् । लघ्वादीक इत्यनेन[6] सिद्धे त्वतलोर्निवृत्त्यर्थः पाठः ॥ कमण्डलुकमित्यन्ये ॥ * ॥ पात्तिगणकम् ॥ * ॥ राद्यगणकम् ॥ * ॥ हार्दम् ॥ पौरुषम् ॥ समासे तु सहृदयता । सहृदयत्वम् । सत्पुरुषता । सत्पुरुषत्वम् ॥ ४०६ ॥

परिव्राजकसुभ्रातृसुभगोन्नातृहायनाः[7] ।
यजमानोऽथ भर्ता च दुर्भ्रातृविपुलौ दुहृत्[8] ॥ ४०७ ॥

पारिव्राजकम् । अयं शकटाङ्गजमतेन[9] ॥ * ॥ सौभ्रात्रम् । यथा ।

समानेऽपि हि सौभ्रात्रे यथा तौ रामलक्ष्मणौ[10] ॥ * ॥

सुभगस्य भावः कर्म वा । सौभागम् । हृङ्गसिन्धोः पूर्वस्य चेत्युभयपदारैच् ॥ अयं चन्द्रमतेन । जयादित्यस्तु सुभग मन्त्र[11] इति पठति । यथा । महते सौभगाय[12] । सर्वे विधयश्छन्दसि विकल्प्यन्त इत्युभय-

---

१ भाषत्वानित्य° A.

२ चंद्रस्य सौ° D.; चंद्रस्तु सौहृदयस्याणि B. C. K.

३ °जभावनामाह A.; °पदारैजमाह B. C. K.

४ °सामर्थ्यादेवानर्थक्ये B. C. F. K.; श्रीभोजस्तु° D.

५ °पदारैच् भवति A.

६ लघ्वादी इत्यनेन B. C. F. K.

७ °सुभ्रातृश्रमणोन्नात्रहायनाः E.

८ दुर्हृत् B. C. D. E. F. K.

९ शकटांगजादिमतेन A.

१० Raghuv. 10, 82.

११ ? Kâś. V. v. 1, 130; cf. preceding page, note 5.

१२ Ṛigv. i. 164, 27.

चारैज् न भवति। मन्त्र इति किम्। सौभाग्यं ब्राह्मणादित्वात् ष्यञ्येव भवति। वामनस्यापि संमतमेतत् ॥ * ॥ उद्गातो गायत ऋत्विग्वा। उद्गाता। औद्गात्रम् ॥ * ॥ हायनस्य[1]। हायनम्। अयं वामनमतेन ॥ * ॥ याजमानम् ॥ * ॥ भर्तुः। भार्त्रम् ॥ * ॥ निन्दितो भ्राता दुर्भ्राता। तस्येदं दौर्भ्रात्रम् ॥ * ॥ वैपुलम्[1]। अयं वामनमतेन ॥ * ॥ दुहृदुदाहृत एव ॥ ४०७ ॥

प्रतिहर्ता तथा पोता यलोपः श्रोत्रियस्य च।
वृषपूर्वं गणं प्राह वामनस्तु तपस्विनि ॥ ४०८ ॥

प्रतिहर्ता ऋत्विक्। प्रातिहर्त्रम्। ये तु लघ्वादीक इत्यत्र लघ्वादेरिगन्तस्य[2] विशेषणं मन्यन्ते तेषां मते तेनैव सिद्धं प्रातिहर्त्रम् ॥ परत्वात् त्रतल्भ्यां बाधत इत्यखिधानम् ॥ * ॥ उद्गाढ। उन्नेढ। होढ। पोढ। प्रशास्तृ। अध्वर्यु। इत्येतेषां यदा ऋत्विग्वचनत्वं तदा होत्राभ्यश्छ इति[3] छे प्राप्ते पाठः ॥ ४०८ ॥ इति युवादिः[4] ॥

मनोज्ञमेधाव्यभिरूपवृद्धाः
कल्याणचोरप्रियरूपधूर्ताः
आढ्यस्तथा श्रोत्रियसारपत्राप्
छात्रो युवच्छान्दसविश्वदेवाः[5] ॥ ४०९ ॥

---

१ Not given in the other works.—For हायनान्त cf. Pâṇ. v. 1, 130; and above, p. 429, l. 3.

२ लघ्वादिरिगंतस्य B. C. D. K.; लघ्वादिरितिगंतस्य A.; cf. p. 429, l. 3; Pâṇ. v. 1, 131.

३ Pâṇ. v. 1, 135.—वृषगण is not given by any of the other works.—For श्रोत्रिय (श्रौत्रम्) see P. v. 1, 130 vârtt.

४ This *gaṇa* includes उद्गात्रादि & युवादि to Pâṇ. v. 1, 129, 130.—Hem. only युवादि.

५ युवा छ० B. C. D. E. K.; सारपुत्रा० वैश्वदेवाः F.

मनोज्ञादिगुरूपोत्तमयोपान्तादकञ् इत्यनेन मनोज्ञादेस्तस्य भावः कर्म वेत्यर्थेऽकञ् वा भवति ॥ * ॥ मनो जानाति परितोषयतीति मनोज्ञं वस्तु । तस्य भावः कर्म वा । मानोज्ञकम् ॥ * ॥ मैधावकम् ॥ * ॥ शोभनं रूपमस्य रूपमभिगत[1] इति वा । अभिरूपः । तस्य । आभिरूपकम् ॥ * ॥ वार्द्धकम् । यथा ।

वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्[2] ॥

अन्ये तु वयोऽर्थलक्षणेऽणि स्वार्थिकेऽके च वार्द्धकमित्याहुः[3] ॥ * ॥ काह्माणकम् ॥ * ॥ चौरिका । स्वभावात्स्त्रीत्वम् । अन्यस्तु चौरकं धौर्तकमिति[4] नपुंसकलिङ्गे ददर्श ॥ * ॥ प्रियं रूपं यस्य तस्य प्रैयरूपकम् ॥ * ॥ धौर्तिका ॥ * ॥ आ पूर्णं ध्यायतीत्याह्यः । आह्यकम् ॥ * ॥ श्रौत्रियकम् ॥ * ॥ साराणि पत्राणस्य । सारपत्रः । सारपत्रिका[5] । सारपत्रकम् इत्यन्यः[6] ॥ सरप्रयुक्तं पत्रं वाहनं सरपत्रम्[7] इत्यन्यः ॥ सारपुत्र[8] इति भोजः ॥ * ॥ क्षत्रशीलश्छात्रः । छात्रकम् ॥ * ॥ यौवनिका । अके राजन्यमनुष्ययूनामित्यनेनान्याजादिलुगभावः[9] । यथा ममैव ।

---

१ रूपमभिगच्छत A.; रूपमपि गत D.

२ Raghuv. i. 8.

३ Bö. and Kâṣ. V. omit वृद्ध; cf. Pâṇ. iv. 2, 39 vârtt.

४ धौर्त्तमिति B. C.—Yajñ. also has धौर्तिका । चौरिका । धौर्तकं चौरकमिति केचित्. — For Hem. see page 436, n. 3.

५ सारपत्रं सा° B. C. K.; °सारपत्रका A.

६ सारपत्रिकम्° B. C. K.; सारपत्रम्° F.—Yajñ. has the same passage from साराणि°.

७ शरपत्रम् A.

८ ? Thus F.; सरपुत्र D.; सरपत्र A. B. C. K.—Bö., Yajñ. have सारपत्र and शतपुत्र; Kâṣ. V. शतपुत्र; Hem. शरपत्र, शारपत्र and सारपुत्र.

९ °लुग्भावः B. C. K.; लुग्भवति F.; see vârtt. on Pâṇ. vi. 4, 163 (Böhtl., *ib.* 151).

नवे यौवनिकोद्भेदे यस्य न स्खलितं मनः।
दृंहितं नापि सिद्धेशप्रसादेन मनीषिणः[1] ॥

यथा वा धनंजयस्य।

क्षणभङ्गुरमङ्गमङ्गिनां[2]
न गता यौवनिका निवर्तते।
विभवास्तृणवारिचञ्चला
निचया मर्मरपत्रसंनिभाः ॥

छान्दसकम् ॥ * ॥ वैश्वदेवकम्[3] ॥ ४०९ ॥

बहुलामुष्यकुलादीरूपावश्यंकुपुत्रकुलपुत्राः।
पुत्रकुमारकुलाला ग्रामात्सरडश्च सुकुमारः ॥ ४१० ॥

बाङ्गलकम्। दृढादिपाठाद् बंहिमा। बाङ्ग्यमित्यपि[4] ॥ * ॥ आमुष्यकुलिका। आमुष्यकुलकमित्यन्ये ॥ अमुष्यपुत्र इत्यपि ॥ * ॥ अदो रूपम्। अदो रूपमस्येति वा। अदोरूपम्। तस्य। आदोरूपकम्। अदोरूपशब्दो रूपप्रशंसायाम्[5] ॥ * ॥ आवश्यकम् ॥ * ॥ कौपुत्रकम्[6]। अयं वामनमतेन ॥ * ॥ कौलपुत्रकम् ॥ * ॥ ग्रामपुत्रिका ॥ * ॥ ग्रामकुमारिका ॥ * ॥ ग्रामकुलालिका। ग्रामकुलमित्यप्यन्यः[7]

---

१ वृहितेनापि° A.

२ क्षणभं गुरुमंगम° A.; क्षणभंगुसमंग° D.

३ विश्वदेव Bö., Yajñ., Hem., K. V. β.; वैश्वदेव Kâṣ. V. ed., a.

४ बङ्गल is not given in the *gaṇa* दृढादि śl. 393-4 (except by Kâṣ. V. β.; v.l. ed.) but in पृष्ठादि śl. 392; see also page 518, note 3.

५ Thus also Yajñ.; Hem. has the same word; om. Bö., Kâṣ. V.—[अहोपुरुष Yajñ., K.V. β.; v.l. Bö., K.V. ed.]

६ कुपुत्र Bö., Yajñ.; omitted by Kâṣ. V., Hem.

७ ग्रामकूलमि° F.; ग्रामकुलमि° D.; °इत्यन्यः A. F.—Hem. has both words; Bö., Yajñ. ग्रामकुलाल only; Kâṣ. V. ed., a. β. give neither.

॥ * ॥ षण्डो वृषः । ग्रामस्य षण्डो ग्रामषण्डः । तस्य ग्रामषण्डिका ॥ पूरुषादिवद्दीर्घत्वे ग्रामषाण्ड इत्यन्ये[1] ॥ ग्रामषण्ड[2] इति जयादित्यादयः ॥ एते चत्वारो नपुंसकलिङ्गा इत्यन्ये[3] ॥ * ॥ सुष्ठु कुमारः सुकुमारः । सौकुमारकम् ॥ ४१० ॥ इति मनोज्ञादिः ॥

इष्टार्चितौ निपठितागणितावकीर्ण-
पूर्तोपसादितगृहीतनिराकृताश्च ।
संरक्षितानुपठितोपकृतानुयुक्ता-
म्नातश्रुतानुगणितास्त्ववकल्पितं च ॥ ४११ ॥

इष्टादिभ्योऽनेनेत्यनेनेष्टादेः प्रथमान्तादनेनेति द्वितीयार्थे ठन् भवति ॥ * ॥ इष्टोऽनेन यज्ञः । इष्टी यज्ञे ॥ इष्टमनेन वा । इष्टी यज्ञे ॥ * ॥ अर्चिती सिद्धराजे ॥ * ॥ निपठिती मीमांसायाम् ॥ * ॥ अगणिती मदने ॥ * ॥ अवकीर्णी दुर्नये ॥ * ॥ पूर्ती दाने ॥ * ॥ उपसादिती सदसि ॥ उपासितमित्यन्ये । उपासिती गुरुकुले[4] ॥ * ॥ गृहीती विद्यासु ॥ * ॥ निराकृती कुकाव्ये ॥ * ॥ संरक्षिती प्रजासु ॥ * ॥ अनुपठिती वेदे ॥ * ॥ उपकृती मन्त्रे ॥ * ॥ अनुयुक्ती शास्त्रे ॥ * ॥ आम्नाती

---

१ पुरुषादिवदीर्घत्वे (om. rest) A.; पुरुषादिव दीर्घत्वे ग्रामसाड° D.; पूरुषादिव दी° B. C. F. K.

२ ग्रामखंड B. C. K.—ग्रामसंड and ग्रामसांड Hem.; ग्रामषण्ड Bö., Yajñ., Kâś. V. *a.*; ग्रामखण्ड Kâś. V. ed.

३ According to Hem., who calls this *gaṇa* चोरादि, the words from मनोज्ञ to the end of his *gaṇa* form neuter abstract nouns in अकञ् only [मानोज्ञकम्], whereas those preceding मनोज्ञ make both neuter and feminine nouns [चौरिका । चौरकम् ॥ धौर्तिका । धौर्तकम् ।]. Cf. मनोज्ञादि in list of *gaṇas*.

४ उपसिनी° C.; कुरुकुले A.; युरुकुलो D.—Hem. has both words; Yajñ., Kâś. V. ed., *β.* उपसादित; Bö., Kâś. V. *a.* उपासादित.

छन्दसि ॥ * ॥ श्रुती । इतिहासे ॥ * ॥ अनुगणिती निरुक्ते ॥ * ॥ अवकल्पिती जल्पे ॥ ४११ ॥

आसेवितपरिरक्षितनिकथितगणितोद्गृहीतपरिकलिताः ।
उपपादितपरिगदितौ[1] संकलिताधीतपरिगणिताः ॥ ४१२ ॥

आसेविती सिद्धुपतौ[2] ॥ * ॥ परिरक्षिती परिजने[3] ॥ * ॥ निकथिती कथासु । निकठित इत्यन्यः[4] ॥ * ॥ गणिती ज्योतिषि ॥ * ॥ उद्गृहीती । उद्योगे ॥ * ॥ परिकलिती कलासु ॥ * ॥ उपपादिती धने[5] ॥ * ॥ परिगदिती परेषु ॥ * ॥ संकलिती पदार्थेषु ॥ * ॥ अधीती व्याकरणे ॥ * ॥ परिगणिती याज्ञिके ॥ ४१२ ॥

अवगणितव्याकुलितौ निषादितोपाकृतावमुक्ताश्च ।
अवधारितपठितकृता निगदितमनुगुणितमायुक्तम्[6] ॥ ४१३ ॥

अवगणिती वादिनि ॥ * ॥ व्याकुलिती रिपुजने ॥ * ॥ निषादिती हास्तिके[7] ॥ * ॥ उपाकृती पशौ ॥ * ॥ अवमुक्ती पापे ॥ * ॥ अवधारिती शास्त्रार्थे ॥ * ॥ पठिती वेदे ॥ * ॥ कृती धर्मे ॥ * ॥ निगदिती नयेषु ॥ * ॥ अनुगुणिती[8] । अनुपदे ॥ * ॥ आयुक्ती युद्धे ॥ * ॥ मत्वर्थीयेनेनासिद्धे ठन्निवृत्त्यर्थमिन्विधानम्[9] ॥ ४१३ ॥ दृष्टादिः ॥

---

१ उपवादित° A.

२ सिद्धिमती D.

३ वारिजने B. C. K.; (आर्त्ते Yajñ.)

४ Hem. both and कथित besides, the others निकथित.

५ उपमादिती वने A.; °ध्वने D.—Hem. alone has this word.

६ °अनुगणितमायुक्तं A. D. E. (cf. śloka 411, and note ८.)

७ निषादित Bö., Hem.; om. Kâś. V.; निवादित [निवादिती वाद्येषु] Yajñ.;—Bö., Yajñ., Kâś. V. have also परिवादित [परिवादिती दुष्टेषु Y.].

८ अनुगणिती A.D.—Hem. has both अनुगणित and अनुगुणित; Bö., Yâjñ., Kâś. V. *a.* अनुगणित; Kâś. V. ed., *β.* अनुगुणित only.

९ ठिन्निर्वृत्त्य° B. K.; ठेनिवृ° A.; तन्निवृ° C.; अन्यनिवृ° D.

यवोर्मिवासाकृमिभूमिबन्धवः[१]
क्रुञ्चाककुत्कान्तिहरीन्दुबिन्दवः ।
हनुस्तिमीक्षू मधुसानुभानवो[२]
द्राक्षाहरिच्छिम्बिगरुट्टुचारवः[३] ॥ ४१४ ॥

झय्मान्मोपान्तान्मो[४] वोऽयवादेरित्यनेन झयन्तान्मकारान्ता-दवर्णान्तान्मोपान्तादवर्णोपान्ताच्च[५] यवादिवर्जितान्मतोर्मकारस्य व-कारो भवति ॥ * ॥ यवा अस्याञ्च वा सन्ति । यवमान् ॥ * ॥ ऊर्मिमान् ॥ * ॥ वासामान् । वासाशब्दः[६] स्त्रीलिङ्गः ॥ * ॥ कृमिमान् ॥ * ॥ भूमिमान् ॥ * ॥ बन्धुमती । बन्धुमान् ॥ * ॥ क्रुञ्चामान्[७] ॥ * ॥ ककु-द्मान् । ककुद्मानेष हेषते ॥ * ॥ कान्तिमान् ॥ * ॥ हरिमान् ॥ * ॥ इन्दुमती ॥ * ॥ बिन्दुमती ॥ * ॥ हनुमान्[८] ॥ * ॥ तिमिमान्[९] ॥ * ॥ द्रुचुमती ॥ * ॥ मधुमान्पर्वतः ॥ * ॥ सानुमान् ॥ * ॥ भानुमान् ॥ * ॥ द्राचामान् ॥ ध्राचेत्यपि[१०] भोजः ॥ * ॥ हरिन्मान् ॥ * ॥ शिम्बिमान्[११] ॥ शिम्बीमानित्यन्यः[१२] ॥ * ॥ गरुत्मान् । गरुडः ॥ * ॥ द्रुमती । श्रुमती-

---

१ °क्रिमि° D. E. (D. also in comm.)

२ हनुस्तीमीचू° E.; हनुस्तिमा इचु-मधुसाधुमानवो C.; मधुनान° B. E.

३ °हारिः° D.; शिविगरुद्रु° A. D.; हरिंनशृंबि° C.; हरित्शृंबि° F.; सिंजि-गरुद्रु° E.; चारकः B.

४ ऋष्मामोपांतान्मो B. C. F. K.; ऋष्मामोपां° A.; ऋष्यामो° D.

५ चयंतान्म° B. C. F. K.; ऋयंता° A.; ऋंयतार्हमका° D.

६ Thus also Hem.; वशा others [वशामान् बन्ध्यापतिः Yajñ.].

७ कुंचामान् कुंवामान् । A.

८ हनूमान् B. C. D. K.

९ तिमि Hem.; स्तिमि Yajñ.; om. others.

१० ध्वाचेत्यपि B.; धाचेत्यपि श्री-भोजः D.; द्राचामान्। द्राचाधाचे° A. —द्राचा and ध्राचा Bö., Yajñ., Hem.; द्राचा K. V.

११ ? शिंविमान् A.; शृंबिमान् B. C. F. K.; सिंधिमान् D.

१२ ? शिंवीमानि° A.; शृंबीमानि° F. K.; शृंबीमानि° B.; शृबीमा° C.; सिं-धीमा° D.—शिंवी Hem.; सञ्जि and सिजि Bö., Yajñ.; सञ्जि (*v.l.* शृञ्जि) Kâś. V. ed.; सिजि K. V. *a.*

त्यपि भोजः[1] ॥ * ॥ चारुमती ॥ * ॥ केषांचिदवर्णान्तात्प्राप्तः । केषांचिद्योपान्तादिति[2]। केषांचिज्ज्ञय[3] इति । केषांचित्संज्ञायामिति ॥ * ॥ आकृतिगणश्चायम् । तेन दक्षिमद्भ्रंशुमती श्रीमती[4] गोमती ध्वजित्मत्प्रभृतयो[5] ज्ञेयाः ॥ ४१४ ॥ इति यवादिः ॥

वत्वन्तमुदन्नष्ठीचक्रीकक्षीरुमण्विवो ज्ञेयम् ।
राजन्वान्सौराज्ये ज्योत्स्ना चर्मण्वती नाम्नि ॥ ४१५ ॥

उदन्वदादिरित्यनेनोदन्वदादयः शब्दा निपात्यन्ते संज्ञायाम् ॥ * ॥ उदकमस्मिन्नस्तीति । उदन्वान् उदधिः । उदन्वान्नाम ऋषिः । उदन्वान्नामाश्रमः ॥ अन्यस्तु धारणक्रियासंबन्धाद्[6] उदन्वान्घट[7] उदन्वान्मेघ इत्यपि मन्यते[8] ॥ * ॥ अष्ठीवान्नाम जङ्घोरुसंधिः । अत्रास्थिशब्दस्याष्ठीभावो निपात्यते ॥ * ॥ चक्रीवान् रासभः । चक्रीवान्नाम राजा । अत्र चक्रशब्दस्य चक्रीभावः ॥ * ॥ कचीवान्नाम ऋषिर्लौकिकः । अत्र कक्षाशब्दस्य कक्षीभावः ॥ * ॥ रुमण्वान्नाम पर्वतः । रुमण्वान्नाम मन्त्री । अत्र लवणशब्दस्य रुमण्भावः ॥ रुमन्निति प्रकृत्यन्तरमस्तीत्येके ।

---

१ ?अमतीत्वपि° B.; श्रुतिमती° श्री° भोजः D.—द्रु Bö., Yajñ., Hem.; द्रुम Kâś. V. ed., *a.*; cf. śl. 252 comm.; Pâṇ. v. 3, 118.

२ केषांचितमोऽपान्तादिति A.; om. D.

३ केषांचित् भय A.; °क्रय K.; °च्चय F.; om. D.

४ स्त्रीमती for श्रीमती B. K.; स्त्रिमती C. (cf. śl. 252 comm., and 418).—Not given by the other works.

५ ?Thus B. C. F.; ध्वजिन्मत्° K.; ध्वर्जत्मत्° A.; D. om. from आकृतिगण° to end.—ध्वजित् Hem.; ध्वजि and ध्रजि Bö., Yajñ., Kâś. V.

६ D. om. from उदन्वान्नाम ऋषिः.

७ उदकवान् घटः D.; उदकन्वान् घटः B.; उदनन्वान्घट A.—Hem. has °उदन्वान्घटः । उदन्वान्मेघः । यस्मिन्नुदकं धीयते स एवमुच्यते ॥ नाम्नि । उदन्वान्समुद्रः ।°. Cf. Kâś. V. viii. 1, 13.

८ °इत्यपन्यः D.

तस्य वा णत्वम्[1] ॥ * ॥ विश्विष्टा वसवः किरणा यस्य । विवस्वान् आदित्यः ॥ * ॥ राजन्वान् देशः ।

राजन्वतीमाङ्गरनेन भूमिम्[2] ॥

सौराज्य इति किम् । राजवान् ॥ * ॥ ज्योतिरस्यास्तीति ज्योत्स्ना[3] । चन्द्रप्रभा ॥ * ॥ चर्मण्वती नाम नदी ॥ * ॥ नास्तीति किम् । उदकवान् । अस्थिमान् । चक्रवान् । कक्षावान् । लवणवान् । वसुमान् । ज्योतिष्मान् । चर्मवान् ॥ ४१५ ॥ इत्युदन्वदादिः[4] ॥

ज्यात्स्नाशब्दस्तमिस्रा[5] च कुतुपः स्याद्विपादिका ।
विसर्पो नखरश्चापि कुण्डलोऽपि मतो बुधैः ॥ ४१६ ॥

प्रज्ञाज्योत्स्नापिच्छसिध्मलोमपामादेर्णाणिललघ्ना[6] इत्यनेनेतेभ्यस्तदस्याच वास्तीत्येतस्मिन्नर्थे ण अण् दल ल घ्न[7] इत्येते प्रत्ययाः क्रमेण भवन्ति मतुश्च ॥ * ॥ ज्योत्स्नाऽस्मिन्नस्तीति ज्यौत्स्नः पचः । ज्यौत्स्नी रात्रिः ॥ * ॥ तमोऽस्यामस्तीति तमिस्रा रात्रिः । साऽस्यास्तीति तामिस्रः[8] पचः ॥ * ॥ कौतुपं[9] गृहम् ॥ * ॥ वैपादिकं कुष्ठम्[10]

---

१ See p. 339, l. 13 (? read रुमण् लवण° instead of रुमाँल्लावण°); p. 340, note 1.—Hem. also has लवणस्य रुमण्भावः । रुमण्वान्नाम पर्वतः । अन्ये त्वाङुः । रुमन्निति प्रकृत्यन्तरमस्ति तस्यैव तन्निपातनं नकारलोपाभावार्थं च । वत्वं तु यथायोगमस्त्येव ॥.

२ Raghuv. 6, 22.

३ See Pâṇ. v. 2, 114.

४ For this *gaṇa* cf. Pâṇ. viii. 2, 12-14; Hem. ii. 1, 92-95.

५ °तमिश्रा A. B. D. K.

६ °पामणादेर्णाणि° A.; °पामादेर्नाणिलघ्ना B. C. K.

७ B. C. F. K. om. ण; cf. p. 209, l. 15; Pâṇ. v. 2, 101.

८ तमिश्रा° तामिश्रः B. C. K.; तमिश्रः A.—Hem. also writes तामिश्र.

९ कुतप ed. Pâṇ.; कौतप Kâś. V.; कौतुप Hem.; cf. कुतप śl. 66.

१० कुष्टं B. C. F. K. (Hem.); कुप्चं A.; कुच्छा D.

॥ * ॥ वैसर्पो व्याधिः ॥ * ॥ नाखरः श्वापदः ॥ * ॥ कौण्डलः ॥ * ॥ पक्षे ज्योत्स्नावान् । तमिस्रावान्[1] ॥ ४१६ ॥ इति ज्योत्स्नादिः ॥

पिच्छोदव्रीहिगुहाः पिचण्डस्
तुन्दोदकोरोयवचूर्णपक्षाः ।
वर्णग्रहौ पङ्ककले च काक-
प्रज्ञे[2] तु फेनो ध्रुवका[3] च पर्णम् ॥ ४१७ ॥

पिच्छादेरिलः ॥ * ॥ पिच्छान्यस्य[4] सन्ति । पिच्छिलः ॥ * ॥ उदरिलः ॥ * ॥ व्रीहिलः । दिगम्बरस्तु व्रीहिग्रहणं स्वरूपार्थमर्थनिर्देशार्थं चेति[5] ब्रुवाणः शालिलो व्रीहिल इत्याह ॥ * ॥ गुहिलः ॥ * ॥ पिचण्डिलः ॥ * ॥ तुन्दिलः ॥ * ॥ उदकिलः ॥ * ॥ उरसिलः ॥ * ॥ यविलः चूर्णिलः ॥ * ॥ पक्षिलः ॥ * ॥ वर्णिलः ॥ * ॥ ग्रहिलः ॥ * ॥ पङ्किलः ॥ * ॥ कलिलः ॥ * ॥ काकिलः[6] ॥ * ॥ प्रज्ञिलः ॥ * ॥ फेनिलः ॥ * ॥ ध्रुव-

---

१ तमिश्रावान् A. B. C. K.

२ ? Thus A. D. E.; कालप्रज्ञे B. C. F. K.

३ ध्रुवका B. C. F. K.; विवकां A.

४ Thus all MSS. and Yajñ.—पिच्छा Bö.; पिच्छ Kâṣ. V., Hem.

५ व्रीहिग्रहणस्वरूपा° B. C. K.; व्रीहिग्रहणं स्वरूपं चेति A.—Cf. Kâṣ. V. v. 2, 116 (व्रीह्यादिभ्यश्च ॥) °व्रीहिग्रहणं किमर्थम् । यावता तुन्दादिषु व्रीहिशब्दः पठ्यते तत्र इनिठनौ चकारेण विधीयेते । एवं तर्हि तुन्दादिषु व्रीहिग्रहणमर्थग्रहणं विज्ञायते । शालयोऽस्य सन्ति । शालिलः (ed. शालिनः) । शाली । शालिकः । शालिमानिति ॥.—Hem. has the sûtras vii. 2, 5: व्रीह्यादिभ्यस्तौ (viz. इकइनौ) ॥; 9: व्रीह्यर्थतुन्दादेरिलश्च ॥° व्रीह्यर्थे। कलमा अस्य अस्मिन्वा सन्ति । कलमिलः । कलमिकः । कलमी । कलमवान् । शालिलः । शालिकः । शाली । शालिमान् । व्रीहिशब्दोऽपि व्रीह्यर्थो भवति । किं तु तस्य पूर्वचोपादानादिलो न भवति । भावे हि तत्रोपादानमनर्थकं स्यात् । भवतीत्येके । व्रीहिलः ॥ तुन्दादिः° see next page, note 3.

६ ? कालिलः B. C. F. K.—Hem. has काला (l) काकाः; Bö., Yajñ. काला (चेपे); Kâṣ. V. काल (चेपे).—See also comm. on śl. 420, where Vardh. refers काला, घाटा (घटा Bö., Yajñ., K. V.) and जटा to this *gaṇa*.

किलः । ध्रुवकेत्यपि[1] वामनः ॥ * ॥ पर्णिलः ॥ * ॥ पचे पिच्छवानित्या-द्यपि[2] भवति ॥ तुन्दोदरपिचण्डप्रभृतीनां तुन्दादावपि पाठाट्टेनौ[3] भवतः । भोजमतेन लविषयेऽपि बीजप्रभृतीनां केषांचित् ॥ ४१७ ॥ इति पिच्छादिः ॥

सिध्मस्नेहौ पांसुपृथुश्यामचटूनि[4]
प्रज्ञाग्रन्थी बीजकपी पिङ्गमृदू च ।
कर्णः शीतं मांसहनू मञ्जुगडू स्तः
पत्रं नाभिः श्रीमणिकण्डूदककृष्णाः ॥ ४१८ ॥

सिध्मादेर्लः ॥ * ॥ सिध्मान्यस्य सन्ति ॥ * ॥ सिध्मलः ॥ * ॥ स्नेहलः ॥ * ॥ पांसुलः[5] ॥ पृथुलः ॥ * ॥ श्यामलः ॥ * ॥ चटुलः[6] ॥ * ॥ प्रज्ञालः । पिच्छादिपाठात् प्रज्ञिलः ॥ * ॥ ग्रन्थिलः । यथा मुरारेः[7] ।

द्वयमेभिरालवालैः पदे पदे ग्रन्थिलासु कुल्यासु ॥ * ॥

बीजलः ॥ * ॥ कपिलः ॥ * ॥ पिङ्गलः ॥ * ॥ मृदुलः ॥ * ॥ कर्णलः ॥ * ॥ शीतलः ॥ * ॥ मांसलः ॥ * ॥ हनुलः । हनूल इत्यपि ॥ * ॥ मञ्जुलः ॥ * ॥ पृष्ठग्रन्थिर्गडुः । गडुलः । कुब्जः ॥ * ॥ पत्रलः ॥ * ॥ नाभिलः ॥ * ॥ श्रीलः । श्रीमान् ॥ * ॥ मणिलः ॥ * ॥ कण्डूलः ॥ * ॥ उदकलः । पिच्छादिपाठाद् उदकिलः ॥ * ॥ कृष्णलः ॥ ४१८ ॥

---

१ ध्रुवकिलः । द्रुवकेत्यपि B. C. F. K. —ध्रुवक and ध्रुवक Bö., Yajñ.; ध्रुबका and ध्रुवका Hem.; ध्रुवका and द्रुवका Kâś. V. ed., β. (α. ध्रुवका only).

२ पिच्छावानित्य° B. C. F. K. and orig. A.; पिच्छवान् Hem.

३ पाठखेलौ A.; पाठाच्छेनौ B. C. F. K.; पाठष्वेनौ° श्रीभोज° D.—Vardh.'s पिच्छादि includes both पिच्छादि and तुन्दादि of Pâṇ. and Hem.

४ पांशु° A. B. C. D. E. K.

५ पांशुलः A. B. C. D. K.

६ चदुलः B. K.; बऊलः C.

७ Anarghar. (Calc. S. 1782) p. 36.

सक्थि श्लेष्मा पित्तनिष्पाद्यमन्यः
पेशः पार्ष्णी वातनिष्पावपुष्काः।
पार्श्वस्तुण्डिः पक्ष्मपर्शू कुशः स्याद्
धारासक्तू वर्ध्मफेनोष्मपर्णम्[1] ॥ ४१९ ॥

सक्थिलः ॥ * ॥ श्लेष्मलः। कफी ॥ * ॥ पित्तलः ॥ * ॥ निष्पादय-तीति निष्पात् क्विप्। निष्पाल्[2] ॥ निष्पदनं निष्पत्। निष्पल्ल[3] इत्यन्ये ॥ निष्पादान् ॥ अयं शकटाङ्गजमतेन ॥ * ॥ धमनीलः ॥ * ॥ पेशलः ॥ * ॥ पार्ष्णीलः ॥ धमनीपार्ष्णीशब्दौ दीर्घान्तावेव गणे पठ्येते। तेन दीर्घान्ताभ्यामेव लः। ह्रस्वान्ताभ्यामेव मतुः ॥ * ॥ वातलः ॥ * ॥ निष्पावलः ॥ निष्पानं निष्पा। निष्पाल[4] इत्यन्यः ॥ * ॥ पुष्कलः ॥ * ॥ पार्श्वलः ॥ * ॥ तुण्डिलः ॥ तुण्डिवटिवलेर्भ[5] इति भप्रत्यये तुण्डिभ इत्यपि ॥ * ॥ पक्ष्मलः ॥ * ॥ पर्शुलः। पर्शूल इति भोजराजः[6] ॥ * ॥ कुशलः ॥ * ॥ धारालः। यथा मुरारेः[7]।

प्रेक्षाधारालवैरप्रस्मरसमरोड्डामरौजा बिडौजाः ॥

सक्तुलः ॥ * ॥ वृधेर्मन्। वर्ध्मलः। पामादिपाठाद् वर्धन[8] इत्यपि ॥ * ॥

---

१ वर्म्मफेनो° A.; व्रध्मफे° B. K.; व्रध्नफेनो° F.; °व्रध्राफे° C.; °फेनौ व पर्ण D.; वर्धकेनौ चपवर्णं E.

२ निष्पालः A. C. D.

३ निष्पलः A. C.; B. C. K. om. निष्पत्.—Hem. has both; Bö., Yajñ. निष्पाद्; om. Kâṣ. V.

४ निष्पाणं° MSS.; B. F. K. om. निष्पा; C. om. निष्पाल.— Hem. निष्पा; the others निष्पाव.

५ ? तुंटिवटि° B. C. K.; तुडि° D.—तुंडि Hem. both in the gaṇa, and in sûtra vii. 2, 16 वलिवटितुंडेर्भः। (प्रवृद्धा नाभिस्तुंडिः comm.); om. by the others, but Pâṇ. and Kâṣ. V. v. 2, 139 तुन्दि (तुण्डि इति माधवः Calc. ed.).

६ A. om. पर्शुलः; श्रीभोजराजः D.; भोजः F.—पर्शू Bö.; पर्शु Yajñ., Hem.; परशु Kâṣ. V.

७ Anarghar. (Calc., Ṣ. 1782) p. 143.

८ धर्म्मन A.; वर्द्धान F.; वर्ध्मलः पामादिपाठात्। धर्मन् इत्यपि B. C. K. —Bö., Yajñ. have वर्ष्मन्, om. K. V.—In the पामादि Hem. alone gives वर्धन्.

फेनलः । यथा ।

वैदेहि पश्य मलयादिभवं मत्सेतुना फेनिलमम्बुराशिम्[१] ॥ * ॥

ऊष्मलः । यथा ।

धनुष्मन्तौ वत्सौ दशमुखभुजैरूष्मलतमाः[२] ॥ * ॥

पर्णलः । पर्णिल[३] इत्यपि । यथा भट्टेः ।

अभ्यर्णेऽभ्रःपतनसमये पर्णलीभूतसानुं
किष्किन्धाद्रिं न्यविशत मधुश्रीवगुञ्जद्विरेफम्[४] ॥ ४१९ ॥

क्षुद्रजन्तूपतापाभ्यां प्राण्यङ्गादात एव च[५] ।
कालाघाटाजटाः क्षेपे वातादेरूऽपि स्मृतः ॥ ४२० ॥

क्षुद्रजन्तुर् आ नकुलात्[६] । यूकालः । मक्षिकालः ॥ * ॥ उपतापो रोगः । मूर्कालः । विचर्चिकालः । विषादिकालः ॥ * ॥ प्राण्यङ्गादाकारान्तादित्यर्थः । चूडालः । जङ्घालः ॥ * ॥ कालादयः क्षेपे प्रत्ययार्थस्य निन्दायां गम्यमानायां लभाजः । काला कूर्चम् । कालालः[७] ॥ घाटा[८] ग्रीवावयवः । घाटालः ॥ जटालः ॥ पिच्छादिपाठात्[९] कालिलः । घाटिलः । जटिलः । यथा ।

---

१ Raghuv. 13, 2; D. omits from यथा; A. B. C. K. omit the first pâda.

२ Anarghyar. iv. last śl. (ed. Calc. S. 1782, p. 117) D. om. from ऊष्मलः ।.

३ फेनलः । पर्णलः । फेनिलः । पर्णिलः D.; om. F.

४ Bhaṭṭik. vi. 143 (किष्किन्धाद्रि° ed.).—अभ्यर्णेभ्यः पतन° B. C. D. F. K.; A. om. from पर्णलः.

५ प्राखंगा स्यादकारतः E.; प्रा । प्रगात स्यादाकारतः D.; A. om. this half-śloka and काला.

६ आनुकुलात् A.; आनकुलात् वा D.; ॥ आ नकुलात्क्षुद्रजंतवः । F.

७ Hem., on vii. 2, 23 कालाजटाघाटाभ्यः. remarks कालेति डोपान्त्यं केचित्पठन्ति । काडालः । काडिलः ।.

८ Thus also Hem.; घटा Bö., K. V. [घटा सभा संलापो वा घटालः । घाटा ग्रीवा घाटाल इति वर्धमानः Yajñ. comm.].—Bö., Yajñ. have also कटा क्षेपे [कटालो गर्हितगण्डस्थलो गजः Yajñ. comm.].

९ See p. 441, note 6.

विवेश्म कश्चिज्जटिलस्तपोवनम्[1] ॥

कालाग्रब्दस्य लप्रत्ययं चन्द्राद्या न मन्यन्ते ॥ क्षेप इति किम् । कालावान् । घाटावान् । जटावान् । क्षेपोऽत्र मतुना न गम्यत इति क्षेपे मतुर्न भवति ॥ * ॥ वातादेरूडपि स्यात इति वातदन्तबललला-टानां लो भवति तत्संनियोगेनोडागमश्च । वाटूलः । दन्तूलः । बलूलः । ललाटूलः ॥ गलग्रब्दस्यापि गलूल इति मन्यते भोजः ॥ * ॥

पक्षे सिध्मवानित्यादि ॥ आकृतिगणोऽयम् । तेन वर्णभ्रष्टतयो द्रष्टव्याः ॥ ४२० ॥ इति सिध्मादिः ॥

लोम वस्तु मुनिः[2] कर्को गिरिबभ्रू हरिः कपिः ।
लोमादौ विबुधैर्ज्ञेया रुरू रोम तथा भुरुः[3] ॥ ४२१ ॥

लोमादेः ग्रः[4] ॥ * ॥ लोमान्यस्य सन्ति । लोमग्रः ॥ * ॥ वस्तुग्रः[5] ॥ * ॥ मुनिग्रः ॥ * ॥ कर्कग्रः ॥ * ॥ गिरिग्रः ॥ * ॥ बभ्रुग्रः[6] ॥ * ॥ हरिग्रः ॥ * ॥ कपिग्रः ॥ * ॥ रुरुग्रः[7] ॥ * ॥ रोमग्रः ॥ * ॥ भुरुग्रः[8] ॥ * ॥ पक्षे लोमवानित्याद्यपि ॥ ४२१ ॥ इति लोमादिः ॥

पामा वामा वलिः श्लेष्मा सामहेमोष्मकद्रवः ।
कल्याणादङ्गशब्दाच्च लक्ष्म्या अच्च कृमिस्तथा[9] ॥ ४२२ ॥

पामादेर्नः ॥ * ॥ पामनः ॥ * ॥ वामनः ॥ * ॥ वलिनः ॥ * ॥

---

१ Kumâras. 5, 30.

२ °वक्त्रुर्मुनिः A.; °वभ्रुर्मुनिः D. E.

३ चुरुः E.; नुरुः C.; A. om. this half-śloka.

४ A. om. लोमादेः ग्रः.

५ वनुग्रा A.; व°ग्रः D.—वस्तु Hem.; om. by the others, (cf. वल्गु next note).

६ बभ्रु Bö., Yajñ., Kâś. V. ed., *a. β.*; वल्गु Hem.; also K. V. ed., वलु *β.*

७ रुरुं चेच्छंति केचन Yajñ.; om. by the others.

८ भुरु Hem.; तरु Bö., Yajñ., Kâś. V. ed. *a. β.*

९ अथ क्रिमि° C.F.K.; B. om. from लक्ष्म्या.

श्लेष्मणः ॥ * ॥ सामनः ॥ * ॥ हेमनः ॥ * ॥ ऊष्मणः ॥ * ॥ कद्रुणः[1] ॥ * ॥ कल्याणमङ्गमस्या अस्ति । अङ्गना ॥ कल्याण इति किम् । अङ्गवती ॥ * ॥ लक्ष्मीरस्यास्ति । लक्ष्मणः । लक्ष्मीवान् ॥ * ॥ क्षमिणः ॥ ४२२ ॥

विष्वचोऽकृतसंधिः[2] स्यालुक् पदस्योत्तरस्य च ।
शाकीदद्रूपलालीनां ह्रस्वत्वं च स्मृतं बुधैः[3] ॥ ४२३ ॥

विष्वक्शब्दान्नो भवति । तत्संनियोगेन चाकृतसंधिरुत्तरपदलोपः । विष्वञ्चोऽर्थास्ते दिवसा वा रश्मयो वा गतिविशेषा वाऽस्य सन्ति । विषुणः सूर्यः ॥ विष्वञ्चन्तीति विष्वञ्चो गतिविशेषा अस्य सन्ति । विषुणो वायुः । विष्वग्वान् ॥ विषुशब्दश्चादिर्नानात्वे वर्तते[4] ॥ * ॥ महच्छाकं शाकसमूहो वा शाकी । शाक्यस्मिन्नस्ति । शाकिनम् ॥ * ॥ दद्रूर्नाम व्याधिः । दद्रुणः ॥ भोजस्तु प्राक्सूत्रे दद्रुशब्दम् अस्मिन्सूत्रे च नागमाद् गृहगोधापर्यायं[5] कद्रुशब्दमाह[6] ॥ * ॥ पलालिनम्[7] ॥ ४२३ ॥ इति पामादिः ॥

बलफलपरिणाहोद्दाममालाबलाका
व्रतनिचुलमनीषामेखलामानशाखाः ।
कुलमुकुलपताकाकर्मचर्मप्रयामाः[8]
स्तबकवडबचूडायामवीणोपयामाः ॥ ४२४ ॥

---

१ कद्रूणः A.; कद्रूणः C.; का। काः D. —Yajñ. makes कद्रूणः; कद्रू Bö.; कद्रु Hem., Kâś. V.

२ विपूचो E.; क्षतिसंधि A.

३ च समं बुधैः B. C. K.

४ °शब्दश्च नानात्वे° B. C. K.; च वर्तते B. C. F. K.—Cf. चादि śl. 8 (विषु सर्वतोभावे page 21, l. 14).

५ नागमाख्यगृह° A.; च मातृगृहगोधावर्यायं D.

६ कद्रू° D.; कटु B. C.; कदु° K.

७ All MSS. om. पलालिनम्.—महत्पलालं पलालसमूहो वा पलाली तद्वत् पलालिनम् Yajñ.—Hem. has पलालिन् and पलाशिन्; the others पलाली.

८ कुलमकुल° B. C. K.

बलादेरिन् इत्यनेन[1] तदस्यास्त्यर्थे इन् भवति मतुश्च ॥ * ॥ बलमस्यास्तीति । बली । बलवान् ॥ * ॥ फली । फलवान् ॥ * ॥ परिणाही । परिणाहवान् ॥ एवं सर्वत्र ॥ * ॥ उद्दामी ॥ उद्दाम[2] इत्यन्यः ॥ * ॥ माली ॥ * ॥ बलाकी ॥ * ॥ व्रती ॥ * ॥ निचुली ॥ * ॥ मनीषी ॥ * ॥ मेखली ॥ * ॥ मानी ॥ * ॥ शाखी ॥ * ॥ कुली[3] । दुर्गमतेन ॥ * ॥ मुकुली[4] ॥ * ॥ पताकी ॥ * ॥ कर्मी ॥ चर्मी ॥ कर्मिकश्चर्मिक इत्येके[5] ॥ * ॥ प्रयामी ॥ * ॥ स्तबकी ॥ वडबी ॥ स्तबकश्च वडबा च स्तबकवडबम् । पश्चाच्छेषैः सह द्वंद्वः ॥ * ॥ चूडी ॥ * ॥ आयामी ॥ * ॥ वीणी । यथा ।

सिद्धद्वंद्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः[6] ॥ * ॥

उपयामी ॥ ४२४ ॥

कूलं जरोत्साहघृणोलदंष्ट्रा
व्यायामधन्वोद्यमवर्मकेकाः[7] ।
संज्ञाशिखारोहगदावरोहाः
पुलाष्टकायासमुलानि[8] सूना ॥ ४२५ ॥

---

१ बलादेरित्य° B. C. F. K.

२ उद्दामी° D.; उद्दास B. C. K.—उद्दास and उद्वास Bö., Yajñ.; उद्वास Hem.; उद्दास and उद्दाम K.V. ed., β.; उद्वास and उद्दाम α.

३ Thus also Bö., Yajñ., K.V. ed. β.; om. K. V. α., Hem.

४ मकुली° B. C. K.—मुकुल Hem.; om. by the others.

५ इत्यन्ये A.—Kâś. V. v. 2, 116 forms only कर्मी । चर्मी । वर्मी (α. β., om. ed.); Hem. remarks केचित्तु । वडवा । अष्टका । कर्मन् । चर्मन् । वर्मन् । इत्येतेभ्य इकमपीच्छन्ति ॥ Yajñ. states that the व्रीह्यादि have both इन् and इक with the exception of शिखा । माला । संज्ञा । वडवा । वीणा । बलाका which have इन् only, not इक; and यवखद् । अशीर्ष [K. V. यवखद् । कुमारी । नौ, but not अशीर्ष; Hem. नौ । कुमारी । यवखदा । सभा (।) करण (? सभा करणे)] which have इकन् only, not इन्.

६ Meghad. 45; om. A. D.

७ °धर्मकेकाः A.; चर्मकेकाः F.

८ °यामसुलानि° D. E.; याममुलानि C. F. K.; यामतुलानि B.

कूलिनी ॥ कूलस्थाने मूलमिति[1] पठन्ति ॥ * ॥ जरी ॥ * ॥ उत्साही ॥ * ॥ घृणी ॥ * ॥ उली । यस्य कस्यचित्संज्ञा ॥ * ॥ दंष्ट्री ॥ * ॥ व्यायामी ॥ * ॥ धन्वी । यथा ।

उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले[2] ॥

उद्यमी ॥ * ॥ वर्मी ॥ वर्मिक इत्यप्यन्ये[3] ॥ * ॥ केकी ॥ * ॥ संज्ञी ॥ * ॥ शिखी । वह्निर्मयूरश्च ॥ * ॥ आरोही ॥ * ॥ गदी । गदावान् ॥ * ॥ अवरोही ॥ * ॥ पुली[4] । यस्य कस्यचित्संज्ञा ॥ * ॥ अष्टकी ॥ अष्टकिक इति केचित्[5] ॥ * ॥ आयासी ॥ * ॥ मुली[6] ॥ * ॥ सूना घातनस्थानम् । सूनी[7] ॥ * ॥ उद्भास[8] इत्यपि केचित् ॥ * ॥ इन्प्रत्यये सिद्धे ठबाधनार्थम्[9] ॥ ४२५ ॥ इति बलादिः[10] ॥

मणिर्विषुर्बिम्बहिरण्यराज्यो[11]
मताः कुमारः कुररेष्टकार्णाः ।
गाण्डी ध्वनिर्गाण्डगुजके च नाम्नि
पतञ्जलिर्नेच्छति गाण्डिशब्दम् ॥ ४२६ ॥

---

१ सूलमिति C.; cf. śl. 299 comm.—Hem. has मूल; Bö., Yajñ. कूल; Kâś. V. both.

२ Śâkunt. śl. 38.

३ धर्मी । धर्मिक इत्यपत्ये A.; cf. preceding page, note 5.

४ फुल Hem.; om. by the others, cf. śl. 299.

५ See preceding page, note 5.

६ Om. D.—मुल Hem.; सुल Bö. (cf. preceding page, note 8); शूल K.V. *a.*; om. ed., *β.*; for Yajñ. see next note.

७ सूना Hem.; सूना घातस्थानम् । सुलेति क्वचित्पाठः ॥ Yajñ.

८ Thus Bö., Yâjñ., Hem.; also Kâś. V. *a.* उद्भाव ed. *β.*

९ ?चबाधनार्थं B. C. F.; क्वाधनार्थं D.

१० This corresponds to शिखादि Hem. vii. 2, 4; and to बलादि to Pân. v. 2, 136, but our *gaṇa* includes nearly all the व्रीह्यादि to P. v. 2, 116.

११ °हरिण्यराज्यो B. C. K.; °हिरिण्यराज्यो D. E.

मण्यादेर्व इत्यनेनेतस्मात्तदस्याच वास्तीत्यर्थे वो भवति मतुश्च ॥ * ॥ मण्योऽस्य सन्ति । मणिवः । मणिमान् ॥ मणिव इति कस्यचिन्नागस्य संज्ञा[1] ॥ * ॥ विषु साम्ये चादिः[2] । तद्विद्यतेऽस्य । विषुवम् । विषुवत् । यथा ।

समरात्रिंदिवे काले विषुवद्विषुवं च तत्[3] ॥

विषुवानित्यमरमालाकारः[4] ॥ मतोर्वत्वं लच्यात् ॥ विषुर्नाम मुहूर्तः । सोऽस्यास्तीति विषुमान् अहोरात्रप्रविभाग[5] इति तु शाकटायनः ॥ * ॥ बिम्बान्यस्यास्मिन्वा सन्ति । बिम्बावम्[6] । ह्याट्लेऽच् ह्रस्वश्च[7] बऋलमिति बऋलवचनाद्दीर्घः ॥ बिम्बव इति भोजः ॥ * ॥ हिरण्यवम् । हिरण्यवान् । हिरण्यवो नाम निधिः । कुबेर इत्यपरे ॥ * ॥ राजीवम् । राजिशब्दस्यापि ॥ * ॥ कुमारवम् ॥ * ॥ कुरारवम्[8] ॥ * ॥ दृष्टकावम् ॥ * ॥ अर्णशब्दः कृतसलोपो द्रष्टव्यः । अर्णवः । समुद्रः ॥ * ॥ गाण्डी गाण्डिर्वा दारुखण्डम्[9] । दात्रादिग्रहणे मुष्टिस्थानभूतं[10] ग्रन्थिव्यवच्छिन्नं[11] मध्यपर्व वा । गाण्डीवं गाण्डिवं वा । पार्थधनुः । यथा ।

गाण्डीवधन्वनः खेभ्यो निश्चचार कृताग्रनः[12] ॥

---

१ कस्य संज्ञा B. K.; कस्या संज्ञा C.; °नागसंज्ञा A.; °ना——संज्ञा D.

२ See page 21, l. 14 (सर्वतोभावे); p. 446, l. 9 (नानात्वे).

३ Amarak. i. 1, 3, 14.

४ °अमरमालाधरः D.

५ °रात्रः प्र° D.; °प्रतिभाग B.C.K.

६ बिंबावान् B. C. K.

७ ? ह्याङ्लेऽ (or ह्याट्लेऽ)ज्ह्रस्वश्च cf. p. 318, l. 15 and note 10. (? P. vi. 3, 111 seq.)

८ कुररवं F.; कुमाररावं A.—Hem. remarks बिम्बावं । कुररावं । कुरवावं । घञ्युपसर्गस्य बऋल इति बाऋलकादीर्घः ॥.

९ दारुषंडं A.

१० मुनिस्थानभूतं B. C. K.

११ ग्रंथिव्यावच्छिन्नं A. B. K.; ग्रंथिं व्यावच्छिन्नं C.

१२ Kirât. 15, 46. [all MSS. read गांडीवधनुषः;—गाण्डीवधन्वनः °निश्चक्राम° eds.].

यथा वेणीसंहारे[1]।

हस्ताकृष्टविलोलकेशवसना दुःशासनेनाज्ञया
पाञ्चाली मम राजचक्रपुरतो[2] गौर्गौरिति व्याहृता।
तस्मिन्नम्ब स किं नु[3] गाण्डिवधरो नासीत्पृथानन्दनो
यूनः क्षत्रियवंशजस्य कृतिनः क्रोधास्पदं किं न तत्॥

ह्रस्वादपि भवति। गाण्डिवं धनुरिति[4]। तुल्या हि संहिता ह्रस्वदीर्घयोरुभयथा सूत्रं प्रणीतमित्येतन्न संगतम्। कुतः। न आगमो न युक्तिः। आगमस्तावन्नास्ति वार्त्तिकभाष्ययोरभावात्[5]। यदि च ह्रस्वसूत्रे गाण्डिशब्द उपात्तो दीर्घस्य न प्राप्नोति[6] नापि गाण्डिगाण्डीशब्दयोरेकशेषोऽस्तीति भाष्यकारमतानुसारिणा केनाप्येतद्विचारितम्॥ * ॥ अजकावम्। पिनाकम्॥ अजकवमिति वामनः। यत्तु पिनाकोऽजगवं धनुरिति पाठो दृश्यते तचाजगवोऽस्त्रिविशेषो विद्यतेऽस्य। अर्शआदित्वादत्प्रत्ययेऽजगवमिति सिद्धम्॥ * ॥ मण्वादयः प्रयोगतो गम्याः॥ ४२६॥ इति मण्वादिः[7]॥

सुखप्रतीपप्रणयास्रसोढास्[8]
तृप्रास्रकृच्छ्रा दलशीलकक्षाः।
अलीकदुःखे कृपणं हलं स्यात्
क्षेपे तु माला करुणश्च शोफः[9]॥ ४२७॥

---

१ Veṇîs. ṣl. 51 (ed. Calc. Saṃv. 1924, p. 60); cf. Grill, Noten, p. 138.

२ The Devanâg. recension reads राजचक्रमभितो.

३ तस्मिन्नंबसु° B. K.; तस्मिन्नेव तु° C.; किंतु F.—तस्मिन्नेव स किं नु Dev. rec.

४ धनमिति A.; गाण्डिवं गांडीवं धरिति D.

५ वार्त्तिकाभावात् B. C. & orig. K.

६ उपात्तदीर्घस्य° F.; B. C. K. om. न; प्राप्नोत्विति D.

७ Hem. has the same *gaṇa*; cf. Pâṇ. v. 2, 109 vârtts.; 110.

८ °प्रणयाश्च° B. C. D. E. F. K.; °प्रणयाश्च° A.

९ शाफः A.; शोकः D.

सुखादिधर्मशीलवर्णान्तादित्यनेन तदस्याऽस्तीत्यर्थे इनेव भवति ॥ * ॥ सुखमस्यास्तीति सुखी ॥ * ॥ प्रतीपी ॥ * ॥ प्रणयी ॥ * ॥ अस्री[1] ॥ * ॥ सोढी ॥ * ॥ तृप्री[2] ॥ * ॥ आस्री[3] ॥ * ॥ कृच्छ्री ॥ * ॥ दली ॥ * ॥ शीली ॥ * ॥ कची ॥ * ॥ अलीकी ॥ * ॥ दुःखी ॥ * ॥ कृपणी ॥ * ॥ हली ॥ * ॥ माली । निन्दायाम् । अन्यत्र मालावान् ॥ * ॥ करुणी ॥ * ॥ शोफी[4] ॥ * ॥ बलादिषु[5] मालाशब्दः पठ्यते । इह तु पाठः ज्ञापे मतुर्मा भूत् ॥ ४२७ ॥ इति सुखादिः ॥

पुष्करो नडतमालहिरण्य-
कैरवाणि कुमुदं च शिरीषम् ।
कर्दमस्तटतरंगकपित्थाः
पङ्कजोत्पलकरीषसरोजम् ॥ ४२८ ॥

पुष्करादेरिन् इत्यनेन पुष्करादेरस्त्यर्थे देशेऽभिधेय इन् भवति ॥ * ॥ पुष्कराणि विद्यन्तेऽस्यामस्या वा । पुष्करिणी भूमिः ॥ * ॥ नडिनी ॥ * ॥ तमालिनी ॥ * ॥ हिरण्यिनी[6] ॥ * ॥ कैरविणी ॥ * ॥ कुमुदिनी ॥ * ॥ शिरीषिणी ॥ * ॥ कर्दमिनी ॥ * ॥ तटिनी ॥ * ॥ तरंगिणी ॥ * ॥ कपित्थिनी ॥ * ॥ पङ्कजिनी ॥ * ॥ उत्पलिनी ॥ * ॥ करीषिणी ॥ * ॥ सरोजिनी ॥ ४२८ ॥

---

१ अश्री F.; lac. D.; cf. note 3; and śl. 444 comment. [अस्यतेऽनेन । अस्रं । अश्रु].

२ Thus Yajñ., Hem., Kâś. V. ed.; तृप्र Bö., K. V. *a.* (तृष्व *β.*).

३ आश्री B. C. K.; आ । श्री D.—अश्र and आस्र Hem.; अश्र and अस्र Yajñ.; अस्र (*v.l.* आस्र) and आश्र (*v.l.* अस्र) Bö.; आस्र Kâś. V. ed., *a. β.*—See also kârikâ 9 on Kâtantra ii. 6, 15 [तृप्री कृच्छ्री प्रतीपी च सोढाश्र्यस्रीत्युदाहृतम्] with var. readings.

४ शाफी A.; शोकी D.—Not given by the other works.

५ See śloka 424.

६ हरिण्यिनी B. C. K.

राजीवनालीकसरोरुहाणि
मृणालपद्मं पुटकारविन्दम् ।
अम्भोजमब्जं कमलं विगर्हैः
कल्लोलशालूकबिसं यवासः ॥ ४२९ ॥

राजीविनी ॥ * ॥ नालीकिनी ॥ * ॥ सरोरुहिणी ॥ * ॥ मृणालिनी ॥ * ॥ पद्मिनी ॥ * ॥ पुटकिनी ॥ * ॥ अरविन्दिनी ॥ * ॥ अम्भोजिनी ॥ * ॥ अब्जिनी ॥ * ॥ कमलिनी ॥ * ॥ विगर्हिणी । अयं जयादित्यमतेन । विवर्ह[1] इत्यन्यः ॥ * ॥ कल्लोलिनी ॥ * ॥ शालूकिनी ॥ * ॥ बिसिनी ॥ * ॥ यवासिनी[2] ॥ वामनस्तु हृहङ्क्तौ यव माषेति पठति । ततो यविनी माषिणी[3] । दुर्गस्तु पय इति पठति[4] ॥ * ॥ देश इति किम् । पुष्करवान् ह्रदो । कमलवान् । बिसवान् । पुष्कराणि तीर्थान्यस्मिन्देशे सन्ति । अनभिधानादिन्न भवति ॥ एते च नियतार्थविषया एव शब्दा द्रष्टव्याः ॥ ४२९ ॥ इति पुष्करादिः[5] ॥

कृष्णासुतौ भ्रातृशिखा पितासाव्
उत्साहपुत्रौ परिषच्च माता ।
उत्सङ्गपर्षद्रजसोऽथ दन्तः
कृष्णादिसंज्ञे गदिता[6] गणेऽस्मिन् ॥ ४३० ॥

---

१ ? Thus Hem.; विगर्ह A.; विवहा D. F.; विवह B. C. K.—The other works have विगर्ह.

२ यवाग्निनी B. C. K.

३ यवास, यवाष, यव, माष Hem.; यवास and पयस् (cf. next note) Bö., Yajñ.; यवास Kâś. V. ed., *β.*, यवस *a.* (*v.l.* ed. वयस).

४ Kârikâ 14 in Durgasiṁha's vṛitti on Kât. ii. 6, 15 has पयस only.

५ Hem. makes two *gaṇas* of this, पुष्करादि and अब्जादि; the former taking इन् when देशे; the latter (with those in Pâṇ. v. 2, 137) when नाम्नि. Cf. Index.

६ °संज्ञो गदितो B. C. F. K.

क्षय्यूषार्शआदेर्वलरात इत्यनेन क्षयीत्यादेरस्त्यर्थे वलः[1] । ऊष इत्यादे रः । अर्श इत्यादेरकारो भवति ॥ * ॥ क्षयिरस्यास्तीति क्षयीवलः । कुटुम्बी ॥ रूढिशब्दोऽयम् । अन्यत्र क्षयिमत् क्षेत्रम् । ज्याङ्ले ऽच् ह्रस्वश्च[2] बऋलमिति दीर्घभावः ॥ * ॥ आसुतिः सुरापानम् । आसुतीवलः । शौण्डिकः ॥ नाममालास्वासुतीवलो यज्वोच्यते ॥ * ॥ भाटवलः ॥ * ॥ शिखावलो मयूरः । शिखावलं नगरम् । शिखावला स्थूणा ॥ * ॥ पिटवलः ॥ * ॥ उत्साहवलः[3] ॥ * ॥ पुचावलः[4] ॥ * ॥ परितः सीदति । परिषत् । परिषद्वलो राजा ॥ परिषदनं परिषत् पङ्कः सर्वतोऽवतारो[5] वा । सोऽस्यास्तीति परिषद्वलं तीर्थमित्यन्ये ॥ * ॥ माटवलः ॥ * ॥ उत्सङ्गावलः[6] ॥ * ॥ पर्षद्वलो राजा । यथा सिद्धनागार्जुनस्य ।

लोकातीतामचिन्त्यां शमसुकृतफलामात्मनो यो विभूतिं[7]
पर्षन्मध्ये विचित्रां कथयति महतीं धीमतां प्रीतिहेतोः ॥ * ॥

रजस्वला स्त्री ॥ * ॥ दन्तावलो नाम राजा गजश्च ॥ * ॥

आसुतिपर्षद्रजःशब्दानां यौगिकत्वं केचित्प्रतिपन्नाः[8]। तन्मत आसुतिमान् परिषद्वान् रजस्वान् ग्राम इत्यपि भवति ॥ परिषच्छब्द एव

---

१ B. K. & Hem. बल throughout.

२ See p. 449, note 7; P. vi. 3, 118.

३ Thus also Hem., Kâś. V. ed., β. (v. 2, 112); उत्साहावलः K. V. α.

४ ? Thus MSS.; K. V. α.; पुचबलः Hem., K. V. ed., β.

५ पंकसर्वतोवतारो B.; पंकसर्वतोरो C. K. — परिषद्वलः । पर्षद्वान् । परिषद्वलं तीर्थं पङ्किलमित्यर्थः । परिषद्वत् । Hem.

